ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ/1219/450/છ, તા.03/07/2019-થી મંજૂર

# समाजशास्त्रम्

## मध्यमा १

## (ધોરણ 11)

### प्रतिज्ञापत्रम्

भारतं मम देशः।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति।
मम मानसे देशस्पृहा अस्ति। समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि।
प्रत्येकेन सह शिष्टव्यवहारं करिष्यामि।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि।
तेषां कल्याणे समृद्धौ च एव मम सुखम् अस्ति।

मूल्यम् : ₹ 24.00

**गुजरातराज्यशालापाठ्यपुस्तकमंडलम्**
**'विद्यायनम्', सेक्टर 10-ए, गांधीनगरम् - 382010**

© गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, गान्धीनगरम्

अस्य पाठ्यपुस्तकस्य सर्वेऽधिकाराः गुजरातराज्यपाठ्यपुस्तकमण्डलहस्तकाः सन्ति। अस्य पाठ्यपुस्तकस्य कश्चिदपि भागः केनापि रुपेण गुजरातराज्य-पाठ्यपुस्तकमण्डलनियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्यते।

**विषयमार्गदर्शनम्**

पं. परमात्मानाथ तिवारी

**लेखनम्**

डॉ. अरुणकुमार मिश्रः (कन्वीनर)

पं. दीपकभाई महेता

श्री संदीपकुमार पंड्या

डॉ. महेशकुमार ठाकरः

श्री रविकुमार भट्टः

**समीक्षणम्**

श्री मेहुलकुमार भट्टः

डॉ. ललितकुमार पटेलः

डॉ. सुभाषः वसोया

**भाषाशुद्धिः**

श्री सुरेश व्यासः

**संयोजनम्**

डॉ. क्रिष्ना दवे

(विषय-संयोजकः - अंग्रेजी)

**निर्माणायोजनम्**

श्री हरेन शाह

(उपनियामकः - शैक्षणिकः)

**मुद्रणसंयोजनम्**

श्री हरेश एस. लीम्बाचीया

(उपनियामकः - उत्पादनम्)

## प्रास्ताविकम्

प्राच्यगुरूकुलपरम्परानुसारम् अध्ययनं कुर्वतां-छात्राणां कृते प्राचीनार्वाचीनयोः अध्ययनाध्यापनयोः पद्धत्योः समन्वयं कृत्वा गुजरात राज्य-माध्यमिकोच्चतर माध्यमिक शिक्षणसमितिः (बोर्ड) द्वारा नूतना-अभ्यासक्रमसंरचना कृता अस्ति। गुजरातसर्वकारद्वारा प्रमाणिताः मानिताः च अभ्यासक्रमाः सन्ति।

गुजरातसर्वकारद्वारा प्राप्तमान्यतायाः **सामाजशास्त्रम् मध्यमा १ (धो२ण 11)** इति विषयस्य नूतनाभ्यासक्रमानुसारं सज्जीकृतमिदं पुस्तकं-प्रकाशनात् प्राक् विषयज्ञैः सर्वाङ्गीणतया-समीक्षितं संसूचितपरिवर्तनानुसारं हस्तलिखितेषु लेखेषु योग्यतया संशोधनानन्तरं प्रकाशितमस्ति।

प्रस्तुतं पाठ्यपुस्तकं कक्षानुसारम् उपयोगि परिशुद्धं च कर्तुं मण्डलद्वारा कृते प्रयत्नेऽपि न्यूनतापरिपूर्णार्थं विद्वद्भिः सूचिताः सूचनाः सादरं स्वीकरणीयाः एव।

**पी. भारती** (IAS)
नियामकः — कार्यवाहकःप्रमुखः
ता.06-07-2019 — गान्धीनगरम्

**प्रथमावृत्ति : 2019**

**प्रकाशक :** गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, 'विद्यायन', सेक्टर 10-ए, गान्धीनगरप्रातिनिध्येन पी.भारती, नियामकः

**मुद्रक :**

# मूलभूतकर्तव्यानि

**प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः। ***

( क ) संविधान प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रीयगीतस्य च आदरः।

( ख ) स्वातन्त्र्याय अम्मीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च।

( ग ) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डिततायाश्च समर्थनं च।

( घ ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषाणायां जातायां तदनुसरणञ्च।

( च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्यसमानबन्धत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

( छ ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः।

( ज ) वनानां तडागानां नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

( झ ) वैज्ञानकिमानसाय मानवतावादाय जिज्ञासायै भावनाभिगमाभिबोधः।

( ट ) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

( ठ ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६. तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

---

* भारतीय संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका


| | | |
|---|---|---|
| 1. | वैदिकसूक्तपरिचयः | 1 |
| 2. | द्वादशज्योतिर्लिङ्गानि | 7 |
| 3. | प्राच्यग्रन्थपरिचयः (रामायणं महाभारतं च) | 11 |
| 4. | संस्कृतकविपरिचयः | 16 |
| 5. | देवतानां परिचयः | 21 |
| 6. | भारतस्य पर्यटनस्थलानि | 25 |
| 7. | भारतस्य धार्मिकस्थलानि | 30 |
| 8. | भारतीयशिक्षा | 35 |
| 9. | भारतीयसंविधानम् | 41 |
| 10. | लोकसभा | 47 |
| 11. | भारतसर्वकारस्य विशिष्टाभियानम् | 53 |
| 12. | भारतस्य राष्ट्रपतिः | 57 |
| 13. | भारतस्य अन्ताराष्ट्रियसंम्बन्धनिरूपणम् | 62 |
| 14. | समाजशास्त्रम् | 66 |
| 15. | भारते समाजशास्त्रस्य विकासः | 71 |
| 16. | भारतीयसञ्चारव्यवस्था | 77 |
| 17. | भारते कृषिव्यवस्थापनम् | 82 |
| 18. | सामाजिकव्यवस्था सामाजिकरचनातन्त्रं च | 88 |
| 19. | अर्थशास्त्रम् | 93 |
| 20. | पर्यावरणं समाजश्च | 96 |

# १ वैदिकसूक्तपरिचयः

**प्रास्तावना**

वेदस्तु निर्मलः दर्पणः अस्ति। जनाः दर्पणे स्वप्रतिबिम्बं पश्यन्ति। दर्पणे निजस्वरूपमेव दृश्यते। तेनैव प्रकारेण वेदेऽपि जनाः निजभावानुसारम् एव दर्शने समर्थाः भवन्ति। वेदविहितकर्मैव धर्मः। वेदप्रतिकूलकर्म अधर्मः। यस्य कस्यापि वेदेनैव प्रत्यक्षाप्रत्यक्षज्ञानं सम्भवं वर्तते। यथा-

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।**
**एतद्विदन्ति वेदेन तस्माद् वेदस्य वेदता॥**

यः स्वतः प्रमाणमस्ति, यस्य प्रमाणस्य अपरेषां प्रमाणानाम् अपेक्षा न भवति सः एव वेदः। महर्षिणा आपस्तम्बेन कथितमस्ति यत्-''मन्त्रब्राह्मणयोर्वेदनामधेयम्'' मन्त्राः ब्रह्मरूपशब्दराशिश्च वेदः। ऋग्यजुःसामाथर्ववेदेषु उपलब्धाः मन्त्राः ब्रह्मणानि अपौरुषैयैणि सन्ति। महर्षिपराशरेण लिखितं वर्तते-''न कश्चिद्-वेदकर्ता च वेदस्मर्ता चतुर्मुखः। अतः एव वेदानामस्तित्वं सृष्टेः पूर्वमासीद् एवं सिद्धं भवति।''

ऋग्वेदस्य पुरुषसूक्ते कथितमस्ति-

**तस्माद् यज्ञात् सर्वहुत ऋचः समानि जज्ञिरे।**
**छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत॥**

सृष्टेः आदिभूतेन तेन पुरुषेण ऋग्वेदः, यजुर्वेदः, छन्दः, सामवेदश्च आविर्भूतः। मन्त्राणां सूक्तानां विनियोगेषु येषां ऋषीणां नामानि सन्ति ते मन्त्राणां प्रयोगकर्तारः सन्ति न तु रचनाकाराः। वेदस्तु ज्ञानस्वरूपः, अनादिः, अव्ययः, अविकृतः च वर्तते।

वेदस्तु चतुर्धा कृष्णद्वैपायनेन विभक्तः। अनेन कारणेन तस्य नाम वेदव्यासः प्रसिद्धमभवत्। सः यज्ञकर्मणः कर्मानुसारं चतुर्षु भागेषु विभाजनमकरोत्। यज्ञस्य प्रयोजनीयविषयान् विहाय अन्यान् उपयोगिविषयान् अथर्ववेदे संगृहीतवान्। ब्राह्मणग्रन्थाः उद्घोषयन्ति यद् अथर्ववेदे सर्वजनहिताय समभावस्य वर्णनं विद्यते। यथा-

**प्रियं मा कृणु देवेषु, प्रियं राजसु मा कृणु।**
**प्रियं सर्वस्य पश्यतः, उतशूद्र उतार्यैः॥**

अर्थात्-हे जगदीश्वर! केवलं देवान् प्रत्येव प्रियविधानं न कर्तव्यम्। तव स्नेहः प्रति एव न स्यात्। शूद्राः किमार्याः किम्? भवतां कृते सर्वे समानाः सन्ति। ऋषयः मन्त्राणां सूक्तानां च कर्तारः न, द्रष्टारः एव सन्ति। ऋषिदर्शनात् (२-३-२) एतत् कथनं तत्तत् मन्त्राणाम् अथवा सूक्तानाम्, ऋषीणाम्, छन्दसाम्, देवतानाम्, परस्परसम्बन्धस्य मननपूर्वकम् अवलोकनेन स्पष्टं भवति।









**सूक्तपदस्य अर्थः**

स्तोत्रविशिष्टमेव सूक्तमिति कथ्यते। सूक्तं स्तोत्रं च परस्परं पर्यायौ स्तः। यस्मिन् यन्त्रे अथवा मन्त्रसमुदाये प्रतिपाद्यार्थस्य सम्यग् वर्णनं भवति तदेव सूक्तं इति कथ्यते - यथा **'ये मित्रे वरुणे सूक्त वाचः'** (ऋक् सं.-५-४९-९) अनुवाकानुक्रमणीकारः सम्पूर्ण-ऋषिवाक्यं सूक्तं कथयति। ''सम्पूर्ण-ऋषिवाक्यं तु सूक्तमित्यभिधीयते''।

**सूक्तस्य विभागः**

बृहद्देवताकारेण सूक्तं चतुर्षु भागेषु विभक्तं कृतमस्ति। **''देवतार्षार्थच्छन्दोभ्यो वैविध्यं यस्य जायते।''** ऋग्वेदस्य आलोडनम् अत्यन्तं कष्टसाध्यं वर्तते। अतः वर्गीकृतसूक्तानाम् अध्ययनमेव ऋजुमार्गः वर्तते। सामान्यरूपेण सूक्तानां वर्गीकरणस्य आधारः निम्नाङ्कितः अस्ति। (१) देवतासूक्तम्। (२) संवादसूक्तम् (३) दानस्तुतिसूक्तम्। (४) तत्त्वज्ञानसूक्तम्। (५) संस्कारसूक्तम् (६) मान्त्रिकसूक्तम् (७) लौकिकसूक्तम् (८) आर्षसूक्तम्।

**स्त्रीकर्मसूक्तम्**

स्त्रीणां महत्त्वं सर्वशास्त्रेषु, वेदेषु, पुराणेषु अपि वर्णितमस्ति। यथा-**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः। ।।मनु.।।** विवाहकाले कन्यादानपाणिग्रहणानन्तरं लाजाहोमे कन्या स्वमुखेन स्वस्यार्थं नारीशब्दस्य प्रयोगं करोति। (पा.गृ.-१-६-२, अध्याय -१४-२-६३) नारीत्वं प्राप्य सा द्वे प्रधानादर्शे स्वमुखे स्ववचने जीवनाय प्रस्तूयते- १. आयुष्यमानस्तु मे पतिः। २. एधन्तां ज्ञातयो मम। मम पतिः आयुष्यपूर्णः स्यात्। मम जातेः समाजस्य चाभिवृद्धिः भवेत्। विवाहानन्तरम् एव अस्याः सौभाग्यस्य प्राप्तिः भवति। (पा.गृ.सू.१-८-९)। पतिमतीस्त्रियः अविधवा (सधवा) इति कथ्यते। गृहे सधवास्त्रीणां स्थानं महत्त्वपूर्णं प्रथमं च भवति (ऋ.१०-१८-७) ईदृश्यः स्त्रियः सदा सर्वदा रोगरहिताः, अञ्जनेनैव, घृतादिस्निग्धपदार्थैः विभूषिता, मूल्यवानालङ्कारैः अलङ्कृताः अश्रुविहीनाः (ऋ.१०-१८-०७) सुरूपिण्यः, स्मितमुख्यः, शुद्धकर्तव्यनिष्ठाः, पतिप्रियाः, सुवस्त्राः (१०-७१-४) एवं पतिव्रतधर्मनिष्ठाः (पा.गृ.सू.१-८-८) भवेयुः। अथर्ववेदस्य चतुर्दशकाण्डे एकचत्वारिंशत् श्लोकतः पञ्चाशत् श्लोकं यावत् वर्णनमत्र प्रस्तूयते-

**रवेरथस्य खेऽनसः खे युगस्य शतक्रतो।**
**अपालामिद्र त्रिष्पूत्वाकृणो सूर्यतव्यम्॥ ४१ ॥**

हे शतकर्मयुक्तेन्द्र! रथाकाशे त्रिवारं पवित्रीकृत्य अपालां सूर्य इव मया तेजस्विनी कृतास्ति।

**आशासाना सौ मनसं प्रजा सौभाग्यं रयिम्।**
**पत्युरनुव्रता भूत्वा सं मह्यस्वामृतायकम्॥ ४२ ॥**

त्वं सन्तत्या धनेन सौभाग्येन च, प्रसन्नचेता भूत्वा, पत्युः अनुकूला भूत्वा इदम् अमृतमयं सुखं स्ववशे कुरु।

**सम्राज्ञोधि श्वसुरेषु, सम्राज्ञयुक्तः देवृषु।**
**ननान्दुः सम्राज्ञयेधि, सम्राज्ञयुतः श्वश्रवाः॥ ४४ ॥**

त्वं श्वसुरेषु, देवृषु, ननान्दृषु, श्वश्रूषु साम्राज्ञी भूत्वा स्थिता भव। एवमन्यानि सूक्तानि वर्तन्ते।

नारी भूत्वा इयं पत्नी सती पदमपि प्राप्नोति। यस्मात् कारणात् स्वपतये कर्तव्यफलमपि प्राप्नोति। (पाणिनिः-४-१-३३-पत्युर्नोयज्ञसंयोगे) पत्नी-पुरुषस्यार्धोभागः वर्तते (तै.ब्रा.३-३-५) पत्नीं विना पुरुषः अर्धत्वात् सर्वेषु यज्ञेषु अधिकारी न भवति। (तै.२-२-२-६) पत्नी लक्ष्म्याः स्वरूपं भवति। अस्याः पूजनं कर्त्तव्यम्। (मनु. ३-५६) मानवैः सम्मानितास्त्रीणां वैदिकं नाम ''मेना'' भवति (निरुक्त ३-४-२१) पतिः अस्यां गर्भस्वरूपेण उत्पन्नः भवति; अतः एव इयं ''जाया'' अपि कथ्यते। (ए.ब्राह्म.७-१३)

**राजकर्मसूक्तम्-**

अस्मिन् वर्गे नृपाणामाश्यकतानां पूर्तिविषयकमन्त्राणां समावेशः भवति। अत्र केचन मन्त्राः शत्रुविषयकाः, केचन अभिशापपरकाः सन्ति। अन्ये पौष्टिकविषयकमन्त्राः सन्ति - यथा-

१. राज्याभिषेकसमये पवित्रोदकेन स्नानमन्त्राः।

२. नृपस्य प्रभुताविषये, तस्य बलयशोवृद्ध्यर्थं मन्त्राः।

३. रथारोहणकालीनमन्त्राः।

४. नृपस्य निर्वाचनकालस्य मन्त्राः।

५. राज्याद् विस्थापितस्य नृपस्य पुनः राज्याभिषेकाय मन्त्राः।

दुन्दुभिसूक्तेषु शत्रोः पराजयार्थं स्वविजयाय प्रार्थना कृतास्ति। अस्य सूक्तस्य मन्त्राः विविधरूपेण महत्त्वपूर्णाः सन्ति। इमे मन्त्राः साहित्यदृष्ट्या वीररसेन परिपूर्णाः सन्ति। इमे मन्त्राः कापुरुषमपि उत्साहसम्पन्नं कर्तुं समर्थाः सन्ति। यथा-

**उच्चैर्घोषो दुन्दुभिः सत्वनायन् वानस्पत्यः संभृतः उक्त्रियाभिः।**
**वाचं क्षुणुवानो दमयन्सपत्नान्तिंसह इव जेष्यन्नभिः तंस्तनीहि॥**
**दुन्दुभेर्वायं प्रयतां वदन्तीमाशृण्वती नाथिता घोष बुद्धा।**
**नारी पुत्रं धावतु हस्तमृह्यामित्री भीता समरे वधानाम्॥**

(अथर्व.वेदः ५-२०)

नृपस्योत्साहवर्धनाय सूक्तेऽस्मिन् कथितमस्ति-यत् हे! नृप। काष्ठेन निर्मितं, सुदृढ़रज्जुभिः सम्यक्बद्धाः, वीरवदाचरणकर्त्ता, दुन्दुभिः उच्चरितस्वशब्दान् उच्चस्वरेण युक्तान्कृत्वा शत्रुपक्षान् बलहीनकर्ता त्वं विजेता सिंह एव सम्यग् भयप्रदोच्चारणं कुरु।

दुन्दुभीनामुच्चारणं श्रुत्वा शत्रुपक्षस्य नार्यः भयंकरशस्त्राणां संहर्षमध्ये स्वपुत्रान् वक्षस्थले धृत्वा पलायनं कुर्वन्ति।

राजा शब्दः अतीवोत्तमः वर्तते। राजृ दीप्तो धातोः अयं शब्दः सिद्धयति। यः सम्यक् दीप्तिमान् अर्थात् स्वश्रेष्ठ-गुणैः लोकानां मध्ये प्रतिष्ठितः भूत्वा माननीयः भवति सः राजा भवति। भारतीयपरम्परायां सर्वोच्चसत्तायुक्तः एव राजा नाम्ना सम्बोधितः भवति। अयमेव राजा शब्दः अधिपतिः, राष्ट्राध्यक्षः इत्यादि रूपेण व्यवहृतोऽस्ति।

**शासकस्य गुणः**

राष्ट्रस्य सुरक्षायै राष्ट्रपतेः चयनं कीदृशं भवेत् तस्य वर्णनं अस्मिन् सूक्ते अवलोकनीयमस्ति-

**नाभा पृथिव्याः समिधाने अग्नौ रायस्पोषाय बृहते हवामहे।**
**इरम्दं बृहदुक्थं यजत्रं जेतारमग्निं पृतनासु सासहिम्॥**

(यजु. ११-७६)

वेदसूक्तेषु राजकर्मसम्बन्धि सूक्तानां प्राचुर्यं वर्तते। तथाऽपि नृपस्य कर्तव्यम्, नृपस्यप्रजायै कर्तव्यम्, शासनस्य प्रकारः, सभासमितेः संघटनम्, न्यायदण्डविधानम्, सेनायाः संरचना, सेनापतेः व्यवस्था, सैन्यशिक्षणम्, शस्त्रास्त्राणां संरक्षणं, शत्रुनाशविषये विजयप्राप्तेः साधनानि एतेषां सम्यक् व्यवस्था करणीया।

**अभिचारसूक्तम्**

दैत्यराक्षसानां तथा शत्रूणां उद्देश्यं कृत्वा कृतविविधप्रयोगाणां विधयः अभिचारकर्मणि भवन्ति। मन्त्रतन्त्राणां प्रयोगः तथा मारणमोहनोच्चाटनवशीकरणादिविषयाः अभिचारः इति कथ्यते। अथर्ववेदे अभिचारिकमन्त्राणां संख्या अल्पीयसी वर्तते। परन्तु कतिपयपाश्चात्त्यविदुषांमते अथर्ववेदः प्रधान-अभिचारिककर्मरूपेण स्वीक्रियते।

अथर्ववेदे पञ्चमकाण्डे अभिचारसम्बन्धि विविधानि सूक्तानि सन्ति-

यथा-कुण्ठतक्मनाशनम्, लाक्षा, ब्रह्मविद्या, अरातिनाशनम्, शत्रुनाशनम्, सर्पविषनाशनम्, कृत्यापरिहरणम्, रोगोपनाशनम्, वृषरोगनाशनम्, ब्रह्मजाया, ब्रह्मगवी, शत्रुसेनानाशनम्, इत्यादीनि अनेकानि सूक्तानि सन्ति। परन्तु तेषु सर्पविषनाशनं तथा कृत्यापहरणं द्वयोः सूक्तयोः विवरणम् अत्र प्रस्तूयते -

सर्पविषनाशनम् -

ऋषि-गरुत्मान् १. देवता-तक्षकः २. आस्तारपङ्क्तिः। छन्दः - ४ अनुष्टुप्। ५ त्रिष्टुप्॥ १-३-जगती।

**ददिर्हि मह्यंवरुणोदिवः कविर्वचोभिरुग्रोनि रिणामि ते विषम्।**
**खातमखातमुत सक्तमग्रभमिरेव धन्वन्ति जजास ते विषम्** ॥१॥
**यत्ते अपोदकं विषं तत्र एतास्वग्रभम्।**
**गृह्णामि ते मध्यममुत्तमं रसमुतावमं भियसा नेशदादु ते** ॥२॥
**वृषा मे रवो नभसा न तन्यतुरुग्रेण ते वचसा बाध आदु ते।**
**अहं तमस्य नृभिरग्रभं रसं तमस इव ज्योतिरुदेतु सूर्यः** ॥३॥
**चक्षुषा ते चक्षुर्हन्मि विषेण हन्मि ते विषम् ।**
**अहे म्रियस्व मा जीवीः प्रत्यगभ्येऽति त्वा विषम्** ॥४॥

**कैरात पृश्न उपतृण्य बभ्र आ मे शृणुतासिता अलीकाः।**
**मा मे सख्युः स्तामानमपि ष्ठाता श्रावयन्तो नि विषे रमध्वम् ॥५॥**

द्युलोकस्य देवतावरुणदेवः मामुपदिशति, तस्य अग्रवचोभिः वयं भवतः विषापहरणं कुर्मः। यः विषः मांसे प्रविष्टोऽस्ति, यः बहिर्भागे एव अस्ति। तान् सर्वान् विषानहं गृह्णामि। येन प्रकारेण सिक्तायां नीरं नष्टं भवति तेनैव प्रकारेण भवतः विषान् पूर्णतया नष्टं कुर्मः॥१॥

भवतः अपोदकं विषं एतास्वग्रभम् एव गृह्णामि। भवतः मध्यमोत्तमाधमविषरसान् अहं गृह्णामि तद् अस्माकं भयाद् विनष्टं भवेत्॥२॥

अस्माकं रवः वर्षणशीलनभसा इव शब्दशक्त्या युक्तः अस्ति। एभिः प्रचण्डैः रवैः वयं (भवन्तं) विषधरं बध्नामः। मानवैः भवतः विषमववारितम्। येन प्रकारेण ज्योतिष्मान् सूर्यः तमसि उदेति तेनैव प्रकारेण अयं पुरुषोऽपि उदेत्॥३॥

हे सर्प! स्वनेत्रबलेन तव नेत्रबलं हन्मि, सहैव विषमपि हन्मि। हे काल! मृतो भव, मा जीवी। तव विषं नष्टं भवेत्॥४॥

वने भ्रममाणाः वभ्राः, उपतृण्याः, पृश्नाः, कृष्णवर्णाः निन्दनीयसर्पाः। सूर्य मामिमानि कथनानि श्रुणुत। यूयं मम सख्युः गृहसमीपे मा तिष्ठत। अस्माकं कथनानि स्वामित्रभूतान् अन्यान् सर्पान् कथयन् स्वविषे एव रमध्वम्॥५॥

**॥ कृत्यापरिहरणसूक्तम्॥**

ऋषि शुक्रः। देवता-१,२ ओषधिः। ३-कृत्यापरिहणम् छन्दः अनुष्टुप्। ३, ४, ५ भुरिक् अनुष्टुप्

**सुपर्णस्त्वान्वविन्दत्सूकरस्त्वाखनन्नसा।**
**दिपसौषधे त्वं दिप्सन्तमव कृत्याकृतं जहि ॥१॥**
**अव जहि यातुधानानव कृत्याकृतं जहि।**
**अथो यो अस्मान् दिप्सति तमु त्वं जह्योषधे ॥२॥**
**रिश्यस्येव परीशासं परिकृत्य परित्वचः।**
**कृत्यां कृत्याकृते देवा निष्कमिव प्रति मुञ्चत् ॥३॥**
**पुनः कृत्यां कृत्याकृते शपथः हस्तगृह्य पराणय।**
**समक्षमस्मा आ धेहि यथा कृत्याकृतं हनत् ॥४॥**
**कृत्या सन्तु कृत्याकृते शपथः शपथीयते।**
**सुखो रथ इव वर्ततां कृत्या कृत्याकृतं पुनः ॥५॥**

सुपर्णः (गरुडः वा सूर्यः) भवन्तं प्राप्नोत्। सूकरः नासिकाग्रभागेन भवन्तमखनत्। हे दिव्यौषधे। त्वमस्मान् कृत्याप्रयोगकर्तॄन् जहि (विनष्टं कुरु) ॥१॥

हे दिव्यौषधे भवान् दुःखदयातुधानान् विनष्टान् कुरु। कृत्याकृतं च जहि। योऽस्मान् दिप्सति तमपि त्वं जहि॥२॥

भो देवाः! हिंसकनामस्त्रान् परित्वचः व्रणं कृत्वा पृथक् कुरु। यथा जनाः सुवर्णं प्रतिगृह्णन्ति तेनैव प्रकारेण सः कृत्याकृत्ययोः कृते मोहग्रस्तं भूत्वा तं स्वीकरोतु ॥३॥

हे दित्यौषधे! त्वं कृत्याकृत्ययोः कृते हस्तं गृहीत्वा परावर्तय तथा तां कृत्याकृत्ययोः कृते समक्षम् आ धेहि तथा कृत्यकृतं हनत्॥४॥

कृत्याकर्तॄणां कृते कृत्या भवेद् अभिशापदातॄणां कृते पुनः गच्छेत्॥५॥

**महत्वम्**

''वेदेषु सर्वं प्रतिष्ठितम्'' इत्यनेन वाक्येन तथा उपरोक्तवर्णनानुसारेण प्राच्यग्रन्थेषु वेदानामतिमहत्त्वं वर्णितमस्ति। वेदाः अपौरुषेयाः। यद्किमपि व्यवहारे दृश्यते तत् सर्वं वेदे प्रतिष्ठितं कृतमस्ति वेदपुरुषेण। विविधानि सूक्तानि सन्ति वेदेषु। सूक्तेषु संहितासु सर्वं ज्ञान परिलक्ष्यते। यथा वर्णितमस्ति अस्मिन् पाठे। राजकर्मसूक्तम्, स्त्रीसूक्तम् अभिचार सूक्तञ्च। प्राणिमात्रेभ्यः आवश्यकव्यवहारोपयोगिन्यः सामग्रयः वेदेषु निहिताः सन्ति। अतः एव वेदानां महत्त्वमतीवास्ति। वेदविहितकर्मैव धर्मः अन्यत् सर्वमधर्मः इति कथिमस्ति वेदेषु। अतः एव अकारणं वेदाध्ययनं कर्तव्यम्॥

## स्वाध्याय:

**१. योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) सूक्तशब्दस्य क: अर्थ: ?

(क) मन्त्रा: (ख) सूत्राणि (ग) तन्त्राणि (घ) स्तोत्रविशिष्टम्

(२) बृहद्देवताकार: सूक्तानि कति भागेषु विभजति ?

(क) सप्तभागेषु (ख) अष्टभागेषु (ग) चतुर्षुभागेषु (घ) पञ्चभागेषु

(३) ''यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता'' कस्य स्मृते: सूक्ति: अस्ति ?

(क) मनुस्मृते: (ख) याज्ञवल्यस्मृते: (ग) हारितस्मृते: (घ) पाराशरस्मृते:

(४) विवाहानन्तरं कस्या: सौभाग्यस्य प्राप्ति: भवति ?

(क) कन्याया: (ख) पुरुषस्य (ग) जनस्य (घ) ग्रामीणस्य

(५) रथाकाशे का त्रिवारं सूर्य इव पवित्रीकृता अस्ति ?

(क) आपाला (ख) विद्योतमा (ग) उषा (घ) उर्वशी

(६) राजकर्मसूक्ते क: शब्द: अतीवोत्तम: वर्तते ?

(क) सूक्तम् (ख) राजकर्म (ग) राजा (घ) मन्त्री

(७) मारणमोहनोच्चाटनादिमन्त्राणां वर्णनं कस्मिन् सूक्ते अस्ति ?

(क) राजकर्मसूक्ते (ख) अभिचारसूक्ते (ग) स्त्रीकर्मसूक्ते (घ) संवादसूक्ते

**२. एकेन वाक्येन उत्तरं लिखत।**

(१) क: धर्म: ? कश्च अधर्म: ?

(२) प्रत्यक्षाप्रत्यक्षज्ञानं कुत्र सम्भवति ?

(३) वेदा: कति सन्ति ?

(४) के मन्त्रद्रष्टार: सन्ति ?

(५) नारीत्वं प्राप्य कन्याया: कति प्रधानादर्शा: सन्ति ?

(६) वेदशब्दस्योत्पत्ति: केन धातुना भवति ?

(७) राजा शब्दस्य कोऽर्थ: ?

**३. द्वित्रैर्वाक्यै: उत्तरं लिखत।**

(१) सूक्तस्य अर्थं लिखत।

(२) नृपस्य आवश्यकता समाजे कथमस्ति ?

(३) स्त्रीकर्मसूक्ते वर्णित-अपालासम्बन्धिसूक्तं विलिख्य अर्थं लिखत।

(४) अभिचारसूक्ते वर्णितविषयस्य विषये लिखत।

**४. टिप्पणी लिखत।**

(१) सर्पविषनाशनम्। (२) कृत्यापरिहरणम्।

५. **संयोजनं कुरुत।**

| अ | ब |
|---|---|
| (१) वेदाः | (१) ऋषिः |
| (२) दीपनाद् दर्शनात् | (२) वशीकरणादिसंबधीसूक्तानि |
| (३) अभिचारसूक्ते | (३) अभिचारसूक्तम् |
| (४) यत्र नार्यस्तु पूज्यन्ते | (४) चत्वारः सन्ति |
| (५) अथर्ववेदस्य पञ्चमकाण्डे | (५) रमन्ते तत्र देवता |

**छात्रप्रवृत्तिः**

- अन्येषां सूक्तानां यथा पुरुषसूक्तम्, रुद्र सूक्तम्, श्रीसूक्तम् इत्यादीनां परिचयः प्राप्तव्यः।

**सुभाषितम्**

**न हायनै र्न चलितैर्न वितैर्न च बन्धुभिः।**

**ऋषयश्चक्रिरे धर्मम् योऽनूचानः स नो महान्।**

●

# २ द्वादश ज्योतिर्लिङ्गानि

**प्रस्तावना**

अस्माकं भारतीयसंस्कृतेः भारतीयानाञ्च द्वादश ज्योतिर्लिङ्गानि श्रद्धायाः विश्वासस्य च प्रतीकान्येवं प्राणभूतानि तीर्थानि सन्ति। प्रधानदेवतारूपेण भगवान् शिवः विराजते भारतभूमिः तीर्थभूमिरपि कथ्यते। अस्माकं भारतवर्षे बहूनि तीर्थानि सन्ति। तेषु तीर्थेषु द्वादशज्योतिर्लिङ्गाख्यानि तीर्थानि विश्वप्रसिद्धानि सन्ति। एतेषां दर्शनेन जनाः पापामुक्ताः भूत्वा शान्तिं प्राप्नुवन्ति। द्वादशज्योतिर्लिङ्गेषु ज्योतिर्लिङ्गत्रयस्य अभ्यासं कुर्मः।

## श्रीरामेश्वरम्



दक्षिणभारते पावनक्षेत्रे द्वादशज्योतिर्लिङ्गेषु उत्तमं श्रीरामेश्वरज्योतिर्लिङ्गमस्ति। इदं हि भारतस्य दक्षिणतटे पुराणप्रसिद्धं तीर्थं विराजते। इदं ज्योतिर्लिङ्गं तमिलनाडुराज्यान्तर्गत रामनाथपुरनामके जनपदे राराज्यमानं वर्तते। ऋग्वेद-स्कन्द-श्रीमद्भागवत-शिवपुराणेष्वपि अस्य ज्योतिर्लिङ्गस्य माहात्म्यं श्रूयते।

पुराणकथानुसारं रामः विजयप्राप्तये भगवन्तं शिवं पूजयामास। पूजनहेतवे रामः स्वहस्ताभ्यां वालुकानिर्मितं लिङ्गम् अस्थापयत्। तल्लिङ्गमेव रामेश्वरलिङ्गम् इति कथ्यते। रामस्य ईश्वरः (शिवः) इति समासाधारेण नाम सञ्जातमिति।

एका जनश्रुत्यनुसारं रामः रावणं हतवान्। परं रावणस्तु वेदज्ञः पुलस्त्यवंशोत्पन्नः आसीत्। अतः ब्रह्महत्यायाः पापयुक्तः भवति इति रामः मनसि विचिन्त्य प्रायश्चितार्थं शिवलिङ्गस्य स्थापनाम् अकरोत्। तल्लिङ्गम् एव रामेश्वरलिङ्गनाम्ना प्रसिद्धम् इति।

रामेश्वरस्थानं हिन्दमहासागरेण रक्षितं शंङ्खाकारस्य द्वीपः वर्तते। अत्रैव भगवान् रामः वानराणां साहाय्येन पाषाण-जनितं समुद्रे सेतुबन्धम् अकरोत्। अस्य सेतुबन्धस्य उपयोगेनैव रामः स्वसेनायुक्तः लङ्कां गत्वा सीतां प्राप्तवान् इति।

रामेश्वरमन्दिरं भारतीयनिर्माणकलायाः शिल्पकलायाः स्थापत्यकालायाश्च सर्वश्रेष्ठमुदाहरणमस्ति। प्रवेशद्वारं चत्वारिशंत् (४०) फूट-परिमितं विस्तृतमस्ति। मन्दिरेऽस्मिन् बहवः स्तम्भाः विद्यमानाः, तान् पश्यामश्चेत् परस्परं विशालाः अभिन्नाः एव अनुमीयन्ते। परं समीपम् आगत्य पश्यामश्चेत् परस्परं शिल्पकलातः भिन्नाः इव दृश्यन्ते।

मन्दिरमिदम् एकसहस्त्रं फूटपरिमितं लम्बमानम् एवं पञ्चाशदाधिकषड्शतं फूट विस्तृतम् अस्ति। विशालपाषाणैः मन्दिरमिदं निर्मितम् अस्ति। विद्वांसः भणन्ति यत् श्रीलङ्कादेशतः नौकाहाराः पाषाणान् आनीतवन्तः। तैःपाषाणैः मन्दिरमिदं रचितम् अस्ति।

श्रीरामेश्वरतीर्थे चतुर्विंशति (२४) कूपाः सन्ति। किंवदन्ती यत् चतुर्विंशति कूपजलेन स्नानेन सर्वपापविनिर्मुक्तः मानवः भवति। कूपानां निर्माणकार्यं स्वयं भगवता रामेण स्वीयेन बाणेन कृतम् इति विद्वांसः मन्यन्ते। श्रीरामेश्वरतीर्थे समीपे अपि रमणीयानि अन्यानि तीर्थानि सन्ति। यथा सेतुमाधवः, बाईसकुण्डः, कोदण्डस्वामी मन्दिरम्, सीताकुण्डः च इत्यादीनि तीर्थानि सन्ति।

### वैशिष्ट्यम्

श्रीरामेश्वरमहादेवस्य यः कोऽपि जनः गङ्गाजलेन अभिषेकं विधास्यति सः जनः जन्ममरण-चक्रात् मुक्तः भूत्वा परमपदं प्राप्स्यति। अस्य ज्योतिर्लिङ्गस्य वर्णनं महत्त्वञ्च बहूभिः पुराणैः वेदैश्च प्रकटितम् इति। रामेश्वरस्य उत्तरदिशि गन्धमादननामकपर्वतः वर्तते, ततः पर्वते हनुमान् समुद्रलङ्घनार्थं कूर्दितवान्। पश्चात् भगवान् रामः अस्मिन्नेव पर्वते विशालवानर-सेनायाः सङ्गटनम् अकरोत्।

पर्वतेऽस्मिन् एकम् सुन्दरं मन्दिरम् अस्ति। तत्र भगवतः श्रीरामस्य पादचिह्नानाम् पूजनं भवति। अतः तन्मदिरं पादुकामन्दिरम् इति नाम्ना प्रसिद्धम्।

श्रीरामेश्वरज्योतिर्लिङ्गं भक्तानाम् इप्सितकार्याणां सिद्धताम् अर्पयति। अस्य ज्योतिर्लिङ्गविषयकं वर्णनं यथा -

**सुताम्रपर्णीजलराशियोगे**
**निबद्धसेतुं विशिखैरसङ्ख्यैः।**
**श्रीरामचन्द्रेण समर्पितं तं**
**रामेश्वराख्यं नियतं नमामि॥**

**श्रीनागेश्वरम्**



गुर्जरराज्ये सौराष्ट्रे द्वारिकानगर्याः समीपे ज्योतिर्लिङ्गम् इदं विराजते। ज्योतिर्लिङ्गमतीव सुन्दरम् एवं प्रसिद्धं वर्तते। ज्योतिर्लिङ्गस्य विषये एका कथा श्रूयते यत् सुप्रियनामकः कश्चन धर्मात्मा सदाचारी वैश्यः आसीत्। सः महान् शिवभक्तः आसीत्। भगवतः शिवस्य आराधनां कृत्वैव सर्वाणि कार्याणि करोति स्म। सुप्रियस्य शिवभक्तिं दृष्ट्वा दारुकनामकः राक्षसः कुप्यति स्म। दारुकः अनेकप्रकारैः शिवभक्तम् अशिक्षयत्। एकदा नौकायां यात्रां कुर्वन्तः सुप्रियादिजनाः आसन्। तदा दारुकः सर्वान् जनान् बन्दिगृहम् अक्षिपत्। तत्रापि सुप्रियस्य शिवभक्तिः शिथिला नाभवत्। एकस्मिन् दिने कारागारवासिभ्यः सुप्रियः शिवभक्तिविषयकं ज्ञानं दत्तवान्। तच्छ्रुत्वा दारुकराक्षसः आदिष्टवान् यत् सुप्रियाय मृत्युदंण्डं देहि। मृत्युदण्डावसरे भगवान् शिवः प्रसन्नः जातः शिवः सिंहासने ज्योतिर्स्वरूपः विद्युद् इव प्रकाशमानः आसीत्। तत्स्वरूपमेव ज्योतिर्लिंगत्वेन स्वीक्रियते। ततः पाशुपतास्त्रं सुप्रियाय शिवः दत्तवान्। तेन शस्त्रेण सुप्रियः दारुकं हतवान्। ततः सुप्रियः शिवपदं प्राप्तवान्। शिवस्यादेशेनैव अस्य ज्योतिर्लिङ्गस्य नाम नागेश्वरम् इति निर्धारितम्।

नागेश्वरलिङ्गं मनोहरं दिव्यञ्चास्ति। नागेश्वरमंदिरे भगवतः शिवस्य पद्मासनमुद्रायुक्ता विशाला मूर्तिः राजते।

नागेश्वरस्य गर्भगृहं सभामण्डपस्य अधः स्थाने स्थितम् एवं तस्योपरि रजतस्यावरणं सुसज्जम् अस्ति। नागोऽपि रजतस्यैव विद्यते। प्रातः पञ्चवादने नीराजनं, सायं सप्तवादने सायंकालिकम् आरार्तिक्यं सम्पाद्य रात्रौ नववादने मन्दिरपिधानं भवति।

नागेश्वरज्योतिर्लिङ्गस्य उल्लेखः विविधपुराणेषु कृतः। विशेषेण शिवपुराणे दृश्यते।

**एतत् यः श्रृणुयान्नित्यं**
**नागेशोद्भवमादरात्।**
**सर्वान् कामानीयाद् धीमान्**
**महापातकनाशनम्॥**

नागेश्वरज्योतिर्लिङ्गस्य कथाश्रवणेन तदाराधनेन जीवः शिवः भूत्वा पातकात् विमुच्य पुण्यशाली भवति।

**वैशिष्ट्यम्**

श्रीनागेश्वरज्योतिर्लिङ्गमिदं प्रकृतितः आवृत्तम् अस्ति। अस्य ज्योतिर्लिङ्गस्य दर्शनेन जनाः सर्वपापात् मुक्ताः भूत्वा शिवपदं प्राप्नुवन्ति। इत्थं मन्यते यत् श्रावणमासे शिवलिङ्गस्य यः पूजनं विधास्यति तस्य सप्तजन्मकृत-पापानां क्षयः भवति शिवपदञ्च प्राप्नोति। उक्तं द्वादशज्योतिर्लिङ्गस्तोत्रे -

**याम्ये सदङ्गे नगरेऽतिरम्ये**
**विभूषिताङ्गं विविधैश्च भोगैः।**
**सद्भक्तिमुक्तिप्रदमीशमेकं**
**श्रीनागनाथं शरणं प्रपद्ये॥**

**श्रीविश्वनाथः**



द्वादशज्योतिर्लिङ्गेषु अत्यन्तं प्रसिद्धं विश्वनाथज्योतिर्लिङ्गमस्ति। उत्तरप्रदेशराज्यस्य वाराणसीजनपदान्तर्गत- काशीनगरे काशीविश्वनाथमन्दिरं विशिष्टं स्थानं धारयति। इत्थं श्रूयते यद् गङ्गास्नानेन मुक्तिः तथा च विश्वनाथदर्शनेन जीवः मोक्षपदं प्राप्नोति। आदिशङ्कराचार्यः, संत एकनाथः, रामकृष्ण परमहंसः, स्वामी विवेकानंदः, महर्षि दयानंदः, गोस्वामी तुलसीदासादिमहापुरुषाः अस्य ज्योतिर्लिङ्गस्यदर्शनं चक्रुः।

किंवदन्ती यत् शिवशक्त्योः विवाहानन्तरं शिवः शक्तिसहितः कैलाशपर्वतम् आगतवान्। तत्र पार्वत्या वृक्षाः पर्वताश्च दृष्टाः, अतः तस्याः मनः खिन्नमभवत्। एतादृशीं खिन्नमनां पार्वतीं शिवः काशीपुरम् आनीतवान् ततः तत्रैव निवासम् अकुरुताम्। ततः भगवान् शिवः सिद्धनाथनाम्ना प्रसिद्धः अभवत्।

पुरा विश्वनाथमन्दिरं लघु आसीत्। सप्तदशशताब्द्याम् (१७) इन्दौरराज्ञी अहल्याबाई होल्करः मन्दिरस्य निर्माणं कृतवती। ततः राजा रणजीतसिंहः शिखरं सुवर्णयुक्तं कृतवान्। अतःइदं मंन्दिरं स्वर्णमन्दिरं (Golen temple) इति नाम्ना प्रसिद्धम् अस्ति।

गङ्गातटस्थं विश्वनाथमन्दिरम् अनेकैः देवालयैः पीठैश्च सन्नद्धं वर्तते। मन्दिरस्य उत्तरदिशि कूपः ज्ञानवापी संज्ञायुक्तः वर्तते। विश्वनाथमन्दिरस्य अन्तभागे एकं गर्भगृहं सभामण्डपं च विद्यते। गर्भगृहे रजतधातुना वेष्टित-विशालशिवलिङ्गम् अस्ति। शिवलिङ्गमिदं कृष्णपाषाणेन निर्मितम् अस्ति।अस्य ज्योतिर्लिङ्गस्य परिसरं व्यापकं नास्ति परन्तु वातावरणं शिवमयम् अवश्यं वर्तते।

विश्वनाथदेवालये शिवेन सह शक्तिरपि विद्यते। अद्भुतमिदं शिवशक्त्योः समन्वितरूपं विश्वस्मिन् कुत्रापि न दृश्यते। विश्वनाथदेवालयस्य प्रमुखानि चत्वारि द्वाराणि सन्ति। तद्यथा शातिद्वारम्, कलाद्वारम्, प्रतिष्ठाद्वारम्, निवृत्रिद्वारम् च।

विश्वनाथस्य आरार्तिक्यं प्रातः त्रिवादनतः चतुर्वादनपर्यन्तं चलति। तत्पश्चात् चतुर्वादनात् एकादशवादनपर्यन्तं दर्शनार्थिनां कृते द्वारम् उद्घाटितम् एव भवति। रात्रौ सार्धदशवादने आरार्तिक्यं भवति। एकस्मिन् दिने चतुर्वारम् आरार्तिक्यं जायते।

**वैशिष्ट्यम्**

सर्वेषु ज्योतिर्लिङ्गेषु ज्योतिर्लिङ्गमिदं विशिष्टं स्थानं मानं च भजते। इत्थं मन्यते यद् वाराणसीक्षेत्रे काशीक्षेत्रे वा यस्य मृत्युः भवति तस्मै मुक्तिप्रदानाय भगवान् शिवः तारकमन्त्रस्योपदेशं कृत्वा मोक्षं ददाति। विश्वनाथस्य ज्योतिर्लिङ्गविषये उक्तं च -

**सानन्दमानन्दवने वसन्त -**
**मानन्दकन्दं हतपापवृन्दम्।**
**वाराणसीनाथमनाथनाथं**
**श्रीविश्वनाथं शरणं प्रपद्ये॥**

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) भारतीयसंस्कृतेः कति ज्योतिर्लिङ्गानि ?

(क) द्वादश (ख) त्रयोदश (ग) एकादश (घ) नव

(२) श्रीरामेश्वरज्योतिर्लिङ्गं कस्मिन् तटे वर्तते ?

(क) दक्षिणे (ख) उत्तरे (ग) पश्चिमे (घ) पूर्वे

(३) सदाचारी धर्मात्मा कः आसीत् ?

(क) दारुकः (ख) सुप्रियः (ग) भानुप्रियः (घ) विजयः

(४) नागेश्वरज्योतिर्लिङ्गस्य शिवस्य आसनमुद्रा काऽस्ति।

(क) वज्रासन (ख) पद्मासन (ग) सिंहासन (घ) चर्मासन

(५) कः राजा सुवर्णयुक्तं शिखरं कृतवान्?

(क) भावसिंहः (ख) रणजीतसिंहः (ग) शक्तिसिंहः (घ) विक्रमसिंहः

(६) विश्वनाथज्योतिर्लिङ्गं केन पाषाणेन निर्मितम् अस्ति?

(क) कृष्णेन (ख) हरितेन (ग) श्वेतेन (घ) रक्तेन

(७) तारकमन्त्रस्योपदेशं कः कृतवान्?

(क) सुप्रियः (ख) दारुकः (ग) शिवः (घ) रामः

**२. एकेन वाक्येन उत्तरं लिखत।**

(१) श्रीरामेश्वरलिङ्गं कस्मिन् राज्ये विद्यते ?

(२) रावणस्य कः वंशः आसीत् ?

(३) 'सुप्रियाय मृत्युदण्डं देहि' इति कः अवदत् ?

(४) कस्यां शताब्द्यां विश्वनाथज्योतिर्लिङ्गं निर्मापितम् ?

(५) विश्वनाथज्योतिर्लिङ्गस्य कति द्वाराणि सन्ति ?

(६) विश्वनाथज्योतिर्लिङ्गे दिने कतिवारम् आरार्तिक्यं भवति ?

**३. द्वित्रैर्वाक्यैः उत्तरं लिखत।**

(१) रामः विजयप्राप्त्यै किम् अकरोत् ?

(२) सुप्रियः कीदृशः ? कस्य भक्तः आसीत् ?

(३) विश्वनाथज्योतिर्लिङ्गस्य स्वरूपं कीदृशम् आसीत् ?

**४. सविस्तरेण उत्तरं लिखत।**

(१) नागेश्वरलिङ्गस्थापनाविषये लिखत।

(२) दारुकवधप्रसङ्गं विस्तरेण विवृणुत।

(३) रामेश्वरज्योतिर्लिङ्गस्य वैशिष्ट्यं प्रतिपादयत।

**५. टिप्पणी लेख्या।**

(१) श्रीरामेश्वरज्योतिर्लिङ्गम्।

(२) विश्वनाथज्योतिर्लिङ्गम्।

**छात्रप्रवृत्तिः**

- अधीतज्योर्तिर्लिङ्गानां पुराणकथाः आख्यानानि वा पठनीयानि।

**सुभाषितम्**

**महादेव महादेव महादेवेति यो वदेत्।**
**एकेन मुक्तिमाप्नोतिद्वाभ्यां शम्भु ऋणी भवेत्॥**

●

# ३ प्राच्यग्रन्थपरिचयः ( रामायणं महाभारतं च )

**प्रस्तावना**

अस्माकं भारतीयसंस्कृतौ बहवः प्राच्यग्रन्थाः वर्तन्ते। तेषु रामायणं महाभारतं च भारतीयसंस्कृतेः आधारभूतौ ग्रन्थौ मन्येते। अनयोः अपारोऽलौकिकः ज्ञाननिधिः वर्तते। सामाजिकव्यवहारिकवैज्ञानिकधार्मिकजीवनस्य उत्तमं ज्ञानमत्र प्रत्यक्षमनुभूयते। मानवैः स्वजीवनं कथं व्यवहर्तव्यम् इति ज्ञानमत्र सन्निहितमस्ति। अनयोः ग्रन्थयोः माहात्म्यं यावदपि कुर्मः तावदपि न्यूनमेव भविष्यति। तथापि यावच्छक्यं बोधगम्यं स्यात् तावदत्र पठिष्यामः, यदि रामायणमहाभारतजनितज्ञानस्यानुपालनं करिष्यामः तर्हि अवश्यमेव जीवनं धन्यं भविष्यति।

---

**रामायणम्**




रामस्य अयनम् इति रामायणम् अर्थात् भगवतः श्रीरामचन्द्रस्य निवासस्थानचरितवर्णनञ्च यत्र सुविराजते तदेव रामायणं कथ्यते। रामायणम् आदिमहाकाव्यमस्ति। तस्य रचयिता महाकविः श्रीवाल्मीकिः आदिकविरिति जनश्रुतिरतीव सुप्रसिद्धा। तथापि साम्प्रतं भारतदेशे अनेकभाषासु रचितानि रामायणमहाकाव्यानि दृश्यन्ते प्राप्यन्ते च। तेषु रामायणेषु सर्वाधिकलोकप्रियं गोस्वामितुलसीदासरचितं रामचरितमानसं प्रवर्तते। प्रमाणभूतं प्रसिद्धं च रामायणं श्रीवाल्मीकिरामायणम् अस्ति। रामायणस्य प्रशंसायां श्रीत्रिविक्रमभट्टकविना अयं श्लोकः प्रोक्तोऽस्ति।

**सदूषणाऽपि निर्दोषा सखरापि सुकोमला।**
**नमस्तस्मै कृता येन रम्या रामायणी कथा॥**

एतन्महाकाव्यं सप्तसु काण्डेषु विभक्तम् अस्ति। प्रतिकाण्डे निम्नाङ्किताः सर्गाः श्लोकाः च सन्ति।

संस्कृतवाङ्मये आदिकविना लिखितं रामायणम् अत्युत्कृष्टः महाग्रन्थः वर्तते। अस्मिन् (काण्डाः) सर्गाः, श्लोकाः च सन्ति। तेषु सूर्यवंशस्य रघुकुलोत्पन्नभगवतः श्रीरामस्य गाथा वर्णिता अस्ति।

अष्टादशपुराणेषु प्रायः प्रतिपुराणं रामकथा प्रवर्तते एव। तत्र सर्वेषु पुराणेषु भगवतः रामस्य जीवनगाथासु, वैविध्यं पार्थक्यं च दृश्यते।

**उक्तञ्च - चरितं रघुनाथस्य शतकोटिप्रविस्तरम्**
**एकैकमक्षरं पुसां महापातकनाशनम्॥**

रामरक्षास्तोत्रम्

| क्रमः | काण्डनामानि | सर्गसंख्या | श्लोकसंख्या |
|---|---|---|---|
| १. | बालकाण्डः | ७७ | २२७० |
| २. | अयोध्याकाण्डः | ११९ | ४३०४ |
| ३. | अरण्यकाण्डः | ७५ | १६७१ |
| ४. | किष्किन्धाकाण्डः | ६७ | २४४७ |
| ५. | सुन्दरकाण्डः | ६८ | २८६९ |
| ६. | लङ्काकाण्डः (युद्धकाण्डः) | १२८ | ५८०३ |
| ७. | उत्तरकाण्डः | १११ | ३८५९ |

इत्थमुपरिनिर्देशानुसारेण आहत्य पञ्चत्रिंशदधिकषट्शतं सर्गाः सन्ति। एतेषु सर्गेषु आहत्य चतुर्विंशतिसहस्त्रपरिमिताः श्लोकाः सन्ति।

रामायणस्य उपजीव्यकाव्यानि नाटकानि च उदाह्रियन्ते।

क. कालिदासस्य रघुवंशमहाकाव्यम्।

ख. भासस्य प्रतिमानाटकम्।

ग. भट्टि – महोदयस्य भट्टिकाव्यम्।

घ. मुरारिकवेः अनर्घराघवम्।

ङ. भवभूतेः उत्तररामचरितं महावीरचरितम् च।

च. दिङ्नागस्य कुन्दमाला।

छ. क्षेमेन्द्रस्य रामायणमञ्जरी।

ज. भोजराजस्य रामायणम्।



अस्य महाकाव्यस्योद्भवः शोकात् करुणरसाद् अभवत्। एकदा वाल्मीकिः तमसानद्यां स्नात्वा बहिरागच्छन्नासीत्। तदा तेषां समक्षमेकमद्भुतं दृश्यमुपतस्थे। एकस्मिन् वृक्षे क्रौञ्चमिथुनं क्रीडां कुर्वन्नासीत् तदानीमेवैकेन व्याधेन बाणप्रहारेण पुरुषक्रौञ्चोऽहन्यत्। तदानीं क्रौञ्ची करुणापूर्णं रुदन्ती आसीत्। यतो हि अधः पतितः क्रौञ्चः पञ्चत्वं गतः। इमां घटनामवलोक्य ऋषेः चेतसि समुद्भूतः शोकः श्लोकत्वमवाप।

**मा निषाद! प्रतिष्ठां त्व –**
**मगम शाश्वती समाः।**
**यत्क्रौञ्चमिथुनादेक –**
**मवधीः काममोहितम्॥**

छन्दोबद्धमिदं पद्यं वाल्मीकेः मुखान्निःसृतम्। अस्य महाकाव्यस्य अन्तोऽपि करुणापूर्णदृश्यादेव भवति। यदा रामस्य समक्षं सीता धरण्याः अङ्के समाहिता भवति तत्रैव रामायणस्य समाप्तिर्भवति। अतः अस्य महाकाव्यास्यारम्भः शोकमयदृश्याद् समाप्तिरपि शोकमयदृश्यादेव भवति। रामायणे यथा स्थानं सर्वेषामपि रसानाम् अभिव्यक्तिः अवलोक्यते।

कथितं च

**हास्यशृंगारकारुण्य रौद्रवीरभयानकैः।**
**बीभत्साद्भुतसंयुक्तं काव्यमेतदगायताम्॥**

काव्यदृष्ट्या धीरोदात्तनायकः आदर्शपुरुषः मर्यादापुरुषोतमः महापुरुषश्च। श्रीरामः संकटसमयेऽपि दुःखं नानुभवति, राजाधिराजो भूत्वापि स्वकर्तव्यं प्रजाप्रेम न विस्मरति। भयङ्करपरिस्थित्यामपि सः निजमर्यादायाः सदाचारस्य च सम्यक् पालनं करोति। भारतवर्षे महान् आदर्शपुरुषः शीलवान् जनः यदि द्रष्टव्यः स्यात् तर्हि उदाहरणरूपेण श्रीरामः एव प्रस्तुतः भवति। श्रीरामः क्षमावान् परोपकारी गुणज्ञः कृतज्ञश्च वर्तते। आदिकविः लिखति यत् –

**कथञ्चिदुपकारेण कृतैनेकेन तुष्यति।**
**न स्मरत्यपकाराणां शतमप्यात्मवत्तया॥** (रामा० – २ – १ – ११)

असौ तावान् प्रभावशाली आसीत् – यदा असौ क्रुध्यति, तदा तस्यात्मबोधप्रभावो दृश्यते –

**''नास्य क्रोधः प्रसादो वा निर्वादोऽस्ति कदाचन।**
**हन्त्येष नियमाद् बध्यान् अवध्येषु न कुप्यति''॥** (रामा० – २ – २ – ४६)

तस्य स्वभावः मधुरः सर्वदा ददाति न प्रतिगृह्णाति

**दद्यान्न प्रतिगृह्णीयान्न ब्रूयात्किञ्चिदप्रियम्।**
**अपि जीवितहेतोर्वा रामः सत्यपराक्रमः॥** (रामा० – १ – ३३ – ३६)

महाकाव्यमिदं गायत्रीमन्त्रवदेव परमपावनतां बिभर्ति स्म। यथा वैदिकवाङ्मये गायत्रीमन्त्रः बुद्धिवर्धकः शान्तिदायकश्च विद्यते तथैव लौकिकसाहित्ये रामायणमपि बुद्धिशोधकं मनश्शान्तिदायकं च वर्तते। उक्तञ्च –

**रामायणं नाम परं तु काव्यं**
**सुपुण्यदं वै शृणुत द्विजेन्द्राः।**
**यस्मिन्ब्रूते जन्मजरादिनाशो**
**भवत्यदोषः स नरोऽच्युतः स्यात्॥**

### महाभारतम्




भारतीयसंस्कृतेः अमरः कीर्तिस्तम्भूतः ग्रन्थः 'महाभारतम्' वर्तते। महाभारतं पञ्चमः वेदः इत्युच्यते। अस्मिन् महाग्रन्थे मानवजीवनस्य सर्वविधसमस्यानां समाधानं विद्यते, 'यन्न भारते तन्न भारते' अर्थात् भारतवर्षे यत्किमपि लौकिकम्, सामाजिकम्, आर्थिकम्, वैज्ञानिकम्, तत्वभूतम्, सारभूतं वर्तते। तत्सर्वं महाभारताख्ये ग्रन्थे वर्णितं वर्तते, यत् महाभारते वर्णितं नास्ति तद् भारतदेशेऽपि नास्ति।

**धर्मे ह्यर्थे च कामे च मोक्षे च भरतर्षभ।**
**यदत्रास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥**
महाभारत० – १ – ६२ – ४३

एकदा यमुनानद्याः पारं गन्तुं मत्स्यगन्धायाः नावि उपविश्य पराशराख्यः तपस्वी गच्छन्नासीत् तदा मत्स्यगन्धायाः रूपयौवनोपरि आकृष्य कामातुरः भूत्वा पराशरस्य सङ्गमोऽभवत्। तत्पश्चात् सद्य एव यमुनायाः द्वीपमध्ये सा मत्स्यगन्धा रूपतेजस्विनं बालकं सुषुवे। बालोऽयं त्वरितम् उत्थाय मातरं ववन्द। ततः मातुराज्ञां स्वीकृत्य हिमवतः बदरीवने नैकसहस्त्रवर्षपर्यन्तं तपश्चकार। सः बालः द्वैपमध्ये जन्मवशाद् द्वैपायनं कथ्यते। कृष्णवर्णत्वात् 'कृष्णद्वैपायन' अभिधानं प्राप्तः। महर्षिव्यासः महाभारतस्य प्रणेताऽस्ति। सोऽयं महर्षिः पाराशर्यः, वेदव्यासः, कृष्णद्वैपायनः, सत्यवतीसुतः इत्यादिनाम्ना प्रसिद्धः इति। पितुः नाम महर्षिः पराशरः जननी सत्यवती आसीत्।

भारतीयसाहित्यस्य गौरवं खलु महाभारतम्। महाशब्देन अस्य महत्वं भारतशब्देन च अस्य भारतीय – इतिहास धर्म – दर्शन संस्कृतिनिधानत्वं सूचितं भवति। अर्थात् – संस्कृतवाङ्मयस्य सारभूतम् इदं महाभारतम्। अतः महाभारतं पञ्चमः वेदः इत्युच्यते। महाभारतं न केवलं आकृत्यैव विशालतां धारयति, अपितु विषयवैशिष्ट्येन अर्थगौरवेण च अपि इदं स्वकीयमहत्तां पुष्णाति। सर्वत्र अस्मिन् ग्रन्थे वैष्णवसिद्धान्तानां प्रमुखत्वेन प्रतिपादनात् महाभारतं वैष्णवस्मृतिः अपि कथ्यते। अतः उक्तं 'महत्त्वात् भारवत्त्वाच्च महाभारतमुच्यते।' महाभारतस्य प्रमुखसन्देशः **'यतो धर्मस्ततोजयः'** इति रूपेण प्रतिपादितः। यत्र मानवजीवनरूपः सारः एव वर्तते। अस्य सिद्धान्तः निष्कामकर्म विद्यते। यथोक्तं गीतायाम्, **'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन'** महाभारते विविधमन्त्राणां ज्ञानविज्ञानानां धर्मश्रौतगृह्यसूत्राणां शास्त्रीयतथ्यानां स्मृतीनाञ्च दर्शनपुराण–कला शिल्पादीनां काव्य – नाटक – उपन्यासप्रभृतीनां समायोजनं विहितमस्ति। महाभारतं भारतीयसभ्यतायाः संस्कृतेश्च स्वरूपबोधनाय ग्रन्थरत्नमिदम् आवश्यकमस्ति। भगवद्गीता – विष्णुसहस्त्रनाम – अनुगीता – भीष्मस्तवराज–गजेन्द्रमोक्ष–संज्ञकं च रत्नप्रदानादेव महाभारतं पञ्चमः वेदः कथ्यते। महाभारते एकलक्ष्यात्मकश्लोकाः सन्ति। अयं ग्रन्थः शतसाहस्री संहिता कथ्यते। अस्य महाग्रन्थस्य पर्वनाम्ना प्रकारेण विभाजनं कृतम् अस्ति।

(१) आदिपर्व (२) सभापर्व (३) वनपर्व (४) विराटपर्व (५) उद्योगपर्व (६) भीष्मपर्व (७) द्रोणपर्व (८) कर्णपर्व (९) शल्यपर्व (१०) सौक्तिपर्व (११) स्त्रीपर्व (१२) शान्तिपर्व (१३) अनुशासनपर्व (१४) अश्वमेधपर्व (१५) आश्रमवासिकपर्व (१६) मौसलपर्व (१७) महाप्रस्थानिकपर्व (१८) स्वर्गारोहणपर्व।

अस्मिन् ग्रन्थे चन्द्रवंशस्य विस्तृतेतिहासः कौरवपाण्डवानां उत्पत्तिः, तेषां धर्मयुद्धं भीष्मादिमहापुरुषाणां दिव्यचरितानि वर्णितानि सन्ति। अपि चात्र सुप्रसिद्धानि उपाख्यानि वर्णितानि सन्ति। येषां श्रवणेन (श्रवणपुटपानेन) जीवनं धन्यं पवित्रञ्च भवति। यथा – आदिपर्वणि - शाकुन्तलोपाख्यानम्, वनपर्वणि - मत्स्योपाख्यानम्, रामोपाख्यानम्, शिब्युपाख्यानम्, सावित्र्युपाख्यानम्, नलोपाख्यानाम् च वर्तन्ते।

मुख्यकथानकं चन्द्रवंशस्य मूलपुरुषात् आरभ्य जन्मेजयपर्यन्तं विविधोपाख्यानानि वर्णितानि सन्ति। अतः एव महाभारतस्य गुण–गौरवं समीक्ष्य वेणीसंहारे भट्टनारायणः कथयति यत् –

**श्रवणाञ्जलिपुटपेयं विरचितवान् भारताख्यममृतं यः तमहमरागमकृष्णं कृष्णद्वैपायनं वन्दे॥** (वेणीसंहार – १/४)

महाभारते अर्थशास्त्रधर्मशास्त्रकामशास्त्राण्यपि विद्यन्ते।

**अर्थशास्त्रमिदं प्रोक्तं धर्मशास्त्रमिदं महत्।**

**कामशास्त्रमिदं प्रोक्तं व्यासेन मितबुद्धिना॥**

महाभारतानन्तरं श्रीमद्व्यासः अष्टादशपुराणानि रचयामास। असौ यावद् भारतीयसाहित्यं रचितवान् तावन्न केनाप्यद्यावधि रचितम्, तत्साहित्यं मानवानामतीवोपकाराय अभवत्। इत्थं मन्यते यद् व्यासस्य जन्म आषाढ़मासे शुक्लपूर्णिमायाम् अभवत्। तेन कारणेन तद्दिनं व्यासपूर्णिमा गुरुपूर्णिमारूपेण मन्यते।

एवं विज्ञायते यत् महाभारतं सर्वप्रधानकाव्यम् सर्वदर्शनानां सारप्रतिपादकं महाभारतम् इति।

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) आदिकविः कोऽस्ति?

(क) व्यासः (ख) वाल्मीकिः (ग) तुलसीदासः (घ) कालिदासः

(२) आदिकाव्यं किमस्ति?

(क) महाभारतम् (ख) रघुवंशम् (ग) रामायणम् (घ) मेघदूतम्

(३) रामायणे कति काण्डानि सन्ति?

(क) षड् (ख) सप्त (ग) अष्ट (घ) नव

(४) बालकाण्डे कति सर्गाः सन्ति?

(क) सप्तसप्ततिः (ख) सप्तषष्टिः (ग) पञ्चससप्ततिः (घ) षड्सप्ततिः

(५) रामायणे मुख्य नायकः कः?

(क) रामः (ख) रावणः (ग) भरतः (घ) लक्ष्मणः

(६) महाभारतस्य रचयिता कः?

(क) गणेशः (ख) वाल्मीकिः (ग) वेदव्यासः (घ) भारविः

(७) पञ्चमो वेदः कः?

(क) रामायणम् (ख) श्रीमद्भगवद्गीता (ग) महाभारतम् (घ) भागवतम्

(८) महाभारते कति पर्वाणि सन्ति?

(क) षोडश (ख) सप्तदश (ग) नवदश (घ) अष्टादश

(९) शतसाहस्त्री कस्य ग्रन्थस्य अपरं नाम वर्तते?

(क) भागवतम् (ख) महाभारतम् (ग) रामायणम् (घ) रघुवंशम्

**२. एकेन वाक्येन उत्तरं लिखत।**

(१) रामायणस्य आरम्भः एवं समाप्तिः कया रीत्या भवति?

(२) अयोध्याकाण्डे कति सर्गाः सन्ति?

(३) रामायणे कति श्लोकाः सन्ति?

(४) वाल्मीकिः कस्य ग्रन्थस्य रचयिता अस्ति?

(५) रामायणे कस्य गाथा वर्णिताऽस्ति?

(६) महाभारते कति श्लोकाः सन्ति?

(७) श्रीमद्‌भगवद्‌गीता कस्मिन् ग्रन्थे वर्णिताऽस्ति?

(८) पुराणानि कति?

**३. द्वित्रिर्वाक्यैः उत्तरं लिखत।**

(१) रामायणे कति काण्डानि सन्ति? तेषां नामानि लिखत।

(२) महाभारते कति पर्वाणि सन्ति? तेषां नामानि लिखत।

(३) अयोध्याकाण्डस्य सर्ग-संख्यां श्लोकसंख्यां च लिखत।

**४. टिप्पणी लेख्या।**

(१) रामायणम्।

(२) महाभारतम्।

**५. योग्यसंयोजनं कुर्वन्तु।**

| अ | ब |
|---|---|
| (१) रामायणम् | एकलक्षम् |
| (२) महाभारतम् | अष्टषष्टिः |
| (३) बालकाण्डः | चतुर्विंशतिः |
| (४) सुन्दरकाण्डः | सप्ततिः। |

**६. सविस्तरेण उत्तरं लिखत।**

(१) रामायणस्य वैशिष्ट्यं प्रतिपादयत।

(२) वेदव्यासस्य परिचयं यच्छत।

**छात्रप्रवृत्तिः**

- महाभारतरामायणाभ्यां दशश्लोकाः कण्ठस्थीकर्तव्याः।
- रामायणमहाभारतयोः समयानुसारं पठनं कर्तव्यम्।

**सुभाषितम्**

**सद्विद्या यदि का चिन्ता वराकोदरपूरणे।**
**शुकोऽप्यशनमाप्नोति राम रामेति चाब्रुवन्॥**

●

# ४ संस्कृतकविपरिचयः

**प्रस्तावना**

नाटकं काव्यं च संस्कृतसाहित्यस्य गौरवपूर्णम् अङ्गमस्ति। येन अस्य कीर्तिकौमुदी विश्वऽस्मिन् जाज्वल्यमाना अस्ति। संस्कृतकाव्येषु नाटकानां श्रेष्ठत्वम् अस्ति। नाटकानां काव्यानां रम्यत्वं स्वानुभूत्या एव प्रकटीभवति। नाटकेषु अभिनयप्रदर्शनात् तथा काव्यपठनात् न केवलं साहित्यरसिकानाम् एव आनन्दानुभूतिर्जायते किन्तु ये नीरसाः तेषामपि रसप्राप्तिर्जायते। अतः अस्मिन् प्रकरणे नाट्यकाराणां कवीनां च विषये विस्तरेण वर्णनं कृतमस्ति।

---

## भवभूतिः



वयं सर्वे जानीमः यत् संस्कृतसाहित्ये अनेके नाट्यकाराः अभवन्। तेषु नाट्यकारेषु भवभूतिः उत्तमः नाट्यकारः वर्तते। वस्तुतः नाट्यदर्शनेन अस्माकं जीवने उत्तमगुणानां विकासः भवति।

जीवनपरिचयः - महावीरचरितं नाटके भवभूतेः परिचयः प्रदत्तोऽस्ति। येन ज्ञायते यद् भवभूतिः विदर्भदेशस्य पद्मपुरनगरस्य निवासी आसीत्। भवभूतेः पितुः नाम नीलकण्ठः एवं मातुः नाम जातुकर्णी आसीत्। भवभूतेः पूर्वजाः सदाचारिणः च वेदाध्यायिनः आसन्। भवभूतिः कृष्णयजुर्वेदस्य तैत्तरीय शाखाध्यायी काश्यपगोत्रीयः ब्राह्मणः आसीत्। भवभूतेः पूर्वजाः वेदादिशास्त्रेषु पारंगताः आसन्। तेषां गुरोः नाम ज्ञाननिधिः आसीत्।

समयः - यथा सर्वेषां प्राच्यनाट्यकाराणां कालगणनानिर्धारणे काठिन्यं जायते, किन्तु भवभूतेः विषये तथा नास्ति। बाणभट्टेन हर्षचरितस्यारम्भे प्रसिद्धनाट्यकाराणाम् उल्लेखः कृतः, किन्तु भवभूतेः उल्लेखः नः कृतः। अनेन ज्ञायते भवभूतिः बाणस्य परवर्ती आसीत्। काव्यालङ्कारग्रन्थेन ज्ञायते यत् भवभूतिः ७५० ई.पू. पूर्ववर्ती आसीत्। यथा वाक्यातिराजेन ''गऊडवहो'' नाम्नः प्राकृतकाव्ये लिखितं यत्। **''भवभूतिजलनिधिर्गतकाव्यामृत इव रसकणा इव स्फुरन्ति यस्य विशेषा अद्यापि विकटेषु कथा निवेशेषु''**।

एतेन ज्ञायते यत् भवभूतेः कालः अष्टमशताब्द्याः पूर्वार्द्धः वर्तते।

कृतयः - महाकवेः भवभूतेः रचनात्रयं इदानीं समुपलभ्यते। यथा मालतीमाधवम्, महावीरचरितम्, उत्तररामचरितञ्च।

**उत्तररामचरितम्** -

''**उत्तरे रामचरिते भवभूर्तिविशिष्यते**''। इति सूक्त्यनुसारं त्रिषु नाटकेषु उत्तररामचरितस्य वैशिष्ट्यं वर्तते। उत्तररामचरिते सप्ताङ्काः सन्ति। नाटकेऽस्मिन् रामायणोत्तरकाण्डगता कथा वर्णिताऽस्ति। यथोक्तं यत् -

**''एको रसः करुण एव निमित्तभेदाद्**
**भिन्नः पृथग् पृथगिवाश्रयते विवर्तान्।**
**आवर्तबुद्बुदध्तरङ्गमयान् विकारान्**
**अम्भो यथा सलिलमेव हि तत्समस्तम्॥** (उ.च. ३.४.७)

कारुण्यतायाः परिपूर्णदर्शनम् उत्तररामचरिते भवति। रसहीनोऽपि जनः उत्तररामचरितं पठित्वा रसयुक्तः जायते। भवभूतौ भावानां कौमार्यं, संवेदनशीलता च दरीदृश्यते।

मालतीमाधवम् - मालतीमाधवे दशाङ्काः सन्ति। अस्मिन् नाटके मालती-माधवयोः प्रेम्णः निदर्शनं दरीदृश्यते। यथा मेघदूतखण्डकाव्ये प्रियतमा स्वप्रियतमं प्रति सन्देशं प्रेषयितुं मेघं सूचयति तथैव अस्मिन् नाटके दृश्यते। समासप्राचुर्यत्वात् हास्यरसस्याभावः नाटके दृश्यते।

महावीरचरितम् – भवभूतिना रावणवधान्तां कथामाश्रित्य इदं नाटकं विरचितम्। रामायणकथायां किञ्चित् परिवर्तनं कृत्वा नाटकस्य रचना अभवत्। राजनीतेः प्राचुर्यतमं वर्णनं ग्रन्थे कृतमस्ति।

नाट्यशैली – संस्कृतसाहित्यगगने कालिदासानन्तरं भवभूतेः नाम सर्वोत्कृष्टनाटककारेण गण्यते। तस्य नाट्यकृतिषु उत्तररामचरितमेव सर्वोत्तमं नाटकमस्ति। अस्मिन् नाटके भवभूतिः स्वयं ''**परिणतप्रज्ञः**'' कथयति। तस्मिन् भवभूतेः विद्वत्तायाः दर्शनं भवति। घटनासंयोजने सौष्ठवं वर्णनानां सार्थकता च मनोहरा शैली तेषां नाटकानां प्रमुखाः विशेषताः सन्ति। एवञ्च उत्तररामचरिते घटना संविधाने कवेः मनोवैज्ञानिकपद्धत्याः दर्शनं भवति। यथा मार्मिक करुणरसयुक्तवर्णनं तेषां नाटके दृश्यते, तादृशं वर्णनं नाऽन्यस्मिन् नाटके दृश्यते।

**विश्वनाथः**

यथा जगति भगवतः शंकरस्य विश्वनाथरूपे ख्यातिः वर्तते, तथैव संस्कृतकाव्यजगति आचार्यविश्वनाथस्य ख्यातिः वर्तते। यथा कथितम् ''**कविर्मनीषीः स्वयंभूः परिभूः**'' इति सूक्त्यनुसारम् आचार्यः विश्वनाथः उत्तमः कविरासीत्।

जीवनपरिचयः – साहित्यदर्पणकारस्य विश्वनाथस्य जीवनपरिचयः अन्यकवीनामिव प्रच्छन्नः वर्तते। तेषां जन्म उत्कलदेशे (ओडिशायां) राज्याश्रयप्राप्ते ब्राह्मणकुले अभवत्। ''**महापात्र**'' इति तेषां कुलोपाधिरासीत्। तेषां पितुः नाम चन्द्रशेखरः आसीत्, अतः उक्तं च यत्

**''श्रीचन्द्रशेखरमहाकविचन्द्रसूनुश्रीविश्वनाथकविराजकृतं प्रबन्धम्।**
**साहित्यदर्पणममुं सुधियो विलोक्य साहित्यतत्त्वमखिलं सुखमेववित्त॥**

श्री नारायणः विश्वनाथस्य पितामहः आसीत्। श्रीनारायणः पण्डितं धर्मदत्तं जित्वा सकलशास्त्रविशारदः बभूव। प्रसिद्धः विद्वान् चण्डीदासः श्रीनारायणस्य अनुजः आसीत्। सः कलिङ्गदेशस्य राजा नरसिंहदेवस्य सभा पण्डितः आसीत्। पितामहः इव विश्वनाथोऽपि राज्याश्रयं प्राप्तवान् आसीत्। काव्यप्रकाशदर्पणे सः आत्मानं सन्धिविग्रहकं कथयति। तेषां राज्याश्रयदाता श्रीनरसिंहस्य पुत्रः आसीत्। विश्वनाथस्य शिक्षा ''श्रीनारायणचरणारविन्दमधुकरं'' कथयन्ति। विश्वनाथः न केवलं संस्कृतज्ञः अपि तु अष्टादशभाषासु विद्वान् आसीत्।

समयः – पण्डितराजः जगन्नाथः रसगङ्गाधरे विश्वनाथस्योल्लेखं करोति, अतः तेषां समयः मम्मट – जगन्नाथयोः मध्यकालः वर्तते। मम्मटस्य समयः एकादशशताब्द्यां तथा जगन्नाथस्य समयः षोडशशताब्द्यां निश्चीयते। उक्तं यत्

**''सन्धौ सर्वस्वहरणं विग्रहे प्राणनिग्रहः।**
**अलाबुद्दीननृपतौ न सन्धिर्न च विग्रहः॥''**

अलाबुद्दीनस्य मृत्युः ख्रिष्टाब्दः १३१७ तमे वर्षे अभवत्। अतः विश्वनाथस्य समयः चर्तुदशशताब्द्यां निश्चीयते।

कृतयः – आचार्य विश्वनाथस्य नवकृतयः सन्ति।

(१) राघवविलासः (२) कुवलयाश्चरितम् (३) चन्द्रकला (४) प्रभावतीपरिणयम् (५) प्रशस्तिरत्नावली (६) नरसिंहविजयः (७) कंसवधम् (८) साहित्यदर्पणः (९) काव्यप्रकाशदर्पणः।

**बाणभट्टः**



''**गद्यं कवीनां निकषं वदन्ति**'' इति सूक्त्यनुसारं संस्कृतसाहित्ये पद्यानन्तरं गद्यस्य विकासः सञ्जातः। आद्यः गद्यकारः दण्डी, अनन्तरं सुबन्धुः, तदनन्तरं बाणभट्टस्य क्रमः आयाति। तथापि गद्यकारेषु उत्तमगद्यकाररूपेण बाणभट्टस्य गणना क्रियते।

जीवनपरिचयः – बाणभट्टः एकः महान् गद्यकारः आसीत्। असौ सरस्वतीपुत्रः वात्सायनवंशोद्भवः आसीत्। दुर्वाससः शापात् सरस्वती सावित्र्या सह मृत्युलोकं गतवती। अनन्तरं सरस्वतीदधीचयोः संयोगः सञ्जातः। तस्मात् सा सरस्वती पुत्रमेकं जनयामास। सरस्वत्याः पुत्रः वेदादिशास्त्रेषु पारंगतः आसीत्। तदनन्तरं सावित्र्या सह

सरस्वती ब्रह्मलोकम् अगच्छत्। सरस्वतीगमनानन्तरं दधीचि अक्षमालायै स्वपुत्रं पालयितुं दत्तवान्। अनन्तरम् अक्षमाला अपि पुत्रमेकं जनयामास। अतः अक्षमालया पुत्रद्वयं पालितं पोषितं च। एकस्य नाम सारस्वतः, अपरस्य नाम वत्सः आसीत्। अनन्तरं वत्सवंशः अग्रे अचलत्। अच्युतादि क्रमे पाशुपतस्य अर्थपतिः एवम् अर्थपतेः एकादशपुत्राः अभवन्। तेषु चित्रभानोः बाणनाम्नः पुत्रः बभूव। बाणस्य मातुः नाम राजदेवी आसीत्। बाल्यकालेव बाणस्य मातुः निधनम् अभवत्। चतुर्दशवर्षे बाणस्य पितुः निधनम् अभवत्। तदनन्तरं समावर्तनं च विवाहसंस्कारं कृत्वा बाणभट्टः स्वगृहं त्यक्तवान्। भ्रमणावसरे तेन भत्सुगुरोः समीपे अध्ययनं कृतम्। बाणभट्टस्य पुत्रस्य नाम भूषणभट्टः किन्तु केचन विद्वांसः पुलिनभट्टः इति नाम्ना स्मरन्ति।

समयः - महान् यात्री ह्वेनत्सांग बाणस्य समयः सप्तमशताब्द्यां मन्यते। कारणं महाराजा हर्षदेवस्य कालः षष्ठशताब्द्यां निश्चीयते। एवं हर्षस्य वर्णनं बाणभट्टेन हर्षचरिते कृतमस्ति।

कृतयः - बाणभट्टस्य कादम्बरी, हर्षचरितं चेति कृतिद्वयं मन्यन्ते विद्वांसः।

कादम्बरी - विंशति - श्लोकैः कादम्बर्याः मंगलाचरणम् अभवत्। बाणभट्टः लाघवतां स्वीकृत्य समासेन कादम्बर्याः वर्णनं कृतवान्। कादम्बर्याः कथा जन्मत्रयवृत्तान्तमङ्गीकरोति। उक्तं च यत् **''धिया निबद्धेयमतिद्वयी कथा''** अर्थात् कादम्बरी कथास्वरूपात्मिका वर्तते। विदिशायां शूद्रको नाम राजाऽऽसीत्। एकदा चाण्डालकन्या शुकं नीत्वा आगच्छति। अनन्तरं चाण्डाल-शूद्रकयोः संवादः जायते। तदनु शुकः स्वपूर्ववृत्तान्तं कथयति। उज्जयिन्यां तारापीडः नाम राजाऽऽसीत्। तस्य पुत्रः चन्द्रापीडः आसीत्। तदनन्तरं चन्द्रापीडवैशम्पायनौ गुरुकुले शिक्षितौ। अनन्तरं महाश्वेतायाः आगमनं भवति। कादम्बर्याः वर्णनं श्रुत्वा चन्द्रापीडः मोहितः सञ्जातः। तदनन्तरं कादम्बरीचन्द्रापीडयोः सुखेन मेलनमभवत्।

हर्षचरितम् - हर्षचरिते ग्रन्थे अष्टौ उच्छ्वासाः सन्ति। तस्मिन् चतुर्थादारभ्य समाप्तिपर्यन्तं हर्षस्य चरितं वर्णितं हर्षस्य पितरौ यशोमती-प्रभाकरवर्धनौ आस्ताम्। हर्षस्य ज्येष्ठ भ्रातुः नाम राज्यवर्धनः आसीत्। चतुर्थ-उच्छ्वासे राजकुमारयोः एवं तत्स्वसुश्च जन्मवृत्तान्तं वर्णितम्। पञ्चमोच्छ्वासे राजकुमारयोः विजययात्रायाः वर्णनं वर्तते। षष्ठोच्छ्वासे राज्यवर्धनस्य परावर्तनम्, ग्रहवर्मणः मृत्युः, राज्यवर्धनस्य प्रस्थानम् एवं गौडेश्वरशशाङ्कद्वारा तस्य वधः सञ्जातः। सप्तमोच्छ्वासे हर्षस्य दिग्विजययात्रायाः वर्णनं वर्तते। अष्टमे राज्याश्रियः प्राप्तिः एवं बौद्धभिक्षुभिः सह मेलनम् अभवत् इति मूलकथा संक्षिप्तेऽत्र वर्णिता।

गद्यशैली - कादम्बर्याः पात्रचित्रणम् अत्युत्तमं वर्तते। बाणेन स्वग्रन्थे अलङ्काराणां मनोरमः प्रयोगः कृतः।

उपसंहारः - नाट्यदर्शनेन अस्माकं जीवनं रसमयं भवेत् एतदेव नाट्यस्योद्देश्यं वर्तते।

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) भवभूतेः पितुः नाम किम् आसीत् ?

(क) नीलकण्ठः (ख) शिवरामः (ग) भगीरथः (घ) वासुदेवः

(२) उत्तररामचरिते कति अङ्काः सन्ति ?

(क) पञ्च (ख) सप्त (ग) नव (घ) दश

(३) कादम्बर्याः रचयिता कः वर्तते ?

(क) माघः (ख) भासः (ग) विश्वनाथः (घ) बाणभट्टः

(४) भवभूतेः कति नाटकानि सन्ति ?

(क) पञ्च (ख) सप्त (ग) त्रीणि (घ) अष्ट

(५) आद्यः गद्यकारः कोऽस्ति ?

(क) बाणः (ख) दण्डी (ग) भासः (घ) माघः

(६) कारुण्यतायाः दर्शनं कस्मिन् नाटके भवति ?

(क) मेघदूते (ख) वेणीसंहारे (ग) उत्तररामचरिते (घ) ऋतुसंहारे

(७) बाणस्य परवर्ती कः आसीत् ?

(क) दण्डी (ख) भवभूतिः (ग) माघः (घ) भासः

**२. संयोजनं कुरुत।**

| 'अ' | 'ब' |
|---|---|
| (१) उत्तररामचरितम् | बाणभट्टः |
| (२) कादम्बरी | विश्वनाथः |
| (३) साहित्यदर्पणः | भवभूतिः |
| (४) गउडवहो | दण्डी |
| | वाक्पतिराजः |

**३. एकेन वाक्येन उत्तरं लिखत।**

(१) आचार्यविश्वनाथस्य कति कृतयः सन्ति ?

(२) काव्यप्रकाशदर्पणस्य रचयिता कः वर्तते ?

(३) हास्यरसस्याभावः कस्मिन् नाटके दृश्यते ?

(४) बाणभट्टस्य पितुः नाम किम् आसीत् ?

(५) परिणतप्रज्ञः इति कस्योपाधिरासीत् ?

**४. द्वित्रिर्वाक्यैः उत्तरं लिखत।**

(१) भवभूतेः कति कृतयः सन्ति ? तेषां नामानि लिखत।

(२) प्रमाणं दत्त्वा विश्वनाथस्य कालनिर्धारणं कुरुत।

(३) भवभूतेः परिणतप्रज्ञोपाधेः सार्थकतां लिखत।

(४) विश्वनाथस्य कति कृतयः ? तेषां नामानि लिखत।

**५. सविस्तरमुत्तरं लिखत।**

(१) बाणभट्टस्य जन्मकथायाः वर्णनं कुरुत।

(२) महावीरचरितं विषये स्वविचारान् प्रकटयत।

**६. टिप्पणी लेख्या।**

(१) कादम्बरीकथासारः

(२) उत्तररामचकितम्

**छात्रप्रवृत्तिः**

- आधुनिकसंस्कृतकवीनां तेषाञ्च काव्यानां विषये ज्ञानं प्राप्तव्यम्।

**सुभाषितम्**

**यस्याश्चौरश्चिकुरनिकरः कर्णपूरा मयूरः,**
**भासो हासः कविकुलगुरुः कालिदासो विकासः।**
**हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः,**
**केषां नैषा कथय कविताकामिनी कौतुकाय॥**

●

# ५ देवतानां परिचयः

### प्रस्तावना

देवो दानाद्वा द्योतानाद्वा दीपनाद्वा भवति इति। निरुक्तकारयास्काचार्यव्युत्पत्युनुसारेण देवता शब्दस्य एते अर्थाः भवन्ति, यद् दानाद् देवता द्युस्थितिः देवता वा द्यौतमान् देवता इत्यर्थः। देवतानां साहित्यानुगुणं भागद्वयं कृतं वर्तते यथा वैदिकसाहित्यम्, लौकिकसाहित्यं च। तद्वद् देवानापि भागद्वयम् दरीदृश्यते यथा - लौकिकाः वैदिकाः वैदिकसाहित्यम् अनुसृत्य ऋग्वेदः तथा शतपथब्राह्मणम् इत्यादिग्रन्थानुसारं देवतानां (३३) त्रयस्त्रिंशत् भेदाः प्रतिपादिताः सन्ति। यथा अष्टवसवः एकादशरुद्राः द्वादशादित्याः इन्द्रः प्रजापतिश्च इति आहत्य त्रयस्त्रिंशत् देवताः सन्ति। निरुक्तवचनानुसारं तिस्रः एव देवताः। यथा - पृथ्वीस्थानीय-अग्निदेवता। अन्तरिक्षस्थानीयदेवता इन्द्रः। द्युस्थानीय (सूर्यः) सविता देवताश्चेति।

पाठेऽस्मिन् स्थानीयदेवतानुरूपम् अग्निवरुणबृहस्पतिदेवतानां निरूपणं महत्त्वं - चात्र प्रस्तूयते।

---

### अग्नि



परिचयः - निरुक्तानुसारं अग्रणी भवति इति अग्निः, अग्रं यज्ञेषु प्रणीयते इति अग्निः। अग्नेः पिता वरुणः अस्ति। तथा माता भूमिः अस्ति। अग्नेः गोत्रं शाण्डिल्यं वर्तते। शास्त्रानुसारं अग्नेः विविधाः प्रकाराः सन्ति। अग्निः इन्द्रस्य ज्येष्ठभातृत्वेनाऽपि स्तूयते। अग्निः पृथ्वीस्थानीयदेवताऽस्ति। तस्य वर्णनं प्रायः सर्वेषु वेदेषु विद्यते।

महत्त्वम् - ऋग्वेदे इन्द्रस्यानन्तरं द्वितीयं स्थानम् अग्नेः विद्यते। ऋग्वेदे अग्निदेवस्य आहत्य २०० (द्विशतम्) मन्त्राः सन्ति। अन्येषु वेदेषु अपि अग्निदेवस्य विशेषपूर्ण स्थानं शोभते। अग्निः देवतानां पुरोहितः, आह्वानकर्ता इत्यादिनामभिः सम्बुध्यते। अग्निः न तु देवतानां कृते अपि तु (जनानां) मानवानां कृतेऽपि पूजनीयः देवः। अतः एव गार्हपत्याग्निमाध्यमेन अग्नेः पूजनं गृहेषु भवति। अग्निः साक्षात् वैश्वानरस्वरूपोऽस्ति। अमरकोषानुसारं अग्नेः विविधनामानि सन्ति यथा

**''अग्निर्वैश्वावानरो वह्निः वीतिहोत्रो धनञ्जयः।''**

**कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात्॥**

अग्निदेवतया अन्यदेवतानामपि नैकानि सूक्तानि लभ्यन्ते। यथा इन्द्राग्निसूक्तम्, वरुणाग्निसूक्तम्, प्रशस्तयः इत्यादिः।

वैज्ञानिकदृष्ट्या पश्यामश्चेद् अग्नेः कारणाद् एव इदं सृष्टिचक्रं प्रचलति अग्निं विना अन्नस्योत्पत्तिः अशक्या एव तथा सूर्यरूपि - अग्निना विना जीवसृष्टिः निरर्थकी एव। अतः अग्निः साक्षात् ब्रह्मस्वरूपोऽस्ति।

विशेषणानि - अग्निदेवतानां क्रमानुसारेण विशेषणानि सन्ति। तद्यथा - त्र्यम्बकः घृतमुखः, घृतपृष्ठः, अतिथिवैश्वानरः, सप्तजिह्वा, रुक्मदन्तः, जातवेदः, असुरः अस्य प्राणशक्तिदाता इत्यर्थः।

ध्यानम् -

**अग्निं प्रज्वलितं वन्दे, जातवेदं हुताशनम्।**

**हिरण्यवर्णममलं समिद्धं विश्वतो मुखम्॥**

मन्त्रः -

**चत्वारि शृङ्गात्रयोअस्यपादा द्वेशीर्षेसप्तहस्तासोअस्य।**

**त्रिधाबद्धो व्वृषभोरोरवीति महोदेवोमर्त्यां-२-ऽआविवेश॥**

### वरुणः



**परिचयः** - द्युस्थानीयस्थितः अयं देवः। वरुणदेवः वृवीति सर्वं व्रियते अनेनेति वा इति वरुणः। अयं देवः जलाधिपतिः कथ्यते। दशशु दिक्षु पश्चिमदिशि वरुणदेवस्य स्थानं विद्यते। न्यायाधिष्ठोऽयं देवः सर्वदा स्वभक्तान् रक्षति।

महत्त्वम् - सम्पूर्णे ऋग्वेदे वरुणदेवस्य आहत्य १२ (द्वादश) सूक्तेषु वर्णनम् अस्ति तथा अन्यदेवेन सह (२४) चतुर्विंशतिसूक्तेषु वर्णनं वर्तते। वरुणदेवस्य नेत्ररूपः सूर्यः वर्तते इति ऋग्वेदः। वरुणदेवः न्यायप्रियदेवः वर्तते। असुराणां सुराणां च न्यायकर्ता वरुणः अस्ति। सः स्वकीयपाशेन दुष्टान् बध्नाति तथा भक्तान् ज्ञाताज्ञातपापात् रक्षति। वरुणदेवस्य सूक्तस्य ऋषिः शुनक्षेपः अस्ति। तेषामाख्यानम् एतरेयब्राह्मणे शुनःशेपाख्यानेन प्रसिद्धं वर्तते। तस्मिन् आख्याने वरुणदेवस्य न्यायप्रियता तथा भक्तानां रक्षणं दरीदृश्यते। वरुणदेवः मायावी देवरूपेणापि प्रस्तूयते। सः स्वकीयमायया भक्तान् पालयति दुष्टान् दण्ड्यति। वरुणदेवः सामुद्रिकप्राणीनाम् इष्ट-पालकदेवः वर्तते। अतः एव सः जलाधिपतिः कथ्यते। अमरकोषानुसारं वरुणदेवस्य विविधानि नामानि सन्ति। यथा -

**प्रचेता वरुणः पाशी यादसाम्पतिरप्पतिः।**
**श्वसनः स्पर्शनोवायुः; मातरिश्वा सदागतिः॥**

विशेषणानि - स्वराट्, मायावी, उरूशंसः, धृतव्रतः, क्षत्रियादिः।

ध्यानम् -

**नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमण्डलाय।**
**सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते॥**

मन्त्रः -

**ॐ तत्त्वायामि ब्रह्मणाव्वन्दमानस्तदाशास्ते यजमानो हविर्भिः।**
**अहेडमानो वरुणेहबोद्धध्युरुश ω समानऽआयुः प्रमोषीः॥**

### बृहस्पतिः



परिचयः - बृहस्पतिः देवतानां गुरुः मन्यते। यतो हि बृहस्पतिः बुद्धेः देवता अस्ति। शक्तिपुत्रोऽयम् अङ्गिरसः इत्युच्यते। यथा अमरकोषे प्रोक्तम् -

**बृहस्पतिः सुराचार्यो गीष्पतिर्धिषणो गुरुः।**
**जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिजः॥**

बृहत्याः वाचः पतिः बृहस्पतिः इति पारस्करः। ईशानदिशः स्वामी एषः देवः अस्ति। बृहस्पतिदेवः उपासनाकर्तृणाम् आराध्यदेवोऽस्ति।

महत्त्वम् - बृहस्पतेः ऋग्वेदे एकादशः (११) सूक्तेषु स्तुतिः दृश्यते। अन्यदेवताभिः सह अपि स्तुतिः ऋग्वेदेऽस्ति। बृहस्पतिः यज्ञकार्ये देवतानां सहायरूपः भवति। तथा सः वाण्याः देवः अस्ति। अतः वाक्पतिः कथ्यते। रक्ताः अश्वाः एतस्य स्वर्णरथं वहन्ति। वैखरी, मध्यमा पश्यन्ती इति वाणीत्रयेण सह अस्य मुख्यसम्बन्धः अस्ति। सः स्वयं काञ्चनस्वरूपः अस्ति।

विशेषणानि - बृहस्पतिः अश्वारूढः तथा गजारूढः अस्ति। देवेतरसाहित्यानुसारं बृहस्पतिः अङ्गिरासुरूपयोः पुत्रः आसीत्। सः सदा पीतवस्त्राणि धारयति। कमलासने उपविष्टः चतुर्भुजधारी अस्ति। हस्ते स्वर्णदण्डः गले रुद्राक्षमाला

वरदमुद्रा च शोभते। बृहस्पतिः अग्नेः प्रतीकरूपः अस्ति। तथा जनेभ्यः (स्वभक्तेभ्यः) उत्तममायुः सौभाग्यं बुद्धिं च प्रयच्छति। सप्ताश्वः, सप्तजिह्वः, सप्तमुखः, गणपतिः, सदस्पतिः, देवगुरुः च तस्य विशेषणानि सन्ति।

ध्यानम् -

**देवानाञ्च ऋषीणाञ्च गुरुकाञ्चन-सन्निभम्।**
**बुद्धिभूतं त्रिलोकेशं तन्नमामि बृहस्पतिम्॥**

मन्त्रः -

**ॐ बृहस्पतेऽअतियदर्यो ऽअर्हाद्युमद्विभाति क्रतुमज्जनेषु।**
**यद्दीदयच्छवसऽऋतप्प्रजात तदस्मासु द्रविणं धेहिचित्रम्॥**

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) देवताशब्दस्य अर्थः भवति -

(क) वायुस्थितः (ख) जलस्थितः (ग) द्युस्थितः (घ) धर्मस्थितः

(२) वसवः कति सन्ति ?

(क) सप्त (ख) अष्ट (ग) नव (घ) दश

(३) वैदिकसाहित्यानुसारं देवतानां कति प्रकाराः सन्ति ?

(क) त्रयस्त्रिंशत् (ख) एकत्रिंशत् (ग) चतुर्विंशतिः (घ) पञ्चविंशतिः।

(४) पृथ्वीस्थानीय देवः कः ?

(क) वरुणः (ख) प्रजापतिः (ग) बृहस्पतिः (घ) अग्निः

(५) वरुणदेवस्य सूक्त-ऋषिः कोऽस्ति ?

(क) विश्वामित्रः (ख) वशिष्ठः (ग) शुनःशेपः (घ) शुक्राचार्यः

(६) मायावी कस्य देवस्य विशेषणमस्ति ?

(क) बृहस्पतेः (ख) वरुणस्य (ग) अग्नेः (घ) शङ्करस्य

(७) देवगुरुः कः ?

(क) शुक्राचार्यः (ख) वशिष्ठः (ग) बृहस्पतिः (घ) विश्वामित्रः

**२. एकेन वाक्येन उत्तरं लिखत।**

(१) रुद्राः कति सन्ति ?

(२) अन्तरिक्षस्थानीयदेवता काऽस्ति ?

(३) अग्नेः मित्रं किम् अस्ति ?

(४) जलाधिपतिः कोऽस्ति ?

(५) बृहस्पतेः पितुः नाम किं वर्तते ?

**३. द्वित्रिर्वाक्यैः उत्तरं लिखत।**

(१) देवताशब्दस्य अर्थं लिखत।

(२) अग्नेः विशेषणानि लिखत।

(३) वरुणः कथं स्वभक्तान् रक्षति ?

(४) अमरकोषानुसारेण बृहस्पतेः नामानि लिखत।

**४. सविस्तरम् उत्तरं लिखत।**

(१) अग्निदेवस्य परिचयं लिखत।

(२) वरुणदेवस्य विशेषणानि प्रतिपाद्य नामानि लिखत।

(३) बृहस्पतिदेवस्य महत्त्वं प्रतिपादयत।

**५. टिप्पणी लेख्या।**

(१) अग्निदेवः। (२) वरुणदेवः।

**छात्रप्रवृत्तिः**

- छात्रैः अमरकोषानुसारं देवतानामानि कण्ठस्थीकरणीयानि।
- इन्द्र-वायु-सूर्य देवतानां विषये वर्गे परस्परं संलापः।

**सुभाषितम्**

**अग्नौ प्रास्ताहुतिः सम्यक्,**
**आदित्यमुपतिष्ठते।**
**आदित्याज्जायते वृष्टिः,**
**वृष्टेरन्नं ततः प्रजाः॥**

●

<table><tr><td>६</td><td>

# भारतस्य पर्यटनस्थलानि

</td></tr></table>

**प्रस्तावना**

यथा ''उत्सवप्रिया: खलु मनुष्या:'' इति सूक्त्यनुसारं सर्वे मनुष्या: उत्सवप्रिया: वर्तन्ते। तथैव भारतस्य सर्वे जना: भ्रमणप्रिया: अपि वर्तन्ते। अत: एव भारतदेशे पर्यटनस्थलानाम् अधिकं महत्त्वं वर्तते। तेषु पर्यटनस्थलेषु कतिचन प्राकृतिकानि, कतिचन धार्मिकाणि कतिचन ऐतिहासिकानि स्थलानि च वर्तन्ते। अस्मिन् प्रकरणे पर्यटनस्थलानां महत्त्वं वर्णितम् अस्ति।

---

**माउन्ट आबु:**



परिचय: - आबुपर्वत: राजस्थानराज्ये स्थित - सिरोहीमण्डलान्तर्गत-अरवल्ल्या: गिरमालासु उन्नत: शिखरोऽस्ति। आबुपर्वतेऽपि उन्नत: शिखर: गुरुशिखर: (१७२२) मी. वर्तते। अस्य स्थलस्य शोधकर्ता युरोपियन अधिकारी जेम्स टोड मन्यते। आबुपर्वत: हिन्दु-जैनधर्मयो: आश्रयस्थानमस्ति। अत्र बहूनि प्राकृतिकानि ऐतहासिकस्थानानि च सन्ति।

इतिहास: - आबुपर्वत: प्राचीनकालात् साधुजनानां निवासस्थानं मन्यते। पौराणिक-कथानुसारं त्रयस्त्रिंशत् कोटि देवता: अत्रैव परिभ्रमणम् अकुर्वन्। महर्षिवशिष्ठेन अत्रैव असुराणां नाशार्थं यज्ञ: आयोजित:। जैनधर्मस्य चतुर्विंशतितम: तीर्थंकर: भगवान् महावीरोऽपि आबुपर्वते समागत:। अत: एव इदं स्थानं जैनधर्मिणां कृते पूजनीयं स्थानमस्ति। कथानुसारं हिमालयस्य पुत्र: आरबुआदा आसीत्। तस्य नाम्ना विख्यात: आबुपर्वत:। आरबुआदा सर्प: अपि आसीत्। अस्योल्लेख: पुराणग्रन्थेषु प्राप्यते। प्राचीनकाले इदं स्थानं मुख्यरूपेण आङ्ग्लजनानां ग्रीष्मावासरूपेण मन्यते स्म।

दर्शनीय स्थानानि - पश्चिमभारतस्य मनोहारिषु पर्यटनस्थलेषु अन्यतम: आबुपर्वत: वर्तते। इदं स्थानं स्वास्थ्यवर्धकेन वायुना सह आध्यात्मिक केन्द्रमपि वर्तते। अत्र प्रमुखम् आकर्षणं देलवाडा वर्तते। इदं स्थानं आबुपर्वतात् १५ कि.मी. दूरे गुरुशिखरश्रेण्यां स्थितमस्ति। अस्य निर्माणम् एकादशत: त्रयोदशशताब्द्यां सञ्जातम्। अत्र बहव: देवालया: सन्ति। तेषां मूर्तिकला स्थापत्यकला च विश्वविख्याता अस्ति। देलवाडात: १ कि.मी. उत्तरपूर्वे अचलदुर्गं वर्तते। तत्रस्थ: देवालय: अरावल्या: उन्नत: शिखररूपेण वर्तते। अत्र नक्की सरोवर: गोमुख देवालय:, अभयारण्यादीनि स्थलानि सन्ति। भारतस्य उत्कृष्टदर्शनीयस्थलेषु आबुपर्वतस्य गणना भवति।

**ताजमहेल:**

परिचय: - ताजभवनम् आधुनिकयुगस्य सप्तसु कौतुकेषु अन्यतमं वर्तते। यमुनानद्या: तीरे इदं भवनं वर्तते। इदं भवनम् अमृतशिलाभि: निर्मितम्। इयं शिल्पकला यवन-भारतीयशिलाभि: युक्ता अस्ति। ताजभवनस्य विन्यासं उस्तादमदलहौरिण: कृतवान् इति श्रूयते। वस्तुत: इदं भवनम् अतीव समीचीनं वर्तते। ताजमहेल न केवलं भारते अपि च विश्वे प्रसिद्धं भवनं वर्तते।

स्वरूपम् – ताजभवनं परितः प्रावारकम् अस्ति। दक्षिणदिशि महाद्वारम् अस्ति। उत्तरभागे ताजमन्दिरम् अस्ति। केषुचिद विभागेषु शिल्पानि अपि सन्ति। भित्तिषु लताशिल्पानि सन्ति। कुरान् ग्रन्थस्य भागाः अत्र उत्कीर्णाः सन्ति। अस्य वैशिष्ट्यं वर्तते यत् उपरिभागे गमनेन बृहदक्षराणां दर्शनं भवति।



वैशिष्ट्यम् – सर्वेषां मनसि एतद् अलौकिकं भवनम् इति भावना वर्तते। सर्वजनप्रियम् एतद् भवनम् अतीव आकर्षकं वर्तते। कलास्थानेषु अस्य गणना विश्वेषु अन्यतमरूपेण क्रियते। यथा चन्द्रिका मनसः तापं हरति तद्वत् अस्य दर्शनेन प्रसन्नतायाः अनुभूतिः जायते। केवलं मधुशब्दोच्चारणेन मुखे रसानुभूतिर्नजायते तथैव ताजभवनस्य दर्शनेन विना कदापि आनन्दस्य प्राप्तिर्न भवति। अतः एकवारं तु अवश्यमेव अस्य दर्शनं करणीयम्। न केवलं भारतीयाः अपि तु वैदेशिकाः अपि वदन्ति यद् अस्य सौन्दर्यं साक्षादेव द्रष्टव्यम्। ताजमहलस्य पुरतः सरः वर्तते। अस्मिन् सरोवरे ताजमहलस्य प्रतिबिम्बं दृश्यते। ग्रीष्मकाले अष्टवादनतः एवं शीतकाले सप्तवादनतः रात्रिपर्यन्तम् अस्य दर्शनं भवति। विशेषतया शुक्रवासरे निःशुल्करूपेण अस्य दर्शनं भवति। सोमवासरे अत्र अवकाशः वर्तते।

**अक्षरधाम देवालयः**

परिचयः – नूतनदेहल्यां भगवतः स्वामिनारायणस्य अक्षरधाम मन्दिरं वर्तते। सांस्कृतिकतीर्थधामरूपेण अस्य गणना भवति। भगवतः स्वामिनारायणस्य स्मृत्यर्थम् अस्य निर्माणम् अभवत्। इदं स्थानं देहली अक्षरधामरूपेण विख्यातमस्ति। अक्षरधाम्नि भारतीयसंस्कृतेः उत्कृष्टतायाः दर्शनं भवति। इदं स्थानं शिल्पस्थापत्यादीनामुदाहरणं वर्तते। अस्य देवालयस्य प्रेरणास्रोत प्रमुखस्वामिमहाराजाः सन्ति। ३००० स्वयंसेवकाः ७००० उत्कृष्टशिल्पिनः च अस्य देवालयस्य निर्माणं कृतवन्तः।



प्रायः देहल्यां नवतिप्रतिशतम् अतिथयः अत्र समायान्ति। ६ नवेम्बर, २००५ तमे वर्षे अस्य स्थापना अभवत्। इदं स्थानं यमुनानद्याः तीरे वर्तते। २६ डिसेम्बर, २००७ तमे वर्षे ''गिनिस बुक'' मध्ये अस्य देवालयस्य समावेशः अभवत्।

**दर्शनीयस्थानानि** –

मुख्यस्मारकदेवालयः – अक्षरधामपरिसरस्य मुख्यस्मारकं सम्पूर्णपरिसरस्य केन्द्रबिन्दुरूपेण वर्तते। राजस्थानस्थ इटालियनदेशस्य च श्वेतपाषाणखण्डैः अस्य रचना अभवत्। द्विसहस्रं प्रतिमाः अत्र उत्कीर्णाः सन्ति।

सहजानन्दनीलकण्ठदर्शनम् – सहजानन्दखण्डे भारतस्य सर्वप्रथमं आईमेक्स चलचित्रस्य प्रदर्शनं भवति। अस्मिन् चलचित्रे भारतस्य धार्मिकस्थलानां दर्शनं भवति। अस्मिन् चलचित्रनिर्माणे पञ्चत्वारिंशत् सहस्रजनाः कार्यं कृतवन्तः।

भारते द्विशतं स्थलेषु अस्य निदर्शनम् अभवत्।

संस्कृतिविहार: - संस्कृतिविहार: अन्तिम: प्रदर्शनखण्ड: अस्ति। सर्वे जना: नाव: माध्यमेन भारतीयसंस्कृत्या: ज्ञानम् अत्र प्राप्नुवन्ति।

संगीतमयी जलधारा - अक्षरधाम्नि ज्ञानस्वरूपात्मिका जलधाराया: अपि दर्शनं भवति।

उपसंहार: - अस्मिन् परिसरे भारत-उपवनम्, नारायणसरोवरम्, मयूरद्वारम् (यत्र मयूरा: उत्कीर्णा: सन्ति) इत्येषां दर्शनं भवति। अस्माकं जीवनं नारायणमयं भवेत् एतदेव अस्य मन्दिरस्योद्देश्यं वर्तते। नारायण: अस्ति यस्य स्वामी असौ स्वामिनारायण:। अस्मिन् परिसरे स्वामिनारायणस्य उत्कृष्टविचारधाराया: दर्शनं भवति।

**रक्तदुर्गम् ( लालकिल्ला )**



परिचय: - अस्माकं देशस्य प्रसिद्धासु रचनासु देहलीस्थं रक्तदुर्गम् अन्यतमं वर्तते। एतत् मोगलानां वैभवस्य दर्शनं कारयति। एतस्य निर्माणं शाहजहाँ राजा कृतवान्। १६३९ तमे वर्षे अस्य स्थापना अभवत्। रक्तदुर्गं देहलीराज्ये आग्रानगरस्य समीपे अस्ति। रक्तदुर्गं दुर्गै: आवृत्तं प्रासादनगरं वर्तते।

इतिहास: - मोगलवंशीया: राजान: एतद् दुर्गम् अलभन्त। सम्राट् अक्बर: स्वराज्यपालनकाले राजधानीरूपेण आग्रां स्थापितवान्। अनेन कारणेन आग्रानगरस्य सम्पत्ति: अधिका सञ्जाता। अक्बर: रक्तवर्णाश्मभि: अस्य निर्माणं कृतवान्। अत: रक्तदुर्गे अस्य प्रभाव: दरीदृश्यते। रक्तदुर्गं न केवलं दुर्गरूपेण किन्तु मोगलराजानां निवासस्थानं मन्यते। राजा शाहजहाँ रक्तदुर्गे परिवर्तनं कृतवान्। शाहजहाँ अत्रत्यानां काञ्चन सौधान् नाशयित्वा स्वकीयसौधान् निर्मितवान्। शाहजहाँसम्राज: पुत्र: औरंगजेब: स्वेच्छानुसारं रक्तदुर्गस्य पुन: निर्माणं कृतवान्। राजा शाहजहाँ ''मुसम्मुन बुर्ज'' नामके गोपुरे मृतवान्।

स्वरूपम् - अस्य रक्तगुर्गस्य प्रवेशद्वारं द्वयमस्ति। पश्चिममार्गेण जना: प्रविशन्ति। लाहोरद्वारम् इति एतस्य नाम वर्तते। राजभवनस्य मुख्यद्वारे भेरीगृहम् अस्ति। एतत् भवनं शिलया च सिक्ताभि: निर्मितं वर्तते। अस्य भवनस्य पार्श्वे आस्थाभवनं वर्तते। आस्थाभवनस्य पूर्वभागे सिंहासनं वर्तते। पृष्ठभागे शिलया निर्मित: कुण्ड: वर्तते। रङ्गमन्दिरस्य पार्श्वे मुम्ताज्मन्दिरम् अस्ति। भवनस्य पार्श्वे गोलभवनम् अस्ति। उत्तरस्यां दिशि आन्तरङ्गिकभवनं प्राप्यते।

उपसंहार: - यथा नदी वेगेन शुद्ध्यति तथैव पर्यटनस्थलानां दर्शनेन अस्माकं ज्ञाने वृद्धि: जायते।

## स्वाध्याय:

**१. योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) आबुपर्वत: कस्मिन् राज्ये वर्तते ?

(क) राजस्थानराज्ये (ख) पंजाबराज्ये (ग) आसामराज्ये (घ) केरलराज्ये

(२) ताजभवनस्य विन्यासं क: कृतवान् ?

(क) सम्राट् अक्बर: (ख) औरंगजेब: (ग) उस्तादमदलहौरि (घ) मोहम्मद गोरी

(३) अक्षरधाममन्दिरस्य प्रेरणास्त्रोत किं वर्तते ?

(क) गाँधीजी (ख) सरदारपटेल: (ग) प्रमुखस्वामी (घ) नारायणस्वामी

(४) रक्तदुर्गस्य निर्माणं क: कृतवान् ?

(क) औरंगजेब: (ख) मोहम्मद गोरी (ग) उस्तादमदलहौरि (घ) सम्राट् अक्बर:

(५) आईमेक्स चलचित्रनर्माणे कति जना: कार्यं कृतवन्त: ?

(क) पञ्चसहस्रम् (ख) द्विसहस्रम्

(ग) नवसहस्रम् (घ) पञ्चचत्वारिंशत् सहस्रम्

(६) रक्तदुर्गस्य स्थापना कस्मिन् वर्षे अभवत् ?

(क) १६०० तमे (ख) १६३९ तमे (ग) १८०० तमे (घ) १६५० तमे

(७) आबुपर्वतस्य शोधकर्ता क: आसीत् ?

(क) जेम्स टोड (ख) लोर्ड वेलेस्ली (ग) लोर्ड बेन्टिक (घ) जनरल डायर

**२. संयोजनं कुरुत।**

| **'अ'** | **'ब'** |
|---|---|
| (१) ताजमहेल: | प्रमुखस्वामी |
| (२) अक्षरधाम | सम्राट् अक्बर: |
| (३) आबु पर्वत: | राजा शाहजहाँ |
| (४) रक्तदुर्गम् | जेम्स टोड |

**३. एकेन वाक्येन उत्तरं लिखत।**

(१) जैनधर्मस्य चतुर्विंशतितम: तीर्थंकर: क: आसीत् ?

(२) औरंगजेबराज्ञ: पितु: नाम किम् आसीत् ?

(३) संगीतमयी जलधारा कुत्र वर्तते ?

(४) जेम्स टोड कस्य देशस्य निवासी आसीत् ?

(५) अक्षरधामदेवालय: कस्य सम्प्रदायस्य वर्तते ?

**४. द्वित्रिर्वाक्यै: उत्तरं लिखत।**

(१) अक्षरधाम्नि कति खण्डा: सन्ति ? तेषां नामानि लिखत।

(२) स्वामिनारायण: शब्दस्य व्याख्यां कुरुत ।

(३) ताजमहलस्य विषये वैदेशिका: किं कथयन्ति ?

(४) अक्षरधामदेवालयस्योद्देश्यं किं वर्तते ?

(५) केन कारणेन आग्रानगरस्य सम्पत्ति: अधिका सञ्जाता ?

**५. सविस्तरमुत्तरं लिखत।**

(१) अक्षरधामदेवालयस्य महत्त्वं वर्णयत।

(२) आबुपर्वतस्य वैशिष्ट्यं प्रतिपादयत।

(३) रक्तदुर्गस्य स्वरूपं वर्णयत।

**छात्रप्रवृत्तिः**

- गुर्जरराज्यस्य कस्यचिदेकस्य पर्यटनस्थलस्य यात्रां कृत्वा वर्गखण्डे निजानुभवं वर्णयेत।

**सुभाषितम्**

**मुखं पवित्रं यदि रामनाम हस्तौ पवित्रौ यदि दानकार्यम्।**
**पादौ पवित्रौ यदि तीर्थयात्रा चित्तं पवित्रं यदि ब्रह्मज्ञानम् ॥**

●

# ७ भारतस्य धार्मिकस्थलानि

**प्रस्तावना**

अखिले विश्वेऽस्मिन् भारतस्य गणना मूर्धन्यरूपेण क्रियते, कारणं वर्तते यद् भारतस्य प्राचीनसंस्कृतिः संस्कृतेः रक्षकाः च। मुख्यत्वे पञ्च रक्षकाः एतादृशाः अभवन् यैः संस्कृतेः रक्षणं कृतम्। एतैः रक्षकैः संस्कृतेः रक्षणाय तीर्थानां धार्मिकस्थलनानां च स्थापना कृता। यथा कथितं च यत् ''तारयति इति तीर्थः''। अतः अस्मिन् प्रकरणे यानि धार्मिकस्थलानि सन्ति तेषां वर्णनं वर्तते।

---

**बद्रीनाथः**



परिचयः – भारतस्य तीर्थस्थानेषु अन्यतमं बद्रीनाथक्षेत्रम्। बद्रीनाथक्षेत्रं भारतस्य उत्तराखण्डराज्ये चमोलीप्रदेशे वर्तते। हिमालयपर्वते नरनारायणौ अस्मिन् एव आश्रमे अवसताम्। अत्र पाण्डवाः अपि आगतवन्तः। एवञ्च वेदव्यासस्य आश्रमः अपि अस्मिन् स्थाने वर्तते। चतुर्षु क्षेत्रेषु बद्रीनाथस्य महत्त्वम् अधिकं वर्तते।

धार्मिकदृष्ट्या महत्त्वम् – शङ्कराचार्यमहाभागैः बद्रीनाथस्य स्थापना कृता। अस्य स्थापनाकालः नवमशताब्द्यां वर्तते। एतत् क्षेत्रं वैष्णवानां कृते पवित्रक्षेत्रं वर्तते। सनातनग्रन्थेषु कथितं यद् बद्रीनाथक्षेत्रम् अतीव पवित्रक्षेत्रं वर्तते। भागवतपुराणानुसारं बद्रीकाश्रमस्य प्रमुखौ देवौ नरनारायणौ आस्ताम्। तौ सकलजीवानाम् उद्धारार्थं महातपः आचरितवन्तौ। बीजरहितं फलं बद्री नाम्नाऽभिधीयते। अस्मिन् प्रदेशे बद्रीफलस्य प्राचुर्यं वर्तते। एवञ्च नाथः इत्युक्ते अस्य देवः। बद्रीनाम्नः अपरं फलं वर्तते, यस्य चर्चा धर्मग्रन्थेषु कृता वर्तते। अत्र बद्रीवृक्षाः यथेष्टं वर्धन्ते स्म इत्यस्योल्लेखः वर्तते।

एतत् स्थलं सान्निध्येन पवित्रं जातमस्ति। अत्र नरनारायणयोः रूपद्वयं द्रष्टुं शक्यते। महाभारते भगवान् शिवः अर्जुनं कथयति यद् भवान् पूर्वजन्मनि नररूपेण आसीत्। अहं नारायणरूपेण पूर्वजन्मनि आसम्। एका कथा अपि वर्तते। दक्षपुत्री मूर्तिदेवी पुत्रवती नाऽसीत्। अतः पुत्रप्राप्त्यर्थं वसुधारातीर्थे अनेकानि वर्षाणि यावद् घोरं तपः आचरितवती। अनन्तरं नारायणः प्रसन्नः जातः। प्रसन्नः भूत्वा नारायणः कथयति ''वरं वृणीष्व''। तदा मूर्तिदेवी उक्तवती पुत्रद्वयं ददातु। तथास्तु इत्युक्त्वा नारायणः अन्तर्ध्यानः सञ्जातः। अग्रे तस्याः पुत्ररूपेण नरनारायणौ जातौ। सहस्रकवचः नामकः राक्षसः आसीत्। सः ब्रह्मणः वरमेकं प्राप्तवान्। वरप्रभावात् सः अतीव बलवान् जातः। दशसहस्र वर्षपर्यन्तं येन तपः कृतं तमपि मारयितुं सः समर्थः। सहस्रकवचस्य दुष्टतां दृष्ट्वा नारायणः कवचानि रचितवान्। तदा राक्षसः सूर्यम् आश्रितवान्। अनन्तरं द्वापरयुगे सः एव कर्णरूपेण प्रकटितवान्। नरनारायणौ कृष्णार्जुनरूपेण आगत्य तम् अमारयताम्। नरनारायणयोः तपसः प्रभावात् लक्ष्मीः प्रसन्ना जाता। सा फलछायादिकं दत्तवती। अतः एव इदं क्षेत्रं बद्रीक्षेत्रं कथ्यते।

प्राकृतिकदृष्ट्या महत्त्वम् – बद्रीक्षेत्रे अधिकानि ब्रह्मकमलानि सन्ति। महाभारतेऽपि अस्योल्लेखः दरीदृश्यते। अस्मिन् स्थले पाण्डवाः पश्चिमगढवालसमीपे स्वर्गारोहणम् अकुर्वन्। बद्रीनाथक्षेत्रं परितः अतीव समृद्धतायाः दर्शनं भवति। अस्य चर्चा पद्मपुराणे कृताऽस्ति। विशेषतया ग्रीष्मकाले तीर्थयात्रायाः मार्गे महती जनसंख्या भवति। सर्वे जनाः जूनतः सप्टेम्बरपर्यन्तं बद्रीनाथं प्रति दर्शनार्थम् आगच्छन्ति। अस्मिन् प्रदेशे शैत्याधिकता वर्तते। अतः जनाः आवर्षम् ऊर्णस्य वस्त्राणि धारयन्ति। मैमासस्य द्वितीयसप्ताहतः नवेम्बरमासस्य द्वितीयसप्ताहपर्यन्तं देवदर्शनं कर्तुं शक्यते। षण्मासपर्यन्तं यावद् इदं क्षेत्रं हिमराशिभिः आच्छादितं वर्तते। आवर्षपर्यन्तम् अस्मिन् मन्दिरे दीपज्योतेः दर्शनं भवति। अस्य दीपस्य दर्शनमेव ज्योतिदर्शनम् इत्युच्यते।

## केदारनाथः

परिचयः – द्वादशज्योर्तिलिङ्गेषु केदारनाथः अन्यतमम् अस्ति। एतदेकं प्राचीनं शिवक्षेत्रं वर्तते। अमरकोशकारेणापि कथितं केदारं नाम क्षेत्रं तस्य नाथः केदारनाथः। केचित् जनाः केदारनाथं रुद्रहिमालयरूपेण आमनन्ति। अयं पर्वतः सुमेरुपर्वतः इत्यपि उच्यते। अस्मिन् प्रदेशे पञ्चपर्वताः सन्ति यथा – रुद्रहिमालयः, विष्णुपुरी, ब्रह्मपुरी, उद्गरिकान्ता, स्वर्गारोहणम् च। अस्मिन् स्थाने स्थितं शिवक्षेत्रं ब्रह्मकपालनाम्ना निर्दिश्यते। श्रीशंङ्कराचार्यः अत्रैव स्थित्वा भाष्यग्रन्थान् रचितवान्। वेदव्यासेन अष्टादशपुराणानि अपि अत्रैव प्रणीतानि।



धार्मिकदृष्ट्या महत्त्वम् – महाभारतयुद्धे पाण्डवाः दुखिताः आसन्। तदा भगवान् वेदव्यासः तान् केदारेश्वरं पूजयितुम् उक्तवान्। अत्रैव ते तपः आचरितवन्तः। तेषां सप्तजनानां मूर्तयः अपि अत्र सन्ति। पाण्डवाः अत्र मन्दिरं निर्मितवन्तः। पाण्डवाः यदा महाप्रस्थानार्थम् अत्र आगतवन्तः तदा तान् दृष्ट्वा शिवः महिषरूपेण धावनं कृतवान्। तद् ज्ञात्वा पाण्डवाः तं ग्रहीतुं प्रयत्नम् अकुर्वन्। तदा महिषरूपः शिवः भूम्याः अन्तः गतवान्। भीमः तं गृहीतवान्। भीमस्य ग्रहणाद् विमोचनात् च प्रयत्नावसरे महिषरूपस्य शिवस्य पृष्ठभागः केदारे अवशिष्टः। अतः केदारनाथः इत्युच्यते। शिवपुराणेऽपि कथितं च यत् नरनारायणौ बद्रीकाश्रमे तपः कृतवन्तौ। तदवसरे तौ शिवस्य पार्थिवलिङ्गस्य पूजां कृतवन्तौ। तयोः तपसा प्रसन्नः शिवः प्रत्यक्षः सञ्जातः। तदनुगुणं केदारे शिवः केदारेश्वरः इति नाम्नाऽभिधीयते। अर्जुनोऽपि अत्रैव तपसा पाशुपतास्त्रं प्राप्तवान्।

प्राकृतिकदृष्ट्या महत्त्वम् – अस्य तीर्थक्षेत्रस्य परिसरः वर्णनातीतः अस्ति। अस्य शिखराणि अपि मनोहराणि वर्तन्ते। अस्य पर्वतस्य नीरवत्वं निर्जनत्वं दृष्ट्वा दुःखीजनोऽपि आनन्दयुक्तः भवति। केदारं प्रति गमनमार्गे अनेकानि रम्यदृश्याणि आयान्ति। मार्गम् उभयतः हिमराशिः महागजः इव दृश्यते। गिरिभ्यः अनेकाः झर्यः प्रवहन्ति। काश्चन झर्यः मन्दाकिन्याम् अन्तर्भवन्ति। जलस्य वेगं दृष्ट्वा शिवताण्डवनृत्यस्य स्मरणं भवति। हिमाच्छादितशिखराणां मध्ये केदारेश्वरः राराजते। अनादिकालादपि एतत् क्षेत्रं यात्रिकान् आकर्षति। अत्रैव द्रौपदी सौगन्धिकापुष्पस्य सुगन्धेन आकृष्टा अभवत्। शैत्यकाले केदारः सम्पूर्णतया हिमावृत्तः भवति। हरिद्वारस्य कुम्भमेलावसरे केदारयात्रायाः अधिकं महत्त्वं वर्तते। केदारयात्रां विना बद्रीयात्रा कदापि पूर्णा न भवति।

## रामेश्वरम्

**परिचयः** – द्वादशज्योतिर्लिङ्गेषु अन्यतमं रामेश्वरक्षेत्रं वर्तते। इदं क्षेत्रं तमिलनाडुराज्यस्य रामनाथपुरमण्डले अस्ति। अयमेकः सुन्दरः द्वीपः अस्ति। चतुर्षु धामसु एतत् दक्षिणधाम इत्युच्यते। पुराणेषु एतत् क्षेत्रं गन्धमादननाम्ना प्रसिद्धम् अस्ति। यात्रा शब्दोच्चारणेन काशी–रामेश्वरयात्रायाः स्मरणं भवति।



धार्मिकदृष्ट्या महत्त्वम् – रामः रावणस्य संहारानन्तरं पुनः गन्धमादनक्षेत्रम् आगतवान्। तत्र सीता अग्निपरीक्षा द्वारा पावित्र्यं प्राकटयत्। तथापि अगस्त्यादिमुनिभिः रामस्य मुखे चिन्ता दृष्टा। रावणसंहारेण ब्रह्महत्यादोषपूर्णः जातः अतः रामः दुःखी आसीत्। मुनयः रामस्य दुःखम् अवगतवन्तः। अतः ते सागरतीरे शिवलिङ्गस्य स्थापनारूपम् उपायं सूचितवन्तः। रामः शिवलिङ्गम् आनेतुं हनुमन्तम् असूचयत्। यदा हनुमान् कैलासं प्राप्तवान् तदा

शिवः तत्र नाऽसीत्। अतः शिवलिङ्गग्रहणे विलम्बः सञ्जातः। अतः सीता मनोबलेन रामस्य पुरतः सिकतानिर्मितं शिवलिङ्गम् अकरोत्। मुनीनाम् आदेशानुसारं सिकतायुक्तशिवलिङ्गस्य स्थापना सञ्जाता। एतदेव रामेश्वरलिङ्गस्य स्थापनां दृष्ट्वा सः दुःखी अभवत्। अतः रामम् अपृच्छत् ''कैलासतः आनीतस्य स्फटिकलिङ्गस्य किं करणीयम् ?'' तदा रामः उक्तवान् सिकतायुक्तशिवलिङ्गं निष्कासयतु। महता प्रयत्नेनाऽपि हनुमान् विफलः सञ्जातः। अतः तं दृष्ट्वा रामः स्वहस्तेन स्फटिकलिङ्गस्य स्थापनां सिकतायुक्तलिङ्गस्य पार्श्वे अकरोत्। अनन्तरं रामः अकथयत् यः मानवः आदौ स्फटिकलिङ्गस्य दर्शनं करिष्यति सः एव उत्तमः फलभोक्ता भविष्यति। अतः स्फटिकलिङ्गस्य दर्शनेन एव यात्रायाः पूर्णता भवति।

प्राकृतिकदृष्ट्या महत्त्वम् – रामेश्वरमन्दिरम् अत्यन्तं भव्यं मन्दिरं वर्तते। उदयनसेतुपतिः अस्य मन्दिरस्य निर्माणकार्यं कृतवान्। प्रायः भारते अत्यन्तं बृहद् मन्दिरं वर्तते। रामेश्वरस्य दक्षिणभागे धनुष्कोटिनामकं स्थानमस्ति। रामेश्वरं प्रकृतिसौन्दर्ययुक्तं पवित्रक्षेत्रमस्ति।

### जगन्नाथपुरी



परिचयः – उडिसाराज्ये स्थिता पुरी सर्वविधान् अपि पर्यटकान् सन्तोषयति। यथा धार्मिकजनाय जगन्नाथदेवालयः तथा समुद्रप्रियाय जनाय स्वर्णतीरं वर्तते।

धार्मिकदृष्ट्या महत्त्वम् – पुरीस्थाः देवालयाः अतिप्रसिद्धाः वर्तन्ते। तत्रापि द्वादशे शतके जगन्नाथमन्दिरस्य गोपुरं चित्ताकर्षकं जातम्। अस्य मन्दिरस्य प्रमुखः देवः भगवान् विष्णुः वर्तते। जगन्नाथमन्दिरस्य वैशिष्ट्यद्वयम् अस्ति। आदौ प्रसिद्धा वार्षिकी रथयात्रा आनन्दविपणिः च।

प्राकृतिकदृष्ट्या महत्त्वम् – जगन्नाथपुरी क्रेतॄणां कृते आनन्ददायिका अस्ति। अत्र हस्तनिर्मितवस्तूनाम्, काष्ठशिल्पानाम् सूक्तिनिर्मितवस्तूनाम् उत्पादनं विशेषतया भवति।

### द्वारकापुरी



परिचयः – द्वारिका भारतस्य पौराणिकस्थलेषु अन्यतमा वर्तते। गुजरातराज्ये अस्याः प्रादुर्भावः जातः। श्रीकृष्णः अस्याः नगर्याः स्थापकः वर्तते। द्वारावती अस्याः अपरं नाम। प्राचीनं नाम कुशस्थली वर्तते।

धार्मिकदृष्ट्या महत्त्वम् – आख्यानतः ज्ञायते यत् श्रीकृष्णस्य राजधान्याः निर्माणार्थं समुद्रः स्वयमेव स्थानं दत्तवान्। अतः श्रीकृष्णः यथेष्टं भूमिं प्राप्तवान्। श्रीकृष्णस्य देहोत्सर्गानन्तरं समुद्रराजः आत्मना दत्तां भूमिं प्रतिस्वीकृतवान्। तत्कारणतः भूमिभागः समुद्रे लीनः सञ्जातः। यः भागः समुद्रराजस्य आसीत् सः भागः समुद्रे लीनः। यः भागः समुद्रराजस्य नाऽसीत् सः भागः तेन न स्पृष्टः। बेटद्वारकानाम्नः अयं द्वीपप्रदेशः अद्यापि द्रष्टुं शक्यः। द्वारावती, कुशस्थली, दारुकावनम् इत्येतानि द्वारिकायाः अपरनामानि। मोक्षदायिकासु अस्याः स्थानमस्ति। हरिवंशे द्वारिकायाः वर्णनमस्ति। विश्वकर्मणा द्वारिकायाः निर्माणम् अभवत्। एषा मायानगरी वर्तते।

प्राकृतिकदृष्ट्या महत्त्वम् – मोक्षदायिकासु नगरीषु अन्यतमा अस्ति द्वारिका। अतः कथितं यत्

**''अयोध्या मथुरा माया काशी काञ्ची अवन्तिका।**
**पुरी द्वारावती चैव सप्तैताः मोक्षदायिकाः॥''**

श्रीकृष्णस्य प्रासाद: रैवतकपर्वतस्य मूलभागे वर्तते। अस्य भूयान् भाग: गुल्मै: आवृत्त:। प्राचीनमूर्तीनां स्मारकाणां च अवशेषा: अस्मिन् प्रदेशे उपलभ्यन्ते। अनेन ज्ञायते यत् द्वारिका अतीव प्राचीना नगरी वर्तते। आधुनिकद्वारिकायाम् अनेका: शैक्षणिकसंस्था: सन्ति। द्वारकावासिन: अद्यापि साभिमानं वदन्ति यद् नगर्या: राज्यभारं श्रीकृष्ण: स्वयं निर्वहति।

**उपसंहार: -** **''धर्म एव हतो हन्ति धर्मो रक्षति रक्षित:''** इति सूक्त्यनुसारं धर्मरक्षया विना अस्माकं रक्षा न भविष्यति। एवञ्च धर्मरक्षां विना अस्माकं रक्षा न। अत: भारतस्य यानि धार्मिकस्थलानि वर्तन्ते तेषां ज्ञानं मनसि अवधारणीयम्। 'यत्र स्वच्छता तत्र प्रभुता' इति न्याय्येन अस्माकं धार्मिक स्वच्छानि भवेयु: इति आशास्महे।

## स्वाध्याय:

**१. योग्य विकल्पं चित्वा उत्तरं लिखत ?**

(१) बद्रीनाथक्षेत्रं भारतस्य कस्मिन् राज्ये वर्तते ?

(क) गुजरातराज्ये (ख) महाराष्ट्रराज्ये (ग) उत्तराखण्डराज्ये (घ) आसामराज्ये

(२) बद्रीनाथस्य स्थापना केन कृता ?

(क) रामेण (ख) परशुरामेण (ग) कृष्णेन (घ) शङ्कराचार्येण

(३) केदारम् इत्यस्य क: अर्थ: ?

(क) क्षेत्रम् (ख) खनित्रम् (ग) पवित्रम् (घ) लवित्रम्

(४) जगन्नाथमन्दिरस्य प्रमुख: देव: क: वर्तते ?

(क) शङ्कर: (ख) विष्णु: (ग) ब्रह्मा (घ) इन्द्र:

(५) द्वारकाया: स्थापना केन कृता ?

(क) शंङ्करेण (ख) ब्रह्मणा (ग) लक्ष्म्या (घ) श्रीकृष्णेन

(६) गन्धमादन: कस्य अपरं नाम वर्तते ?

(क) हरिद्वारस्य (ख) बद्रीनाथस्य (ग) रामेश्वरस्य (घ) कर्णावत्या:

(७) केदारनाथक्षेत्रे कति पर्वता: सन्ति ?

(क) पञ्च (ख) सप्त (ग) अष्ट (घ) नव

**२. संयोजनं कुरुत।**

| **अ** | **ब** |
|---|---|
| (१) केदारनाथ: | तमिलनाडु: |
| (२) रामेश्वरम् | गुजरातम् |
| (३) द्वारकापुरी | उत्तराखण्ड: (चमोलीप्रदेश:) |
| (४) जगन्नाथपुरी | उत्तराखण्ड: (रुद्रप्रयाग:) |
| (५) बद्रीनाथ: | उडिसा |

**३. एकेन वाक्येन उत्तरं लिखत।**

(१) वेदव्यासस्य आश्रमः कस्मिन् क्षेत्रे वर्तते ?

(२) मूर्तिदेव्याः पितुः नाम किम् आसीत् ?

(३) उदयनसेतुपतिः कस्य मन्दिरस्य निर्माणं कृतवान् ?

(४) स्फटिकलिङ्गस्य स्थापना केन कृताऽस्ति ?

(५) मोक्षदायिकाः कति वर्तन्ते ?

**४. द्वित्रिर्वाक्यैः उत्तरं लिखत।**

(१) के पञ्च पर्वताः ? तेषां नामानि लिखत।

(२) अमरकोशानुसारं केदारनाथस्य व्याख्यां लिखत।

(३) रामः किमर्थं दुःखी आसीत् ?

(४) जगन्नाथमन्दिरस्य वैशिष्ट्यद्वयं लिखत।

(५) बेटद्वारकायाः स्थापना किमर्थम् अभवत्।

(६) सिकतालिङ्गस्य स्थापना केन कारणेन सञ्जाता ?

(७) केनोपायेन वेदव्यासेन पाण्डवानां दुःखनिवारणं कृतम् ?

**५. सविस्तरमुत्तरं लिखत।**

(१) बद्रीनाथस्य प्राकृतिकसौन्दर्यं वर्णयत।

(२) रामेश्वरस्य स्थापनायाः वर्णनं कुरुत।

**छात्रप्रवृत्तिः**

- एतादृशानाम् अन्येषां पर्यटनस्थलानां ज्ञानं प्राप्तव्यम्।
- चतुर्यात्राधामविषये परिचयः प्राप्तव्यः।

**सुभाषितम्**

**आहारनिद्राभयमैभुनञ्च सामान्यमेतत्पशुभिर्नराणाम्।**
**धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः॥**

| ८ | भारतीयशिक्षा |
|---|---|

# ८ भारतीयशिक्षा

**प्रस्तावना**

भारते शिक्षापरम्परा कदाचित् विश्वस्य सर्वादिमकाले एव प्रवर्तिता स्यात्। यदा अन्यराष्ट्रेषु जनाः सभ्यजीवनस्तरं शिक्षयन्ति स्म तदानीं तु भारते अध्यात्मचिन्तनं विकसितमभूत् नात्र संशयः। अतः शिक्षाव्यवस्था भारतराष्ट्रे सदैव विकासोन्मुखिनी प्रवहमाना परिवर्तमाना च दरीदृश्यते। अस्मिन् पाठे वयं भारतीयशिक्षाव्यवस्थां माध्यमिक-उच्चतरमाध्यमिकस्तरानुगुणां पुनश्च उच्चशिक्षानुगुणां पठिष्यामः।

---

## शिक्षापरिचयः

भारतीयशिक्षाप्रणाल्याः अभ्यसनात् पूर्वं तस्याः इतिहासः अस्माभिः अध्येतव्यः एव। एतदर्थं दिङ्मात्रं यथाकालं निर्देशनं क्रियते। तत्र वैदिककालीनशिक्षाप्रणाली, बौद्धकालीनशिक्षाप्रणाली, मुगलकालीनशिक्षाप्रणाली (१६शताब्दात्), ब्रिटिशकालीनशिक्षाप्रणाली (१८ शताब्द्याः उत्तरार्धतः) च तत्र एव शिक्षायोगाः वा प्रतिवेदनानि समावेष्टुं शक्नुमः। तत्र मेकाले संस्तुतयः (१८३३), चार्ल्सवुड (१८५३), विलियमहण्टर (१८८२), लोर्ड कर्जन (१९०२-१९०४), सेडलर संस्तुतयः (१९१७-१९), हर्टाग् आयोगः (१९२९), सार्जन्ट् प्रतिवेदनम् (१९४०-१९४६) च।

**स्वातन्त्र्यकालादनु भारते शिक्षा** - २० शताब्द्याः उत्तरार्धतः तत्र विविधशिक्षास्तरपरिष्कर्तारः आयोगाः अभूवन्। यथा - विश्वविद्यालयानुदानायोगः (१८४८-४९), माध्यमिकशिक्षा-आयोगः (१९५२), कोठारी-आयोगः (१९६४) राष्ट्रिय-शिक्षा-नीतिः (१९८६), राष्ट्रियशिक्षानीतेः समीक्षा (१९९०), राष्ट्रिय-अध्यापकशिक्षापरिषद् (१९९३) च।

एतादृग्रीत्या भारतीयशिक्षाप्रणाल्याः उद्गमः विकासश्च ऐतिह्याः आमनन्ति। अथ तावत् भारतराष्ट्रे एतल्लेखनावसरे या शिक्षाप्रणाली निर्धारितास्ति तां परिचिनुमः।

| | | |
|---|---|---|
| १. | पूर्वप्राथमिकस्तरः | कक्षा १ तः ५ यावत् |
| २. | उच्चप्राथमिकस्तरः | कक्षा ६ तः ८ यावत् |
| ३. | माध्यमिकस्तरः | कक्षा ९ तः १० यावत् |
| ४. | उच्चमाध्यमिकस्तरः | कक्षा ११ तः १२ यावत् |
| ५. | उच्चशिक्षा | स्नातकस्तरः (त्रिवर्षीयः/चतुर्वर्षीयः)<br>अनुस्नातकस्तरः (द्विवर्षीयः) |

**पूर्वप्राथमिकस्तरः** अस्मिन् स्तरे लघुतमपञ्चवर्षीयः सन् छात्रः प्रवेशार्हः भवति। पाठ्यक्रमः प्रायः क्षेत्रविशेषाधारितः भिन्नः भिन्नः च भवति। स्तरेऽस्मिन् श्रवण-वाचन-कथनलेखनाधारितं भाषाकौशल्यज्ञानं समाविष्टं भवति। मातृभाषा वा क्षेत्रीयभाषा, आङ्ग्लभाषा, गणितम्, पर्यावरणम्, हिन्दी प्रायः इमे विषयाः पाठ्यन्ते। प्रवृत्त्याधारितशिक्षणे विशिष्टं बलं दीयते।

**उच्चप्राथमिकस्तरः** अस्मिन् स्तरे अक्षरज्ञानवतां बालानां समूहः काञ्चन प्रौढतां प्राप्य विषयवैविध्यं शिक्षयितुम् आरभते। पूर्वोक्तविषयैस्सह संस्कृतम्, शारीरिकशिक्षणम्, चित्रकला, सङ्गीतम्, सङ्गणकम् इत्यादीनामपि शिक्षणं दीयते। प्राथमिकशिक्षायै तस्याः गुणाभिवृद्ध्यै च भारतीयसर्वकारस्य कश्चन श्लाघ्यः यत्नोऽस्ति - ''सर्वशिक्षा-अभियानम्'' इति योजना। एतदतिरिक्तं पाठ्यक्रमनिर्धारणं, विद्यालयीयपर्यवेक्षणं च N.C.E.R.T. संस्थया भवति। ''सर्वशिक्षाभियानम्'' इति योजनानुगुणं भारतस्य प्रायः प्रत्येकं ग्रामे एकस्याः प्राथमिकशालायाः सौविध्यं प्रदीयते तत्र आधुनिकीः भौतिकसुविधाः प्रदातुं सर्वकारः सन्ततं प्रयतते। प्राथमिकस्तरे मध्याह्नभोजनयोजना, शिष्यवृत्तिः, राष्ट्रिय-

प्रतिभा-शोध-परीक्षा, नवोदयविद्यालयाः इत्यादयः विविधाः प्रकल्पाः सर्वकारेण प्रचाल्यन्ते। भारतीयसंविधानस्य अनुच्छेदः ''२१-A'' इत्येतदनुसारं षड्वर्षात् चतुर्दशवर्षीयाणां बालानां निःशुल्कमनिवार्यञ्च शिक्षणं भवेदिति सर्वकारस्य परमं कर्त्तव्यमस्ति।

**माध्यमिकस्तरः**

अत्र शिक्षणे विषयागाम्भीर्यं समायाति। पाठ्यक्रमे क्षेत्रानुगुणा मातृभाषा (क्षेत्रीयभाषा), आङ्ग्लभाषा, गणितम्, विज्ञानम्, सामाजिकविज्ञानम्, मुख्यविषयाः, संस्कृतम्, उर्दू, पारसी, सङ्गणकम्, शारीरिकशिक्षणम्, चित्रकला, सङ्गीतम् इत्यादयो गौणविषयाः सङ्कलितास्सन्ति। अस्मिन् स्तरे संस्कृतमाध्यमेन प्रचलतां विशिष्टविद्यालयानां समावेशः भवति। संस्कृतविद्यालयेषु एतं स्तरं प्रथमाकक्षीयं मन्यते। दशमीकक्षा समकक्षः वर्गः प्रथमाद्वितीयं वर्षं गण्यते। सामान्यतः सर्वशिक्षाभियानवत् माध्यमिकशिक्षास्तरोन्नयनाय, तत्सार्वत्रिककरणाय च केन्द्रसर्वकारेण ''राष्ट्रिय-माध्यमिकशिक्षा-अभियानम्'' प्रारब्धः कश्चन-प्रकल्पः वर्तते। अस्यां योजनायां प्रत्येकं पञ्चयोजन (५ km.) परिमितेषु क्षेत्रेषु माध्यमिकविद्यालयस्य स्थापना कर्तव्या। ग्रामीणजनाः, सीमान्तप्रदेशीयजनाः, अनुसूचितवर्गीयाः, अल्पसङ्ख्यकवर्गीयजनाः, माध्यमिकशिक्षया वञ्चिताः न स्युरिति अस्याः योजनायाः मुख्यमुद्देश्यं वर्तते। गुजरातसर्वकारेण बालिकानां शिक्षाभिरुचिं वर्धयितुं ''सरस्वतीसाधनायोजना'' विहितास्ति। यस्याम् अनुसूचित-सामाजिक-निम्नवर्गीयाभ्यः बालाभ्यः द्विचक्रिकायानप्रदानं क्रियते। छात्राणां परीक्षादीन् राज्यसर्वकारः उत केन्द्रिय-माध्यमिक-शिक्षा-सङ्घटनम् (C.B.S.E.) निर्वहति।

**उच्चतरमाध्यमिकशिक्षा**

प्रायः उच्चतरमाध्यमिकशिक्षा षोडशवर्षीयबालेभ्यः प्रारभते। उच्चतरमाध्यमिकशिक्षायाः एतदर्थमधिकं महत्त्वं वर्तते यद् अस्यां व्यावसायिककौशल्यवर्धनाय, जीवनवृत्तिनिर्वाहाय छात्रेभ्यः विषयचयनावसरः दीयते। लघुतमषोडशवर्षीयाः छात्राः एकादशीं कक्षां प्रविशन्ति। तेषां कृते पन्थानः त्रयः भारते विद्यमानाः भवन्ति तद्यथा विज्ञानम्, वाणिज्यम्, विनयनम् इति। अथ विज्ञानाविषयमाधृत्य छात्रः तत्रापि द्विविधं मार्गं निश्चेतुं शक्नोति ''समूहः अ'' (Group A)। अस्मिन् समूहे छात्रेण आङ्ग्लभाषा, भौतिकविज्ञानम्, रसायणविज्ञानम्, गणितम् इति मुख्यविषयाः अध्येतव्याः। विज्ञाने द्वितीयः मार्गः अस्ति ''समूहः ब'' (Group B)। अस्मिन् आङ्ग्लभाषा, रसायणविज्ञानम्, भौतिकविज्ञानम्, जीवविज्ञानञ्चेति प्रमुखविषयाः अध्येतव्याः। सङ्गणकम्, संस्कृतम्, शारीरिकविज्ञानम्, क्षेत्रीयभाषाः च इमे विषयाः वैकल्पिकविषयाः भवन्ति अत्र। द्वितीयः पन्था वर्तते 'वाणिज्यम्'। यत्र प्राधान्येन अर्थशास्त्रम्, साङ्ख्यकी (Account), व्यापारः (Commerce) इत्यादिविषयाः मुख्याः भवन्ति। तृतीयः प्रवाहोऽस्ति विनयनप्रवाहः वा कलाप्रवाहः। अस्मिन् - इतिहासः, भूगोलम्, नागरिकशास्त्रम्, राजनीति-विज्ञानम्, समाजशास्त्रम्, शारीरिकशिक्षणम्, भाषाः, मनोविज्ञानम्, दर्शनशास्त्रम् इत्यादिषु विषयेषु कमप्येकं प्रधानत्त्वेन अपराञ्च विषयान् गौणविषयत्त्वेन पठितुं पारयामः। उच्चतरमाध्यमिकशिक्षायां त्रिष्वपि प्रवाहेषु सर्वाधिकं विषयक्षेत्रं यद्यपि विनयप्रवाहे वर्तते, परं प्रायः छात्राः विज्ञानप्रवाहे सर्वाधिकं स्निह्यन्ति। माध्यमिकस्तरवत् अस्यापि परीक्षादीनां निर्वहणं राज्यसर्वकारस्य परीक्षा-सङ्घटनेन वा केन्द्रस्य C.B.S.E. इत्यभिधेन सङ्घेन कर्तव्यं भवति। संस्कृतमाध्यमेन प्रचलत्सु विद्यालयेष्वपि छात्राः अस्मिन् स्तरे विषयचयनावसरं प्राप्नुवन्ति। अत्र प्रायः व्याकरणम्, साहित्यम्, ज्योतिषम्, पौरोहित्यम् वेदः, दर्शनशास्त्रम्, न्यायशास्त्रम्, पुराणशास्त्रञ्च एभ्यः विषयेभ्यः कमप्येकं प्रमुखविषयं स्वीकर्तुं शक्नुमः। एतत् तु सर्वविदितमेव यत् द्वादश्याः कक्षायाः परिणामानुरूपं शिक्षायाः अग्रिमे सर्वोच्चशिखरभूतस्तरे नाम उच्चशिक्षायां छात्राः प्रवेष्टुं शक्नुवन्ति। भारते नैकाः महाविद्यालयाः विश्वविद्यालयाश्च सन्ति। तेषूत्कृष्टमहाविद्यालयेषु वा विश्वविद्यालयेषु प्रवेशाय केचन मानदण्डाः निर्धारिताः भवन्ति। तेषु मानदण्डेषु अनन्यतमोऽस्ति द्वादशीकक्षायाः परिणामः, अतः अस्य उच्चतरमाध्यमिकस्तरस्य महत्त्वमधिकं वर्तते।

**उच्चशिक्षा**

पूर्वार्जितशिक्षायां कौशल्यानि, प्रौढताम्, दक्षताञ्चानेतुम् अयं स्तरः अवसरं यच्छति। भारते उच्चशिक्षास्तरः द्विधा विभक्तः, तद्यथा स्नातकविभागः (त्रिवर्षीयः कुत्रचिच्च चतुर्वर्षीयः) अनुस्नातकविभागश्च।

**स्नातकविभागः**

प्रायः अष्टादशवर्षीयः सन् अस्मिन् स्तरे प्रवेशार्हो भवति। महाविद्यालयेषु वाणिज्यम्, विनयनम्, विज्ञानञ्चेति विषयत्रिके कमप्येकं विषयमवलम्ब्य तत्रापि पुनः यस्मिन् कस्मिन् प्रमुखविषये दक्षतां प्राप्नुवन्ति छात्राः। चतुर्वर्षीयपाठ्यक्रमे अभियन्तृ-स्नातकपदवी औषधी-स्नातकपदवी (Pharmaceuticals) प्रविधि-कार्यक्रम-स्नातकपदवी (Technology Programmes) इमाः समाविष्टाः सन्ति। बहुधा त्रिवर्षीयः स्नातकपदवीपाठ्यक्रमः भवति। एतस्य स्तरस्य परीक्षादिकं राज्यस्तरीयाः वा केन्द्रस्तरीयाः विश्वविद्यालयाः निर्वहन्ति। साम्प्रतं भारते (फरवरी २०१७ पर्यन्तम्) ७८९ विश्वविद्यालयाः (केन्द्रराज्यमानितमुक्ताः च) ३७२०४ महाविद्यालयाश्च सन्ति। ११४४३ स्वायत्तकेन्द्राणि सन्ति। पुनरेते उत्तरोत्तरं प्रवर्धमानाः स्युरेव।

**अनुस्नातकविभागः**

अनुस्नातकविभागे द्विवर्षीयः पाठ्यक्रमः भवति। अत्र स्नातकस्तरापेक्षया विषयनैपुण्यं, व्यावसायिककौशल्यञ्च काञ्चन वैदग्ध्यतां विलक्षणतामुपैति। पाठ्यक्रमे प्रायः पञ्चषाः विषयाः भवन्ति। अनुस्नातककक्षोत्तीर्णः "Master" (आचार्यः) इति पदव्या बहुमान्यते। भारतसर्वकारस्य उत्तरदायित्त्वमस्ति यत् सः उच्चशिक्षास्तरमुन्नयेत् इति। एतदर्थं केन्द्रसर्वकारस्य मानवसंसाधनविकासमन्त्रालयः इत्यभिधः विभागः प्रमुखभूमिकां निर्वहति। अस्य मन्त्रालयस्य प्रमुखा संस्थास्ति ''विश्वविद्यालयानुदानायोगः'' (U.G.C.)। विश्वविद्यालयानुदानायोगेन अखिलविश्वविद्यालयानाम् आर्थिकः, भौतिकः, शैक्षिकश्च विकासः करणीयः भवति। "NAAC" (राष्ट्रियमूल्याङ्कन-मानकीकरणसंस्था) च "AICTE" (अखिलभारतीयप्राविधिकशिक्षा संस्था) इमे द्वे संस्थे उच्चशिक्षायाः गुणवत्तां स्तरञ्चोन्नेतुं निजयोगदानं पर्यवेक्षण-मूल्याङ्कनरूपेण ददाते। संस्कृतमाध्यमेन प्रचलत्सु महाविद्यालयेषु विश्वविद्यालयेषु च छात्राः पूर्वोक्तविषयेषु दक्षतां प्राप्तुमर्हन्ति। अत्र शास्त्री (B.A. समकक्षः), आचार्यः (M.A. समकक्षः), तत्त्वाचार्यः (M.phil.) इमे पाठ्यक्रमाः संस्कृतविश्वविद्यालयैः प्रचाल्यन्ते। पुनश्च विद्यावारिधिः (Ph.D.), विद्यावाचस्पतिः च (D. Lit.) एतयोरपि समावेशः उच्चशिक्षायां भवति। व्यावसायिकाभिवृत्तिं पोषयितुं शिक्षाशास्त्री (B.Ed.), शिक्षाचार्यः (M.Ed.) एतौ संवर्गौ अपि उच्चशिक्षायाः अङ्गे एव। राष्ट्रिय-संस्कृत-संस्थानम्-नवदेहली, राष्ट्रियसंस्कृतविद्यापीठम्-तिरुपतिः, श्रीसोमनाथ संस्कृतयुनवर्सिटी-वेरावलम्, श्रीजगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतयुनि.-जयपुरम्, ''श्री सम्पूर्णानन्दसंस्कृत विश्वविद्यालयः - काशी एते प्रमुखाः सन्ति।

**उच्चत्तरमाध्यमिकशिक्षायाः आवश्यकता महत्त्वञ्च।**

अनुमाध्यमिकस्तरम् विभागोऽयं व्यावसायिकाभिगमं विकासयितुं महत्त्वं विदधाति। छात्रेषु स्वरुचिविषयानुगुणं प्राथमिकाभिबोधः, कौशलानि, चिन्तन-रचनाशैली च वृद्धिमानेतुं शक्नुमः। छात्रः वाणिज्य-विनयन-विज्ञानेषु कस्मिन् क्षेत्रे अधिकां मनोवृत्तिं रुचिं वा धत्ते ? तदनुगुणं तस्य मार्गदर्शनं कर्त्तुम् अवसरोऽस्मिन् स्तरे एव प्राप्यते। छात्रस्य मनोविकासः स्मृतिशक्तिश्च अस्मिन् स्तरे माध्यमिकप्राथमिकस्तराणामपेक्षया काञ्चन प्रौढतां प्राप्तवती स्यादतः छात्रेषु राष्ट्रिय-सामाजिकमूल्यानि प्रति जागरूकतां सङ्घभावनाञ्चोत्पादयितुम् अयं स्तरः भूमिकां निर्वहते।

**उच्चशिक्षायाः आवश्यकता महत्त्वञ्च।**

भारते सर्वविधसर्वकारीयनियुक्तिषु प्रायः लघुतममानदण्डः निर्धारितोऽस्ति यत् आवेदकछात्रः द्वादशकक्षा-उत्तीर्णः स्यात्। परं विशिष्टयोग्यतायै तत्र उच्चशिक्षा अत्यावश्यकी भवति। अयं स्तरः परिपक्वताकालत्वेन गण्यते छात्रजीवने, यत्र छात्राः स्वरुचि-अनुगुण-निश्चित-विषयेषु गाम्भीर्यं दक्षताञ्च भजन्ते। अस्मात् स्तरात् पारङ्गताः विद्यार्थिनः विविधाभिः वृत्तिभिः व्यवसायैर्वा समाजस्य राष्ट्रस्य च उन्नत्यै निजयोगदानं ददति। आजीविकासु वा वृत्तिषु विज्ञानप्रवाहावलम्बिनः छात्राः - चिकित्सकाः, अभियन्तारः, वैज्ञानिकाः अवकाशशास्त्रिणः, वनाधिकारिणः,

सङ्गणकम्-अभियन्तारः, ओषधीज्ञाश्च भवितुमर्हन्ति। वाणिज्यप्रवाहे व्यवस्थापकः (B.M.S.), व्यवसाय-प्रबन्धकः (B.B.M.), व्यवसायसञ्चालकः (B.B.A.), अधिकृतलेखपालः (C.A.), वित्तकोषाधिकारी (Banking), लिपिकः (Clerk), निवेशविश्लेषकः (Investment Analyst) इत्याद्याः वृत्तयः सन्ति। विनयनप्रवाहे सङ्गीतज्ञः, शिक्षकः, प्राध्यापकः, लेखकः, कविः, मनोविज्ञानी, सामाजिकविश्लेषकः, पत्रकारः, कलाकारः, दिग्दर्शकः, नर्तकः, लिपिकः, आरक्षकः इत्याद्याः नैकाः वृत्तीः प्राप्तुमर्हति छात्रः। अयं स्तरस्येदमपि महत्त्वं यत् अत्र उच्चमाध्यमिकस्तरे विषयचयने सञ्जातत्रुटीः परिष्कर्तुं कञ्चनावसरं प्रददाति। अस्मिन् स्तरे तु विषयसन्दर्भे छात्रमानसे अद्वैतमेवोपतिष्ठेत्। छात्रः स्वाभिव्यक्तिं पूर्णस्वतन्त्रतया प्रकटीकर्तुमवसरान् प्राप्नोति। भारतस्य संवधानं प्रति, सामाजिककर्तव्यानि प्रति, निजपरिवारञ्च प्रति छात्रस्य उत्तरदायित्वम् अस्मिन् स्तरे अधिकं स्पष्टं भवति।

**उपसंहारः**

भारतराष्ट्रे उभयोः उच्चतरमाध्यमिक-उच्चशिक्षयोरेव महिमा विद्यते एव। अद्यास्मिन् प्राविधिके वैज्ञानिके च युगे ''उच्चशिक्षा तु सर्वैः प्राप्तव्या'' इति अलिखितः सामान्यश्च नियमः सञ्जातोऽस्ति। एतदर्थं भारतसर्वकारः नितरां स्वभूमिकां सुचारुतया वहमानः दरीदृश्यते। एवन्तु शिक्षायाः औपचारिकं स्वरूपं दृष्टमस्माभिः। परम् अनौपचारिकशिक्षा तु आजीवनं प्रचलन्ती काचित् प्रक्रियास्ति। उक्तञ्च ऋग्वेदे - **''वयं प्रकृत्या यज्ज्ञानं प्राप्नुमः तद् शिक्षा'' इति।**

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा उत्तरं लिखत ?**

(१) भारते राष्ट्रियशिक्षानीतिः कस्मिन् वर्षे पारिता अभवत् ?

(क) १९९२ (ख) १९८६ (ग) १९९३ (घ) २००१

(२) १२ शताब्द्यां भारते केषां शिक्षायाम् अधिकारः अभूत् ?

(क) आङ्ग्लानाम् (ख) बौद्धानाम् (ग) मुगलशासकानाम् (घ) ब्राह्मणानाम्

(३) प्राथमिकस्तरे कीदृशः छात्रः प्रवेशं प्राप्तुमर्हति ?

(क) सप्तवर्षीयः (ख) दशवर्षीयः (ग) पञ्चवर्षीयः (घ) अष्टवर्षीयः

(४) '' ६ तः १४ वर्षीयेभ्यः बालेभ्यः निःशुल्कं शिक्षणं दातव्यम्'' इति कस्मिन् अनुच्छेदे विहितमस्ति ?

(क) ३१ तमे (ख) २१-A तमे (ग) २१-B तमे (घ) २३ तमे

(५) "AICTE" संस्थैषा कस्मिन् स्तरे भूमिकामावहति ?

(क) प्राथमिकशिक्षायाम् (ख) उच्चशिक्षायाम्

(ग) माध्यमिकशिक्षायाम् (घ) उच्चतरमाध्यमिकशिक्षायाम्

(६) ''सरस्वतीसाधनायोजना'' कासां बालानां कृते विद्यते ?

(क) अनुसूचितजातीय-सामाजिकनिम्नवर्गीयाभ्यः बालाभ्यः (ख) उच्चवर्गीयाभ्यः बालाभ्यः

(ग) अल्पधनिकाभ्यः बालाभ्यः (घ) अशिक्षितबालाभ्यः

(७) २०१७ –फरवरीमासस्य प्रतिवेदनानुरूपं भारते कति विश्वविद्यालयाः आसन् ?

(क) ७८०　　(ख) ७०३　　(ग) ७८९　　(घ) ७५५

(८) संस्कृतविद्यालयेषु एतद्विषयः प्रमुखविषयत्वेन न वर्तते –

(क) व्याकरणम्　　(ख) वेदान्तः　　(ग) शारीरिकशिक्षा　　(घ) न्यायः

**२. एकेन वाक्येन उत्तरं लिखत।**

(१) कयोश्चिद् द्वयोः ब्रिटिशशिक्षायोगयोः (भारते) नामनी लिखत।

(२) प्राथमिकस्तरे केषां भाषाकौशल्यानां ज्ञानं भवति ?

(३) विज्ञानप्रवाहे "A समूहे" (Group-A) के विषयाः समाविष्टाः ?

(४) उच्चशिक्षायाः कौ द्वौ विभागौ स्तः ?

(५) ऋग्वेदमते शिक्षणव्याख्या का ?

(६) केषाञ्चन त्रयाणां संस्कृतविश्वविद्यालयानां नामानि लिखत ।

**३. द्वित्रिर्वाक्यैः उत्तरं लिखत।**

(१) व्यावसायिकोद्देश्यान् पूरयितुम् उच्चशिक्षायां के विशिष्टाः संवर्गाः समाविष्टाः सन्ति ?

(२) वाणिज्यप्रवाहेण छात्रः किं किं भवितुमर्हति ?

(३) राष्ट्रिय-माध्यमिकशिक्षा-योजनायाः कार्यत्रयं लिखत।

(४) पाठानुसारं प्रत्येकं स्तरानुगुणं कक्षाणां विभागं कुरुत।

**४. सविस्तरम् उत्तरं लिखत।**

(१) उच्चप्राथमिकस्तरविषये दशवाक्यानि लिखत।

(२) उच्चमाध्यमिकस्तरे प्रवाहानुरूपं पाठ्यक्रमं लिखत।

(३) उच्चशिक्षायाः महत्त्वं प्रतिपादयत।

(४) विनयन – प्रवाहावलम्बिभ्यः छात्रेभ्यः आजीविकास्रोतांसि कानि ?

**५. टिप्पणी लेख्या।**

(१) "सर्वशिक्षा-अभियानम्"।

(२) उच्चमाध्यमिकस्तरस्य आवश्यकताः प्रतिपादयत।

(३) संस्कृतपाठशालासु उच्चतरमाध्यमिकशिक्षा उच्चशिक्षाव्यवस्था च।

**विशिष्टशब्दसूचिः**

NATIONAL ASSESSMENT & ACCREDITATION COUNCIL

राष्ट्रिय मूल्याङ्कन-मानकीकरण संस्था (NAAC)

NATIONAL COUNCIL FOR TEACHER EDUCATION

राष्ट्रिय-अध्यापक-शिक्षा-परिषद् (N.C.T.E.)

NATIONAL COUNCIL OF EDUCATIONAL RESEARCH & TRAINING

राष्ट्रिय-शैक्षणिक अनुसन्धान-प्रशिक्षण-परिषद् (N.C.E.R.T.)

CENTRAL BOARD OF SECONDARY EDUCATION

केन्द्रिय-माध्यमिकशिक्षा-सङ्घः (C.B.S.E.)

ALL INDIA COUNCIL FOR TECHNICAL EDUCATION

अखिल-भारतीय-प्रविधि-शिक्षा-संस्था (AICTE)

| | | |
|---|---|---|
| BMS | - | BACHELOR OF MANAGEMENT STUDIES |
| B.B.A. | - | BACHELOR OF BUSINESS ADMINISTRATION |
| B.B.M. | - | BACHELOR OF BUSINESS MANAGEMENT |
| C.A. | - | CHARTERD ACCOUNTANT |
| अभियन्ता | - | ENGINEER |
| लिपिकः | - | CLERK |
| वित्तकोषाधिकारी | - | BANK MANAGER |
| चित्रकारः | - | PAINTER/PHOTOGRAPHER |

**छात्रप्रवृत्तिः**

- छात्रैः स्वक्षेत्रस्य विश्वविद्यालयस्य साक्षात्कारः कर्तव्यः।

**सुभाषितम्**

**मातेव रक्षति पितेव हिते नियुङ्क्ते,**
**कान्तेव चापि रमयत्यपनीय खेदम्।**
**लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं,**
**किं किं न साधयति कल्पलतेव विद्या॥**

•

# ९ भारतीयसंविधानम्

**प्रस्तावना**

जगति जायमानः सर्वोऽपि जनाः स्वेच्छया स्वातन्त्र्येण वा स्वजीवनं जीवितुमिच्छति। एतदर्थं तेन सामाजिकी काचित् भूमिकापि निर्वहणीया भवति। नियमाः पालनीयाः भवन्ति। पूर्वस्मिन् काले भारतराष्ट्रे राजानः एव प्रजाः शासति स्म। प्रजायाः पालन - रक्षण - निरीक्षणदिसमग्रं तेषामेव स्कन्धेषु आरूढमासीत्। कालान्तरे (विशेषतः आङ्ग्लशासकानामागमनात् परम्) भारतीयशासनव्यवस्थायां भारतीयजनानां मनोवृत्तावपि आमूलं परिवर्तनं समागच्छत्। अन्यराष्ट्रवत् भारतेऽपि अनुस्वातन्त्र्यकालं राष्ट्रस्य नागरिकाणाम् अपेक्षा-आकाङ्क्षा - नियम - उत्तरदायित्त्व - इत्येतानि निर्धारयितुं शासनप्रणालीं परिष्कर्तुं च संविधानस्य महती आवश्यकता उदभूत्। अथ अस्मिन् पाठे वयं भारतीयसंविधानविषये परिचयं प्राप्स्यामः।

---

## संविधानेतिहासः, रचना च




सर्वप्रथम १९३५ तमे खिस्ताब्दे राष्ट्रिय-कॉङ्ग्रेस-दलेन संविधानसभां रचयितुं याचिका कृता। अस्माकं संविधानस्य रचनासभायाः प्रथमम् अधिवेशनम् १९४६ तमे वर्षे ९ दिसम्बरदिवसे अभवत्। १९४७ तमे वर्षे २९ अगस्तदिने संविधानरचनायाः एका समितिः निर्मिता। संविधानसभायाः कार्यकारि-अध्यक्षः डॉ. सच्चिदानन्दसिंहामहोदयः आसीत्। संविधानस्य परिरेखसमितेः अध्यक्षः भारतीयसंविधानस्य रचनाकर्ता च डॉ. भीमराव (बाबासाहेब) आम्बेडकरः आसीत्। एतत् संविधानं संविधानसभायां २६ नवम्बर १९४९ तमे दिने प्रस्तुतमभवत्। संविधानरचनं समावेशनञ्च २ वर्षे, ११ मासाः १८ दिनानि (१०८३ दिनानि प्रायः) यावत् समचलत्। एतच्च सुविदितमेव यदस्य संविधानस्य सर्वसम्मत्या क्रियान्वयीकरणं २६ जनवरी १९५० तमाद् दिवसाद् अभवत्। अतो हि अमुं दिवसं वयं भारतीयाः प्रजासत्ताकदिवसत्वेन परिगणयामः सम्मानयामश्च। भारतीयप्रजाः यान् प्रान्तीयसभासदस्यान् चितवत्यः ते सदस्याः संविधानरचनसभ्यान् चितवन्तः। भारतीयसंविधानरचनसभायां विविधप्रदेशानाम्, विविधसमुदायानां च प्रतिनिधिजनाः विविधराजनीतिज्ञाश्च आसन्। जवाहरलालनेहरू-सरदारवल्लभभाई-पटेल - मौलाना अब्दुल कलाम् - आजाद - श्यामाप्रसादमुखर्जी इत्यादयः संविधानरचनस्य चिन्तनसभायां भागमवहन्। संविधानरचनसभ्येषु - आङ्ग्लभारतीयजनानां प्रतिनिधिः फ्राङ्क एण्टनि, पारसिजनानां च प्रतिनिधिः एच. पी. मोदी महोदयः आसीत्। खिस्तिसमुदायस्य प्रतिनिधिः हरेन्द्रकुमारमुखर्जी, सरोजिनी नायडु - विजयालक्ष्मीपण्डित - प्रधानमहिला सदस्ये आस्तान्। एतदतिरिच्य शरत् चन्द्रबोस, गोविन्दवल्लभपन्त, आचार्य जे. बी. कृपलानी इत्याद्याः महानुभावाः अपि सदस्याः आसन्। योगेन ३८९ सभ्याः (२९६ ब्रिटिशशासितभारतस्य + ९३ देशीयराज्यानाम्) तस्यां सभायां भूमिकामवहन्।

## संविधानस्य महत्त्वम्

भारतीयं संविधानं सर्वेषु लिखितसंविधानेषु दीर्घतमम् अस्ति। संविधानं सर्वकारस्य कार्याङ्गम्, शासकाङ्गम्, न्यायाङ्गञ्च व्यवस्थापयति। संविधानं प्रत्येकम् अङ्गस्य अधिकारान् निर्दिश्य उत्तरदायित्वं च निश्चिनोति। सर्वकारः संविधानानुगुणमेव शासनं रचयति। देशस्य चरमं लक्ष्यं - प्रजाप्रभुत्त्वम्, समाजवादः, जात्यतीतत्त्वम्, राष्ट्रियैक्यम् - इति संविधानं स्पष्टीकरोति। संविधानं प्रजानां मूलभूताधिकारान्, कर्तव्यानि च बोधयति। संविधानं सर्वकाराय सुचारुशासनाम् दिशानिर्देशनं करोति यत् - कया रीत्या कार्यमनुष्ठेयम्? केन विधिना द्वन्द्वेषु न्यायः प्रवर्तनीयः? समुदायविशिष्टानां, क्षेत्रविशिष्टानां च नागरिकाणां कृते विशिष्ट - अधिकार प्रदानम्, राष्ट्राय प्रत्येकं नागरिकाणां भूमिकानिश्चयनम् इत्यादीनि कार्याणि संविधाने समाहितानि सन्ति। सङ्क्षेपेण कथयामश्चेत् विविधसंस्कृति - भाषा - समुदाय - जाति - क्षेत्रावलम्बिनि भारतराष्ट्रे त्यागाय, (नैष्ठिककर्त्तव्यम्) प्राप्तये (अधिकारः) नियन्त्रणाय (न्यायाय) च संविधानमतीव महत्तां भजते।

**संविधानपरिचयः**

अस्माकं संविधानं नैकेभ्यः देशेभ्यः प्रेरणामादाय विरचितमस्ति तदत्र दिङ्मात्रं निर्दिश्यते।

| **राष्ट्राणि** | **समाहृततत्त्वानि** |
|---|---|
| ब्रिटैन् | - एकस्वाम्यपौरत्त्वम्, न्यायप्रभुत्त्वम्,<br>- लोकसभाध्यक्षः तस्य पात्रञ्च<br>- शासनरचनाविधानम्, न्यायनिर्धारणम्। |
| अमेरिकासंयुक्त | - नागरिकाणां मूलभूताधिकाराः |
| संस्थानम् | - न्यायाङ्गस्य स्वातन्त्र्यम्<br>- शासकाङ्गनिर्णयस्य परिशीलनाधिकारः। |
| फ्रान्स् | - स्वातन्त्र्यम्, समानता, भ्रातृत्त्वम् इत्यादयः आदर्शगुणाः। |
| केनेडा | - राज्यानाम् एकीकरणेन प्रबलः केन्द्रसर्वकारः, राज्यसर्वकारस्य केन्द्रसर्वकारे नियन्त्रणम्। |
| ऑस्ट्रेलिया<br><br>जपान् | - प्रस्तुतविषयाणाम् आवली<br>- राज्ययोर्मध्ये अनिर्बद्धं वाणिज्यम्।<br>- मूलभूतानि कर्त्तव्यानि। |
| जर्मनी | - आपत्कालीन-व्यवस्था। |

साम्प्रतं भारतीयसंविधाने २२ अध्यायाः (Articles) सन्ति। संविधाने १२ अनुसूचयः (मूलसंविधाने अष्टौ + चतस्रः अनुयोजिताः)। ४४६ अनुच्छेदाः (मूलसंविधाने ३९५ + ५१ अनुयोजिताः) सन्ति। ''सत्यमेव जयते'' इदं संविधानस्य ध्येयसूत्रम्। भारतस्य प्रथमः राष्ट्रपतिः (चितः) डॉ. राजेन्द्रप्रसादमहाशयः। संविधानस्य सर्वोच्चपदं राष्ट्रपतिपदं भवति। अस्माकं संविधानस्य प्रारम्भः पीठिकया (आमुखेन) भवति, या जवाहरलालनेहरूमहाशयैर्विरचिता अस्ति। पीठिकेयं संविधानस्य भागत्वेन १९७३ तमे वर्षे स्वीकृतिं प्राप्तवती। सर्वोच्चन्यायालयेऽपि पीठिकामिमां प्रतिरोद्धुं, प्रत्याख्यापितुं वा न कश्चिच्छक्नोति।

**संविधानस्य महत्त्वपूर्णाः अनुच्छेदाः**

| **अनुच्छेदक्रमः** | **वर्णितविषयाः** |
|---|---|
| १२ तः ३५<br>(12 to 35) | मूलभूताधिकाराणां विवरणम्।<br>(मतदान-शिक्षा-स्वातन्त्रता-समता इत्याद्यधिकाराः) |
| ३६ तः ५०<br>(36 to 50) | राज्यनीतेः निदेशकतत्त्वानि।<br>(पञ्चायतानां सङ्घटनम्, राष्ट्रियस्मारकाणां, वन्यजीवानां च रक्षाप्रबन्धः) |
| ५१ अ<br>(51 A) | प्रत्येकं नागरिकाणां मूलकर्त्तव्यानि। |
| ८०<br>(80) | राज्यसभायाः संरचना। |

| | |
|---|---|
| ८१<br>(81) | लोकसभायाः संरचना। |
| ३२०<br>(320) | लोकसेवायोगस्य कार्याणि। |
| ३८३<br>(383) | राज्याभाषारूपेण ''हिन्दी'', सङ्घस्य परिभाषा च। |
| ३५६<br>(356) | राज्येषु राष्ट्रपतिशासनस्य अन्वयीकरण-विषये। |
| ३६८<br>(368) | संविधाने परिष्काराय संसदः भूमिकायाः तत्प्रक्रियायाश्च विषये। |
| ३७०<br>(370) | जम्मू-कश्मीरराज्ययोर्विषये। |
| ३९५<br>(395) | भारतस्तन्त्रताधिनियमः, भारतसर्वकार - अधिनियमः तथा च १९३५ अधिनियमस्य निरसनम्। |

इदानीं वयं भारतीयसंविधानस्य अनुसूचीनां तत्प्रतिपाद्यविषयाणाञ्च विषये ज्ञास्यामः॥

| **अनुसूच्यः** | **वर्णितविषयाः** |
|---|---|
| प्रथमानुसूचिः | राज्यानां सङ्घराज्यानां क्षेत्रविषयकविवरणम्। |
| द्वितीयानुसूचिः | राष्ट्रपतेः, राज्यपालानाम्, लोकसभाध्यक्षोपाध्यक्षानाम्, राज्यसभायाः सभापत्युपसभापतीनां, विधानसभायाः अध्यक्षोपाध्यक्षानाम्, उच्चतमन्यायालयानाम् उच्च न्यायालयानाञ्च न्यायाधीशानाम्, भारतस्य नियन्त्रक-महाभिलेखपरीक्षकाणाञ्च विषये। |
| तृतीयानुसूचिः | विविधराजनेतृणां शपथविधेः प्रारूपम्। |
| चतुर्थ्यनुसूचिः | राज्यसभायाः स्थानानां वितरणम्। |
| पञ्चम्यनुसूचिः | अनुसूचितक्षेत्राणाम् अनुसूचितजनजातीनां च प्रशासन-नियन्त्रण-प्रबन्धः। |
| षष्ठ्यनुसूचिः | असम-मेघालय-त्रिपुरा-मिजोरम-राज्यानां जनजातीयक्षेत्राणां प्रशासनप्रबन्धः। |
| सप्तम्यनुसूचिः | सङ्घसूचिः, राज्यसूचिः, समवर्तिसूचिश्च। |
| अष्टम्यनुसूचिः | मान्यताप्राप्तभाषाणां विषये प्रबन्धनम्। |
| नवम्यनुसूचिः | विशिष्टाधिनियमानां विनियमानां च सत्यापनस्य प्रावधानविषये। |
| दशम्यनुसूचिः | दलपरिवर्तने सदस्यानाम् अनर्हता विषये प्रबन्धनम्। |
| एकादश्यनुसूचिः | पञ्चायतानाम् अधिकाराः, दायित्त्वानि च। |
| द्वादश्यनुसूचिः | नगरपालिकानां महानगरपालिकानां च अधिकाराः, प्राधिकाराः, दायित्त्वानि च। |

आसु द्वाद्वशानुसूचिष्वेव व्यष्टिरूपेण ४४६ अनुच्छेदाः समाविष्टाः भवन्ति।

- **संविधानस्य आवश्यकता**

भारतीयप्रजाया: सामाजिक-आर्थिक-राजकीय - न्याय: समानतया भवेत्, एतदर्थं संविधानमत्यावश्यकम् अस्ति। समाजोत्थानस्य श्रद्धा अस्मिन् संविधाने नितरां दृश्यते कारणं तत्कालीना: अस्पृश्यता, असमानता, एकव्यक्तिप्रभुत्त्वम् इत्याद्या: समस्या: अनेनैव उन्मूलयितुं शक्यन्ते। जात्यतीतत्वम् (धर्मनिरपेक्षत्वम्। असाम्प्रदायिकत्वं वा) पदमिदं १९७६ तमे वर्षे संविधानस्य ४२ तमे परिष्कारे संविधानपीठिकायां समाविष्टम्। तदनुगुणं सर्वै: भारतीयजनै: परस्परं भेदभावं विना भ्रातृभावेन स्थातव्यम्। अन्येषां जनानां सम्प्रदायानां, धर्मग्रन्थानां प्रार्थनानां संस्कृतीनां प्रथानां च आदरभाव: धर्त्तव्य:। संविधानं राष्ट्रियाखण्डतायै ऐक्याय वा प्रत्येकं नागरिकान् आह्वयति। समाजवादी इत्यपि पदं ४२ तमे संविधानपरिष्कारे पीठिकायां समाहितम्। यद्धि - धर्मस्य, भाषाया:, लिङ्गस्य जात्या: वा आधारेण यस्मिन्कस्मिन्नपि तरतमभाव: न प्रदर्शनीय: इति सूचयति। आर्थिकसमानतायै सर्वेषामपि समानावसरान्, योग्यं जीवनस्तरं च प्रकल्पयितुं संविधानानुरूपमेव भारतसर्वकार: यतते।

**उपसंहार:**

पूर्वस्मिन् काले भारते राजान: सन्ततं दाक्षिण्यानुरागिण: शौर्यपरा: प्रजाहितचिन्तका: च अभूवन्। परं कालक्रमेण तेषां राज्ञां कष्टासहिष्णुतया, शैथिल्येन, मिथ: कलहेन, अन्यदेशसंस्कृतीनां प्रजामन:प्रभावेण, ब्रिटिशराज्यात् प्राप्त-स्वतन्त्रतापरेण सम्भाव्यराजकताभयेन च भारतीयसंविधानस्य बीजानि प्रादुरभूवन्।

प्रत्येकं नागरिका: अनेन संविधानेन सुविदिता: स्युरेव। संविधानम् अस्मान् भारतीयान् राष्ट्रं प्रति कर्त्तव्यानि निर्दिशति, अस्मभ्यम् अधिकाराँश्च प्रापयति। जनानां प्रभुत्त्वम्, तेषां मौलिकाधिकाराणाञ्च रक्षणम् इति अस्य संविधानस्य चरमोद्देश्यम् अस्ति।

## स्वाध्याय:

**१. योग्यं विकल्पं चित्वा उत्तरं लिखत ?**

(१) 'राष्ट्रियकॉंग्रेसदलेन' संविधानं रचयितुं कदा याचिका कृता?

(क) १९४६ तमे वर्षे (ख) १९३५ तमे वर्षे (ग) १९३७ तमे वर्षे (घ) १९४९ तमे वर्षे

(२) संविधानरचने कियत्कालावधि: अभवत्?

(क) २ वर्षे १० मासा: १५ दिनानि (ख) ३ वर्षाणि ९ मासा: १२ दिनानि

(ग) २ वर्षे ११ मासा: १८ दिनानि (घ) २ वर्षे ४ मासा: १९ दिनानि

(३) संविधानरचनसभायां कति सभ्या: आसन् ?

(क) ३८९ (ख) ३८३ (ग) ३८४ (घ) ३८६

(४) अस्माकं संविधाने जर्मनीदेशप्रेरणया किं कार्यं समाहितम्?

(क) मूलभूतानि कर्त्तव्यानि (ख) प्रस्तुतविषयानाम् आवलि:

(ग) एकस्वाम्यपौरत्वम् (घ) आपत्कालीनव्यवस्था

(५) भारतीयसंविधानरचनसभायाः कार्यकारि-अध्यक्षः कः आसीत्?

(क) डॉ. सर्ववल्ली राधाकृष्णन्
(ख) डॉ. भीमराव आम्बेडकरः
(ग) डॉ. सच्चिदानन्दसिंहा
(घ) डॉ. राजेन्द्रप्रसादः

(६) संविधाने कतमोऽनुच्छेदः परिष्कारविषयकोऽस्ति?

(क) २७० तमः (ख) ३५६ तमः (ग) ३६८ तमः (घ) ३९५ तमः

(७) कस्यामनुसूचौ राज्यपालस्य कर्तव्यानि संज्ञायन्ते ?

(क) द्वितीयायाम् (ख) चतुर्थ्याम् (ग) प्रथमायाम् (घ) तृतीयायाम्

(८) अष्टम्यनुसूच्यां केषां विषये विवरणं प्राप्यते?

(क) सर्वोच्चन्यायालयविषये
(ख) अनुसूचितक्षेत्रं-जनजातीनाञ्चविषये
(ग) मान्यताप्राप्तभाषाणां विषये
(घ) विशिष्टाधिनियमानां विषये

(९) संविधानस्य पीठिकायाः (आमुखस्य) रचना केन कृता?

(क) मो. क. गान्धिमहोदयेन
(ख) डॉ. बाबासाहेबआम्बेडकरमहोदयेन
(ग) नेहरूमहोदयेन
(घ) डॉ. राजेन्द्रप्रसादमहोदयेन

(१०) संविधानस्य सर्वोच्चपदं किम्भवति?

(क) प्रधानमन्त्री (ख) सर्वोच्चन्यायाधीशः (ग) राष्ट्रपतिः (घ) ऐतषु किमपि न

**२. एकेन वाक्येन उत्तरं लिखत।**

(१) संविधानं कानि त्रीणि अङ्गानि व्यवस्थापयति ?

(२) संविधानस्य क्रियान्वयीकरणं कदाभवत्?

(३) संविधानरचनासभ्यानां केषाञ्चन पञ्चानां नामानि लिखत ।

(४) देशस्य किं चरमलक्ष्यं संविधानं स्पष्टीकरोति ?

(५) 'फ्रान्स्' राष्ट्रात् अस्मत्संविधाने के आदर्शाः समाहृताः ?

(६) नवम्यनुसूच्यां के विषयाः समाविष्टाः सन्ति ?

(७) मेघालय-मिजोरम् आदिराज्यानां प्रशासनिका कतमा अनुसूचिः वर्तते ?

**३. द्वित्रिर्वाक्यैः उत्तरं लिखत।**

(१) भारतीयसंविधाने 'अमेरिकाराष्ट्रात्' कानि तत्त्वानि प्रेरितानि समाहृतानि वा सन्ति ?

(२) समाजवादी इति पदेन भवन्तः किमवगच्छन्ति ? इति स्पष्टीकुरुत।

(३) समाजोत्थानम् इत्येतस्मिन् विषये वाक्यत्रयं लिखत।

(४) ब्रिटैन् देशात् भारतीयसंविधाने समाविष्टानि तत्त्वानि कानि ?

**४. सविस्तरम् उत्तरं लिखत।**

(१) संविधानस्य आवश्यकतामधिकृत्य स्वविचारान् प्रकटीकुरुत।

(२) संविधानस्य महत्त्वं स्वशब्दैः प्रतिपादयत।

(३) जात्यतीतत्वम् (धर्मनिरपेक्षत्त्वम् वा) इति पदस्य विस्तृतमर्थं व्याख्यायत।

**५. टिप्पणी लेख्या।**

(१) संविधानस्य इतिहासः पृष्ठभूः वा।

(२) संविधानस्य महत्त्वाधायिनः अनुच्छेदाः।

**छात्रप्रवृत्तिः**

- छात्रैः गुजरातविधानसभायाः साक्षात्कारः वा तस्य विशेषपरिचयः प्राप्तव्यः।

**सुभाषितम्**

**न देवाः दण्डमादाय रक्षन्ति पशुपालवत्।**
**यं तु रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तम्॥**

•

| १० | # लोकसभा |
|---|---|

**प्रस्तावना**

भारतस्य संसदि राष्ट्रप्रमुखलोकसभाराज्यसभानाञ्च गणना भवति। सङ्घकक्षायां धारागृहं संसद् इति कथ्यते। तस्याः संसदः द्विगृहे वर्तेते। संसदः अधोगृहं लोकसभा तथा च उपरिगृहं राज्यसभा इति नाम्ना संज्ञायते। भारतस्य राष्ट्रप्रमुखः संसदन्तर्गतः भागः गण्यते। गृहद्वयस्य रचना पृथक्-पृथक् रीत्या भवति, तस्य अधिकारोऽपि भिन्नः अस्ति। भारतदेशस्य सञ्चालनं लोकसभाद्वारा एव भवति। नूतननियमाः इतः एव पारिताः भवन्ति। अतः वयम् अत्र लोकसभाविषये ज्ञानं प्राप्स्यामः।

---

## लोकसभा



भारतगणराज्यस्य संसदः निम्नसदनत्वेन परिगण्यते। ''धर्मचक्रपरिवर्तनाय'' इति लोकसभायाः ध्येयवाक्यम् अस्ति। भारतगणराज्यस्य नागरिकाणां मतदानेन एतस्य सदनस्य प्रतिनिधीनां चयनं भवति। भारतीयसंविधाने लोकसभायाः सदस्यानाम् अधिकतमा संख्या (५५२) द्विपञ्चाशदधिकपञ्चशतं निर्धारितास्ति। लोकसभायाः प्रत्येकं सदस्यः पञ्चलक्षात् सार्धसप्तलक्षजनानां प्रतिनधित्वं करोति। एंग्लो-इण्डियन् (भारतीयसमुदायः) लोकसभायां समस्तं प्रतिनिधित्वं न धारयन्नपि राष्ट्रप्रमुखः समुदायस्याधिकाधिकं सभ्यद्वयस्य नियुक्तिं कर्तुं शक्नोति। पञ्चशताधिकं त्रिंशत् (५३०) सदस्याः राज्यानां विशंतिः (२०) सदस्याः च केन्द्रशासितप्रदेशानां प्रतिनधित्वं कुर्वन्ति। भारतीयनागरिकः एवञ्च तस्य वयः पञ्चविंशतिः (२५) वर्षतः अधिकं स्यात् चेत् सः लोकसभायाः निर्वाचने स्थातुं शक्नोति। यः सर्वकारस्य सवैतनिकः कर्मचारी, मानसिकरोगी अथवा न्यायदोषी स्यात् सः लोकसभायाः सभ्यतां नार्हति। तदुपरि कोऽपि नागरिकः गृहद्वयस्य सभ्यः भवितुं नार्हति। संसदः कोऽपि सभ्यः अध्यक्षानुज्ञां विना सातत्येन षष्टिः (६०) दिनपर्यन्तम् अनुपस्थितो भवति तदा तस्य स्थानं रिक्तं विगणय्य तस्य सभ्यपदं निरस्तं क्रियते।

लोकसभायाः कालावधिः पञ्चवर्षं यावद् भवति। तत्पूर्वम् अपि तस्य विसर्जनं कर्तुं शक्नोति सङ्घः। राजनैतिक कर्तव्यतायामवस्थायाम् आपत्काले घोषिते लोकसभा कालांशाद् अधिकम् एकवर्षं वर्धयितुं शक्यते।

लोकसभाभवनस्य परिकल्पना अत्यनुकूला अस्ति। वातानुकूलस्य, ध्वनिरोधकस्य, गमनागमनस्य च व्यवस्थां ध्यात्वा लोकसभाभवनस्य रचना कृतास्ति। ध्वनिविस्तारकाणि, व्यजनानि, अनुवादकयन्त्राणि च तत्र भवन्ति। एतानि साधनानि गृहस्य कार्यं सुकरं कर्तुं सांसदाः उपयुञ्जते। संसदः लोकसभासदनस्य प्रत्येकं निमेषस्य व्ययः (२३,०००) (त्रयोविंशतिसहस्ररूप्यकाणि) भवन्ति।

## सभापतिः

लोकसभायाः त्रिषु स्तम्भेषु अन्यतमः लोकसभाध्यक्षः, बहुमतप्राप्तपक्षः, विपक्षः च लोकसभायाः त्रिस्तम्भाः भवन्ति। लोकसभाध्यक्षः लोकसभायाः सदस्येषु अन्यतमः भवति। लोकसभायाः कार्यं सुचारुरीत्या चालयितुं लोकसभायाः सदस्याः निर्वाचनप्रक्रियया लोकसभाध्यक्षस्य चयनं कुर्वन्ति। विधानमण्डले विधेयकनिर्माणस्य महत्त्वपूर्णं दायित्वं विधायिकायाः सदस्यानाम् अस्ति। विधेयकस्य विषये चर्चां कुर्वन्तः सदस्याः वाद-विवादं कुर्वन्ति इति स्वाभाविकम् आवश्यकं च परन्तु

वाद-विवादस्य नियमस्य अपि आवश्यकता भवति। जायमानेषु विवादेषु अध्यक्षः निष्पक्षतया निर्णयं स्वीकरोति। न्यायपालिकायाः निष्पक्षतायाः यथा माहात्म्यं वर्तते, तथैव लोकसभायां निष्पक्षतायाः माहात्म्यं वर्तते। यतो हि लोकसभाध्यक्षस्य पक्षपातपूर्णः व्यवहारः लोकतन्त्रस्य उपरि साक्षात् प्रहारः भवति। अतः पक्षनैष्ठिकस्य लोकसभाध्यक्षस्य अपेक्षया देशनिष्ठस्य लोकसभाध्यक्षस्य चयनम् आवश्यकं भवति। गृहविभागे मतदानं भवति तदा अध्यक्षः मतदानं न करोति किन्तु समानमतदानं स्यात्तदा स्वकीयनिर्णायकं मतदानं कर्तुं शक्नोति। लोकसभाध्यक्षस्य अनुपस्थितौ उपाध्यक्षः लोकसभाध्यक्षस्य प्रतिनिधित्वं करोति। तयोः उभयोः अनुपस्थितौ संसदा निर्मिता एका सभापतितालिका सदनस्य कार्यभारं वहति।

### नियुक्तिः

भारतीयसंविधानस्य ९३ अनुच्छेदानुसारं लोकसभायाः सदस्याः लोकसभासदस्येभ्यः एव क्रमेण अध्यक्षम्, उपाध्यक्षं च चिन्वन्ति। लोकसभायाः रचनायाः काले, अध्यक्षपदस्य उत उपाध्यक्षपदस्य रिक्ततायां सत्यां निर्वाचनं भवति। बहुमतेन उत सर्वसम्मत्या यः अध्यक्षः चितः सः लोकसभाध्यक्षत्वेन दायित्वं वहते।

### पदत्यागः

यदि केनचित् कारणेन अध्यक्षस्य लोकसभायाः सदस्यत्वम् अयोग्यं सिद्धं भवति तर्हि अध्यक्षस्य स्वतः एव पदत्यागः भवति। अध्यक्षः त्यागपत्रम् अपि दातुं शक्नोति। लोकसभाध्यक्षः तत् त्यागपत्रम् उपाध्यक्षं सम्बोध्य लिखति। लोकसभायाः नवीनसत्रस्य प्रथमाधिवेशनात् पूर्वदिनपर्यन्तं लोकसभाध्यक्षः स्वदायित्वस्य वहनं करोति। ततः सः पदत्यागं करोति।

### अध्यक्षविरुद्धम् अविश्वासः

लोकसभायाम् अध्यक्षस्य भूमिका निष्पक्षा भवेद् इति संविधाने मुहुर्मुहुः उल्लिखितम् अस्ति। अतः लोकसभाध्यक्षः स्वशपथग्रहणकाले निष्पक्षतायाः बलपूर्वकाचरणस्य सङ्कल्पं करोति। यः अध्यक्षः देशाय चितः स्वपक्षस्य हितं चिन्तयति, तस्य विरोधस्याधिकारः संसत्सदस्यानां प्राथमिकाधिकारः भवति। लोकसभाध्यक्षस्य व्यवहारेण, निर्णयेभ्यः, वचनेन च यदि पक्षपातस्य अनुभूतिः भवति, तर्हि सदस्याः अध्यक्षविरुद्धं पदच्युतप्रस्तावं कर्तुं प्रभवन्ति। ततः अध्यक्षस्य विरुद्धं ये आक्षेपाः भवन्ति तेषां सदने चर्चा भवति। अध्यक्षस्य विषये पक्षपातस्य आक्षेपे सिद्धे सति राष्ट्रपतिः तं पदच्युतं करोति।

### पदभ्रष्टता

लोकसभायाः सर्वे सदस्याः अध्यक्षस्य पदभ्रष्टतायै सामूहिकप्रस्तावं संसदि उपस्थापयन्ति। सः प्रस्तावः यदि बहुमतैः सिद्धः भवति, तर्हि राष्ट्रपतिः लोकसभाध्यक्षं पदभ्रष्टं करोति परन्तु पदभ्रष्टतायाः चतुर्दशदिनेभ्यः पूर्वं लोकसभाध्यक्षाय पदभ्रष्टतायाः समाचारः दातव्यः भवति।

### दायित्वम्

लोकसभाध्यक्षः सदने विशेषदायित्वानां वहनं करोति। तेषां दायित्वानां वर्गीकरणं निम्नरीत्या भवति। प्रशासनिकदायित्वम्, कार्यपालकदायित्वम्, सदने नियमसम्बद्धं, व्यवस्थासम्बद्धं च दायित्वम्, सदनसदस्येभ्यः सूचनादानम्, संसदीयसमितीनां निरीक्षणं, नियन्त्रणं च,

### प्रशासनिकदायित्वम्

लोकसभाध्यक्षः सदनस्य प्रश्नसङ्कल्पप्रस्तावविधेयकादीनां चयनं करोति। एतेषां चयनस्य अन्तिमनिर्णयः लोकसभाध्यक्षस्य एव भवति। पूर्वाध्यक्षानां परम्परायाः, लोकसभायाः नियमानां च ध्यानं कृत्वा लोकसभाध्यक्षः उत्तरदायित्वस्य वहनं करोति। लोकसभाध्यक्षः सदनसदस्यान्, सर्वकारिसदस्यान् च सदने चर्चां कर्तुम् उत तथ्यानाम्

उपस्थापनार्थम् आह्वयति। प्रस्थापितस्य विषयस्य गहनतया अध्ययनं कृत्वा एव लोकसभाध्यक्षः स्वनिर्णयान् करोति। सदनसदस्याः लोकसभाध्यक्षस्य निर्णयं पुनर्विचाराय प्रस्तोतुं शक्नुवन्ति, परन्तु लोकसभाध्यक्षः यदि निर्णयं परिवर्तितुं नेच्छति, तर्हि सदनसदस्याः तस्य विरोधं कर्तुं न शक्नुवन्ति। स्वनिर्णयस्य पृष्ठे यत् किमपि कारणम् अस्ति, तत् कारणं सदनसदस्यानां सम्मुखम् उपस्थापयितुं लोकसभाध्यक्षः बाध्यः न भवति।

### कार्यपालकदायित्वम्

सदस्यनिर्णयानां सूचनाम् अध्यक्षः एव सर्वेभ्यः अधिकारिभ्यः यच्छति। तया सूचनया सह सः नियमानां कार्यान्वितताया: आग्रहं करोति। सदनयोः मध्ये विधेयकानाम् आदानप्रदानं, सूचनानाम् आदानप्रदानं च अध्यक्षस्य माध्यमेन भवति। विधेयके सिद्धे सति लोकसभाध्यक्षः स्वहस्ताक्षरं कृत्वा राष्ट्रपतेः कार्यालयं विधेयकं प्रेषयति। सः कार्यपालकत्वेन स्वस्य दायित्वं विनयेन वहति।

### सदने नियमसम्बद्धं, व्यवस्थासम्बद्धं च दायित्वम्

सदने भाषणं कर्तुं सदनसदस्यस्य आह्वानं लोकसभाध्यक्षः करोति। तस्मै सदस्याय कियान् समयः दातव्यः इत्यस्य निर्णयम् अपि लोकसभाध्यक्षः करोति। कोऽपि सदस्यः यदि अयोग्यानां शब्दानां प्रयोगं स्वभाषणे करोति, तर्हि लोकसभाध्यक्षः तं सदस्यं बलपूर्वकं स्वनिवेदनं प्रतिनेतुं बाध्यं करोति। यत् निवेदनं लोकसभाध्यक्षेण अयोग्यं निर्धारितं, तत् संसदः कार्यवाहिकातः निराकर्तुं लोकसभाध्यक्षः समर्थः। लोकसभाध्यक्षः यान् अंशान् अयोग्यान् उक्त्वा निष्कासयति, तेषां अंशानां मुद्रणं कोऽपि कर्तुं न प्रभवति। लोकसभाध्यक्षः अनुचिताचरणकर्त्रे सदस्याय सदनात् अमुकसमयं यावत् निष्कासयितुं प्रतिबद्धुं च शक्नोति।

### सदनसदस्येभ्यः सूचनादानम्

लोकसभाध्यक्षः यदा सदने भाषणं करोति, तदा तस्य भाषणं सर्वे सदस्याः ध्यानेन शृण्वन्ति। यदि कोऽपि सदस्यः अध्यक्षस्य भाषणकाले किमपि वदति, तर्हि सः दण्डार्हः भवति। अतः यदा कदापि लोकसभाध्यक्षः स्वभाषणाय सज्जः भवति। तस्मात् पुरा एव सर्वे सदस्याः स्वस्थाने उपविशन्ति।

### संसदीयसमितीनां निरीक्षणं, नियन्त्रणं च

लोकसभाध्यक्षः समितीनां गोष्ठीस्थानं निर्धारयति। सदस्यानाम् आसनव्यवस्थायाः दायित्वं, दूरवाण्या संदेशप्रदानस्य दायित्वं, संसदीयपत्राणां मुद्रणस्य दायित्वं च लोकसभाध्यक्ष एव वहति। लोकसभाध्यक्षः सदने प्रवेशाय पत्रकारेभ्यः, दर्शकेभ्यः, प्रतिनिधिभ्यः च अनुमतिं यच्छति। लोकसभाध्यक्षेण अनुमतिप्राप्ताः जनाः यदि सदने दुर्व्यवहारं कुर्वन्ति, तर्हि लोकसभाध्यक्षः तेभ्यः दण्डं दातुं समर्थः भवति।

### लोकसभायाः कार्याणि

लोकसभायाः कार्यं नियमानां निर्माणं निरूपणं च अस्ति। इयं देशस्य प्रजानाम् आवश्यकतानुसारं नूतननियमान् घटयति निर्मापयति तथा च वर्तमाननियमेषु न्यूनता स्यात् तदा तत्र परिवर्तनमपि करोति। अनावश्यकप्राचीननियमान् दूरीकर्तुं इयं सभा शक्नोति। संयुक्तविषयेषु नियमाः अनया नियम्यन्ते। नियमकार्ये गृहस्य सत्ता अस्ति। धनसम्बध्याध्यादेशेन विना सर्वे नियमाः गृहमध्ये स्थापयितुं शक्यन्ते। यस्मिन् गृहे सर्वप्रथमनियमः प्रस्तूयते तदा तस्य त्रिवारं पठनं कर्तव्यं भवति, तदनन्तरम् अन्यस्मिन् गृहे प्रस्तूयते तत्रापि त्रिवारं पठनं क्रियते, तत्पश्चात् राष्ट्रप्रमुखस्य सम्मत्यर्थम् अध्यादेशः प्रस्तूयते। वित्तविषये लोकसभा अग्रिमास्ति। तत्कार्यं पूर्वं लोकसभायां प्रस्तूयते तदनन्तरं विचार-विमर्शः भवति, तत्पश्चात् राज्यसभायां सः अध्यादेशः प्रेषितः भवति। तत्रापि चतुर्दशदिवसेषु त्रिवारं वाचनं कृत्वा अग्रे प्रस्तोतव्यः वित्तनियमः इति। एतादृशी प्रक्रिया न स्यात् तदा राज्यसभातः प्रमाणीकृतः नियमः इति मत्वा राष्ट्रप्रमुखस्य सम्मतिप्रात्यर्थं प्रेषितः भवति, राष्ट्रपतिना प्रमाणीक्रियते च।

लोकसभायाः द्वितीयकार्यं कार्यकारिणी सभायाः रचनाविषयकम् अर्थात् मन्त्रिमण्डलस्य रचना इति अस्ति। तस्योपरि अङ्कुशपूर्वकं नियमनमपि कर्तव्यमस्ति। यस्य पक्षस्या अधिकमतदानं स्यात् अथवा अधिकसभ्यानाम् आधारः स्यात् तत्पक्षेण मन्त्रिमण्डलस्य रचना कर्तव्या इति। संसत्सभ्याः मन्त्रिमण्डलस्य सभ्यान् प्रश्नान् पृच्छन्ति, तद्विषयकज्ञानं प्राप्य कार्यस्य समीक्षां परीक्षणं च कृत्वा अङ्कुशपूर्वकनियन्त्रणं कुर्वन्ति। यदि मन्त्रिमण्डलस्य कार्येण लोकसभायाः सभ्याः सन्तुष्टाः न भवेयुः तर्हि मन्त्रिमण्डलं प्रति अविश्वासं प्रकटीकृत्य तत्पदं त्याज्यम् इति लोकसभागृहं कथयति, तथैव राज्यसभायाः सभ्यानामधिकारः अस्ति किन्तु पदत्यागविषये कथयितुं ते न शक्नुवन्ति।

लोकसभायाः तृतीयकार्यं वित्तीयायव्ययपत्रं प्रमाणीकर्तव्यम् इति। सर्वप्रथममिदं पत्रं लोकसभायां प्रस्तूयते, तदनन्तरं राज्यसभायां प्रेषितं भवति पत्रमिदमिति। वित्तीयायव्ययपत्रं यावत् लोकसभा द्वारा न प्रमाणीक्रियते तावत्पर्यन्तं मन्त्रिमण्डलं व्ययं कर्तुं न शक्नोति। तदविश्वासेन मन्त्रिमण्डलेन स्वैच्छिकत्यागपत्रं दातव्यं भवति। राज्यसभायामपि नूतनवित्तवर्षस्य आयव्ययपत्रस्योपरि विचारणा भवति, तद् गृहेणापि चतुर्दश (१४) दिवसेष्वेव प्रेषितं भवति, तत्पश्चात् राष्ट्रपतेः सम्मत्यर्थं पत्रमिदं प्रस्तूयते।

लोकसभायाः चतुर्थकार्यं संसदः महत्त्वपूर्णं कार्यम् अस्ति, यद् देशस्य अनेकविधप्रश्नानां चर्चा कर्तव्या इति। तदनन्तरं प्रजाजनानाम् आपत्तिनिवारणं प्रश्ननिराकरणमित्यादिज्ञानं मन्त्रिणा प्राप्तव्यं भवति। मन्त्रिणः गृहमध्ये यत् कार्यं स्वीकुर्वन्ति तदाचरितव्यम् एव इति। अनेन प्रकारेण देशस्य सञ्चालनकार्यं प्रचलति।

## लोकसभायाः दायित्वम्

लोकसभा लोकतन्त्रस्य अभिन्नाङ्गम् अस्ति। लोकसभायाः कार्यपालिका, विधायिका इत्येते नामान्तरे स्तः। लोकतन्त्रव्यवस्थायाः वर्गीकरणं त्रिषु अङ्गेषु भवति-यथा व्यवस्थापिका, कार्यपालिका, न्याय-पालिका च। एतासु व्यवस्थापिकायाः महत्त्वम् अधिकम् अस्ति। यतो हि कार्यपालिकायाः न्यायपालिकायाः च नियमनस्य दायित्वं व्यवस्थापिकप्रणाल्याः पार्श्वे भवति। संविधानरचनया बृहत्-लघुमात्रायां संवैधानिकनियमेषु अविरतं परिवर्तनं जायमानम् अस्ति। तस्य परिवर्तनस्य दायित्वं लोकसभा एव वहति। लोकसभायाः द्वे सत्रे अनिवार्यत्वेन भवेताम् इति भारतीयसंविधानानुसारम्। द्वयोः सत्रयोः मध्ये षण्मासाधिकस्य विरामः न भवेद् इति, परन्तु भारतीयलोकसभायां त्रयाणां सत्राणां परिपाटिः बहुभ्यः वर्षेभ्यः अस्ति। तानि त्रीणि सत्राणि शीतसत्रं ग्रीष्मसत्रं वर्षासत्रञ्च। एषु सत्रेषु लोकसभायां नवीननियमानां सर्जनं परिवर्तनं च भवति। संसदा पारिताः नियमाः राज्यसभां प्रति गच्छति। ततः पारिताः नियमाः राष्ट्रपतिं प्रति गच्छन्ति। तान् नियमान् महामहिमराष्ट्रपतिः पारितं करोति इति। लोकसभायाः मुख्यदायित्वम् अस्ति-यथा मन्त्रिपरिषदः केवलं लोकसभां प्रति उत्तरदायित्वम् अस्ति। अविश्वासप्रस्तावं सर्वकारस्य विरोधे इयम् एव परिषद् आनेतुं शक्नोति। वित्तप्रस्तावं पारयितुम् इयम् एव सभा निर्णायकी भवति। राष्ट्रीयापत्कालं प्रति प्रस्तावः लोकसभायाम् एव पारितः भवति। भारतस्य विकासाय नूतननियमानां सर्जनं तथा प्राचीननियमानां न्यूनता करणीया अथवा तेषां प्राचीननियमानां विसर्जनं च इति लोकसभायाः मुख्यदायित्वम् अस्ति।

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा उत्तरं लिखत ?**

(१) सङ्घकक्षायां धारागृहम् इति किं कथ्यते ?

(क) संसद्  (ख) भवनम्  (ग) गवनम्  (घ) राज्यम्

(२) भारतदेशस्य सञ्चालनं केन भवति ?

(क) राज्यसभा  (ख) लोकसभा  (ग) विधानसभा  (घ) गृहसभा

(३) लोकसभाया: कालावधि: कतिवर्षं यावत् भवति ?

(क) एकम् (ख) द्वे (ग) पञ्च (घ) सप्त

(४) संसद: लोकसभासदनस्य प्रत्येकं निमेषस्य व्यय: कति रूप्यकाणि सन्ति ?

(क) २१००० (ख) २२००० (ग) २३००० (घ) २४०००

(५) गृहविभागे क: मतदानं न करोति ?

(क) उपाध्यक्ष: (ख) अध्यक्ष: (ग) प्रधानमन्त्री (घ) राज्यपाल:

(६) लोकतन्त्रस्य अभिन्नाङ्गं किम् अस्ति ?

(क) राज्यसभा (ख) लोकसभा (ग) भवनम् (घ) गृहम्

(७) लोकसभायां कति सत्राणि प्रचलन्ति ?

(क) त्रीणि (ख) चत्वारि (ग) पञ्च (घ) षट्

(८) नवीननियमानाम् अन्तिमं निर्णयं क: करोति ?

(क) उपप्रधानमन्त्री (ख) उपराष्ट्रपति: (ग) गृहमन्त्री (घ) राष्ट्रपति:

**२. संयोजनं कुरुत।**

| अ | ब |
|---|---|
| (१) अधोगृहम् | राज्यसभा |
| (२) उपरिगृहम् | राष्ट्रपति: |
| (३) राष्ट्रप्रमुख: | विंशति: |
| (४) केन्द्रशासितसदस्या: | पञ्चशताधिकं त्रिंशत् |
| (५) राज्यानां सदस्या: | लोकसभा |

**३. एकेन वाक्येन उत्तरं लिखत।**

(१) लोकसभायां कति सदस्या: भवन्ति ?

(२) विधानमण्डले विधेयकनिर्माणस्य महत्त्वपूर्णं दायित्वं कस्य अस्ति ?

(३) सदने विशेषदायित्वानां वहनं क: करोति ?

(४) भारतीयलोकसभायां कति सत्राणां परिपाटि: वर्तते ?

(५) राष्ट्रिय-आपत्कालं प्रति प्रस्ताव: कुत्र पारितो भवति ?

**४. द्वित्रिर्वाक्यै: उत्तरं लिखत।**

(१) लोकसभाया: परिकल्पनां वर्णयत।

(२) संक्षेपेण लोकसभाया: चर्चां कुरुत।

(३) सभ्यपदनिरस्तविषये लिखत।

(४) लोकसभाध्यक्षस्य पदत्याग: कदा भवति ?

**५. सविस्तरम् उत्तरं लिख्यत।**

(१) लोकसभायाः द्वितीयकार्यं सविस्तरं लिखत।

(२) लोकसभाध्यक्षस्य कार्याणि वर्णयत।

(३) सदने अध्यक्षस्य भूमिकां सविस्तरं लिखत।

**छात्रप्रवृत्तिः**

- गान्धिनगरं गत्वा विधानसभायाः अवलोकनं कर्तव्यम्।

**सुभाषितश्लोकः**

**समाने शोभते प्रीतिः राज्ञि सेवा च शोभते।**
**वाणिज्यं व्यवहारेषु स्त्री दिव्या शोभते गृहे॥**

•

# ११ भारतसर्वकारस्य विशिष्टाभियानम् ( डिजिटल इण्डिया )

**प्रस्तावना**

डिजिटल इण्डिया भारतसर्वकारस्य एकं विशिष्टं सोपानम् अस्ति। तेन सर्वकारस्य विभागानां भारतीयजनैः सह संयोजनं क्रियते। डिजिटल इण्डिया योजनया जनाः कर्गजं विना विजाणुसंचारद्वारा सर्वकारयोजनया लाभान्विताः संयोजिताः भवेयुः। सर्वे ग्रामाः आन्तरजालमाध्यमेन संयोजिताः स्युः। सशक्तसमाजनिर्माणं सुचारु अर्थव्यवस्था डिजिटल इण्डिया (आङ्किकभारतम्) संस्थापनम् च अस्याः योजनायः लक्ष्यम्।

---




डिजिटल इण्डिया योजनायाः आरम्भः देहलीस्थे इन्दिरागान्धिक्रीडाक्षेत्रे २ जुलाई २०१५ तमे दिनाङ्के श्रीनरेन्द्रमोदिसहितविविधोद्योगपतीनाम् उपस्थितौ अभवत्। सम्प्रति सर्वकारः विविधाः योजनाः आरब्धवान्। परं अस्याः योजनायाः लाभं सुखिनः संपन्नाश्चैव प्राप्नुवन्ति, न तु आवश्यकजनाः धनरहिताः ग्रामीणाश्च। तन्मा भवेत् तदर्थं सर्वकारेण "Digital Payment" योजना एवं "Digital Programme" इतस्य आरम्भः कृतः। अनया वञ्चिताः अपि सुखिनः संपन्नाश्च भविष्यन्ति। सर्वाणि कार्याणि इलोकट्रोनिकयांत्रिकसाधनोपयोगेनैव भविष्यन्ति। कर्गजस्य अनुपयोगे लक्षाधिकरूप्यकाणां व्ययः न भविष्यति। कर्गजस्य अनुपयोगेन समयानुसारं सिद्धानि कार्याणि यदा भविष्यन्ति तदैव इयं योजना फलदात्री लाभकर्त्री च भविष्यति।

प्रत्येक भारतीयजनसमीपे कुशलदूरवाणी (Smart Phone) आन्तरजालाधारिता भवेद् एवं सर्वासां सर्वकार-योजनानां ज्ञानं तस्यां दूरवाण्यां विद्यनमानत्वात् कार्याणि सहजतया सरलतया च कर्तुं शक्यन्ते जनाः तद्धेतवे सर्वकारः प्रयासं कुर्वन् अस्तीति।

भारतदेशः कृषिप्रधानः वर्तते। कृषकस्य समृद्धिः भारतस्य समृद्धिः। अल्पीयान् कृषकः अपि बीजोत्पादने आवश्यकौषधीनां भूजन्यरोगाणां भूमेः फलद्रुपतायाश्च ज्ञानं सधार्य लाभं प्राप्नुयात् तदर्थं इयं योजना कार्यं करोति।

सम्पूर्णभारतेऽस्मिन् सम्प्रति लघु-आपणतः दीर्घ-आपणपर्यन्तं ग्राहकविक्रतोः धनव्यवहारः Paytm, Phonepay मोविक्वीक, इत्यादि (Application) सर्वकारयोजनायां सहायकारिण्यः लाभकर्त्र्यश्च दृश्यन्ते।

डिजिटल इण्डिया सफलतायै सर्वकारेण केशलेश इति व्यवस्था कृता। तदर्थं (Bheem App) इति आरब्धा। युवकानां कृते अनेन माध्यमेन विविधक्षेत्रव्यवस्था कृता। तदर्थं व्यवसायार्थम् अवसरः प्रकटितः, तेन युवकाः कार्यं कृत्वा धनं प्राप्स्यन्ति। सर्वकारकार्यालये पूर्वम् उत्कोचप्रदानेन एव कार्याणि भवन्ति इति परिस्थितिः परन्तु अनया योजनया एतत् सर्वं दूरीभवति।

**महत्त्वम्**

डिजिटल इण्डिया योजनया मानवजीवने परिवर्तनम् आगतम्। मानवसमुदायस्य धनव्यवहारः केशलेशः सञ्जातः तेन कारणेन उत्कोचस्य महती समस्या नष्टा, कार्यम् अपि त्वरितं सुस्पष्टम् अभवत्। अधिकारिभ्यः उत्कोचप्रदानम् ओनलाइन (Online) कार्यत्वात् न क्रियते। एवं कर्गजानाम् उपयोगं संरोध्य विजाणुकयन्त्राणाम् उपयोगं विधाय प्रदूषणादिदोषाणां निवृत्तिरभवत्। मानवाः सर्वकारस्य अन्याः योजनाः जानीयुः बोधयेयुः च। कृषिकेभ्यः भूमिसम्बन्धितसूचना, कृषिसम्बन्धितप्रश्नानां निवारणम् युवकानां धनप्राप्तिः इति अनया योजनया भवितुं शक्यते॥

**उपयोगः**

डिजिटल इण्डिया अन्तर्गताः या प्रमुखाः योजनाः सन्ति, तासां योजनानाम् उपयोगेन धनादिव्यवहारः सरलः सुस्पष्टः सहजः च भवति।

**ब्रोडब्रेड हाइवे सुविधा -**

अनया योजनया प्रत्येकं ग्रामः आन्तरजालयुक्तः संयोजितश्च भविष्यति। अतः कृषिव्यापारादिसर्वकारयोजनानां ग्रामीणाः ज्ञानं प्राप्स्यन्ति।

**मोबाइल कनेक्टीविटी ( चलभाषसंयोजनम् ) (Mobile Connectivity)**

नगरस्थितजनाः कुशलदूरवाणीं (Smart Phone) धारयन्ति, परन्तु ग्रामीणाः न धारयन्ति। अतः वर्तमान वृत्तपत्रकाणां बोधनं न कुर्वन्ति। तेऽपि धनव्यवहारं वित्तकोषस्य व्यवहारं च स्वीयदूर्वाण्या कुर्युः तदर्थेयं योजना इति।

**ई-गर्वनन्स**

इयं योजना महत्त्वपूर्णास्ति। अस्यां योजनायां सर्वप्रकारकावेदनपत्रकार्याणि (Online) क्रियन्ते।

**इ-क्रांतिः ( विजाणुकक्रान्ति )**

सर्वासु योजनासु सर्वोत्तमा योजना इयम् अस्ति। अस्यां योजनायां ब्रोडब्रेड कनिक्टिविटी दीयते निःशुल्कः (wi-fi) प्रकारकशैक्षणिकविषयाणां (Online) स्थापनं क्रियते। विजाणुकशिक्षणेन Online Medical वैदकीयं ज्ञानं भवति। मानवजीवनम् अनया योजनया परिवर्तनशीलं विकसितं सुदृढं च सञ्जातम्। मानवानां सर्वाणि कार्याणि अविलम्बितानि सुस्पष्टानि जातानि।

**केशलेशः ( मुद्रारहितधनव्यवस्था )**

मुद्रारहितभारतस्य कार्यक्रमस्यारम्भः प्रधानमन्त्रि नरेन्द्रमोदिनः अध्यक्षतायाम् अभवत्। केशलेशभारते डिजिटल इण्डिया योजनायाः एव एकः महत्त्वपूर्णप्रकारः अस्ति।

का नाम केशलेश-अर्थव्यवस्था ? तर्हि यत्र मानवानां सम्पूर्णधनव्यवहारः इलोक्ट्रोनिक (विजाणुक) रूपेण सञ्जायते सा एव केशलेश-अर्थव्यवस्था इति कथ्यते।

केशलेशभारतस्य मुख्यम् उद्देश्यं सुचारू अर्थव्यवस्था सञ्चालनाय विद्यते। ८ नवेम्बर २०१७ तमे दिनाङ्के भारतसर्वकारेण पञ्चशतस्य संहस्रस्य च धनमुद्रा दूरीकृता तत्समये जनाः चिन्तायुक्तमनस्काः अभवन्। प्रारम्भे तु जनेभ्यः अव्यवस्थाः जाताः परन्तु लाभोऽपि प्राप्तः। पदमिदं सर्वकारेण उत्कोचनिर्मूलनाय, कृष्णधननष्टाय, आतङ्कवादिभ्यः धनप्रवेशनम् अवरोधनाय च उत्थापितम्। एतत् सर्वकारस्य साहसिकं पदम् आसीत्। प्रारम्भे समस्या जाता परिणामेऽमृतोपमम् इति।

**यथा भगवद्गीतायां उक्तम् -**

**''यत्तदग्रे विषमिव परिणामेऽमृतोपमम्'' इति।**

सम्प्रति भारतीयाः डिजिटलमाध्यममनुसृत्य धनव्यवहारं कुर्वन्तः दृष्टिगोचराः भवन्ति। यथा क्रेडीटकार्ड, डेबिटकार्ड, कुशलदूरवाणी, भीम एप, ईपर्स आदि इलोक्ट्रोनिकसञ्चारद्वारा धनव्यवहारं कुर्वन्तः सन्ति।

**महत्त्वम् -**

मानवानां केशलेशमाध्यमेन धनव्यवहारः सुगमः सरलंश्च भवति। अनेन माध्यमेन उत्कोचप्रदानं भ्रष्टाचारादिकार्यं नष्टं भविष्यति। आबालवृद्धः सुखसम्पन्नश्च भविष्यति। पूर्वं धनमुद्रां नीत्वैव अन्यस्थाने गमनं कर्तुं जनाः अशक्नुवन्। परन्तु सम्प्रति जनसमीपे धनं न स्यात् तथापि अन्यस्थाने गन्तुं शक्नोति किमपि क्रेतुम् अथवा अन्यजनेभ्यः धनं दातुं शक्नोति। यथा -

**मोबाईल वोलेट ( चलधनस्यूतः )**

दूरवाण्याम् आभासि धनस्यूतं (वोलेट) भवति। तेन किमपि क्रेतुं धनसञ्चयितुं शक्यते। तद्धनेन इप्सितवस्तूनां क्रयणं क्रियते।

### प्लास्टिकमनी

प्लास्टिकमनी इति किं ? तर्हि ATM Card, Debitcard इत्यादी: उपयोगेन धनव्यवहार: एवं वित्तस्य आदान-प्रदानं क्रियते तत् प्लास्टिकमनी धनव्यवहार: कथ्यते।

### नेट बेंकींग ( आन्तरजालवित्तकोषीयव्यवस्था )

अनया योजनया वित्तकोषसेवाया: सङ्गणकयन्त्रम् इव दूरवाणीयन्त्रेण इन्टरनेटमाध्यमेन वित्तस्य आदानप्रदानं कर्तुं शक्यते इति।

### वैशिष्ट्यम्

केशलेशभारतमिति योजनया मानवानां कार्याणि त्वरितं सिद्धानि जातानि। अल्पेनैव कालेन बहूनि कार्याणि भवन्ति। सम्प्रति मानवा: केशलेशयोजनाया: उपयोगं विधाय समयव्ययं धनव्ययं च निवारयन्ति। अनया योजनाया करचौर्यनिवारणेन धनलाभ: भविष्यति। किञ्च कृष्णधननाश: सम्भविष्यति। तेन कारणेन असामाजिकप्रवृत्तय: नष्टा: भविष्यन्ति।

### Banking Connectivity ( वित्तकोशीयसञ्चार: )

सर्वकारेण या: उद्घोषिता: योजना: सन्ति तासां लाभग्रहणाय धनं स्वयमेव जनानां वित्तकोषाङ्क (Account) मध्ये गमिष्यति। अत: मध्ये उत्कोचकतॄणाम् अवकाश: न स्यात्। सम्प्रति सर्वेषु कार्यालयेषु कर्मकर्तृभ्य: वेतनं वित्तकोषे एव दीयते न तु प्रत्यक्षमिति, तेन समयानुसारं वेतनमपि प्राप्यते।

## स्वाध्याय:

**१. योग्यं विकल्पं चित्वा उत्तरं लिखत ?**

(१) सर्वे ग्रामा: केन संयोजिता: ?

(क) धनेन (ख) कर्गजेन (ग) आन्तरजालेन (घ) पत्रेण

(२) डिजिटल इण्डिया योजनायां सर्वकारेण का Application निष्कासिता ?

(क) पे.टी.एम. (ख) फोन-पे (ग) मनीट्रान्स्फर (घ) भीम एप

(३) कृष्णधनप्रतिषेध: कया व्यवस्थया भवति ?

(क) कृषियोजनया (ख) डिजिटल इण्डिया योजनया

(ग) मुद्रारहितव्यवस्थया (केशलेशव्यवस्थया) (घ) मुद्रासहितव्यवस्थया

(४) **'यत्तदग्रे विषमिव'** कस्मिन् ग्रन्थे विद्यते ?

(क) गीतायाम् (ख) महाभारते (ग) रामायणे (घ) उपनिषदि

(५) पञ्चशतसहस्रधनमुद्राया: सर्वकार: कदा प्रतिबन्धम् अकरोत् ?

(क) 8 नवेम्बर (ख) 10 नवेम्बर (ग) 12 नवेम्बर (घ) 13 नवेम्बर

(६) कस्यां योजनायां फ्री वाईफाई दीयते ?

(क) गर्वनन्स (ख) ई-क्रांति (ग) नेटबेंकींग (ग) एकोऽपि न

**२. एकेन वाक्येन उत्तरं लिखत।**

(१) डिजिटलयोजनायाः आरम्भः कदा अभवत् ?

(२) केशलेशभारतं इति कार्यक्रमस्यारम्भः कस्य अध्यक्षतायाम् अभवत् ?

(३) केशलेशमाध्यमेन मानवानां धनव्यवहारः कीदृशः अभवत् ?

(४) भारतदेशे डिजिटलयोजनया का महती समस्या नष्टा ?

(५) सर्वप्रकारकावेदनपत्रकार्याणि (Online) कस्यां योजनायां विद्यते ?

**३. द्वित्रिर्वाक्यैः उत्तरं लिखत।**

(१) का नाम केशलेश - अर्थव्यवस्था ?

(२) कृषकस्य कृते कथम् इयं योजना उपयोगिनी भवेत् ?

(३) ब्रोडब्रेडहाइवे सुविधा किम् अस्ति ?

**४. सविस्तरम् उत्तरं लिख्यत।**

(१) डिजिटलइण्डियायोजनायाः महत्त्वं प्रतिपादयत।

(२) केशलेशभारतम् इत्यस्य प्रकारान् चर्चयत।

(३) बैंककनेक्टीविटी अर्थात् किम् अस्ति ज्ञापयत।

**५. टिप्पणी लेख्या।**

(१) केशलेशभारतम्।

(२) डिजिटलइण्डिया इत्यस्य प्रमुखाः योजनाः।

**छात्रप्रवृत्तिः**

- यथासमयं 'गुगल-पे', 'पेटीएम' इत्यादिविषयक प्रायोगिकं ज्ञानं प्राप्तव्यम्।

**सुभाषितम्**

**अर्थानामर्जने दुःखम्**
**अर्जितानां च रक्षणे।**
**आये दुःखं व्यये दुःखं**
**हा ! कष्टं वित्तरक्षणम्॥**

●

# १२ भारतस्य राष्ट्रपतिः

**प्रस्तावना**

संघस्य कार्यपालिकायाः प्रमुखः भारतस्य राष्ट्रपतिः अस्ति। अस्माकं भारतदेशस्य सर्वोच्चाधिकारी राष्ट्रपतिः अस्ति। संघसर्वकारस्य सर्वासां कार्यकारिणीनां समितीनां नेतृत्वम् अधिनियमद्वारा संविधानस्य अनुच्छेद ५९ (एकोनषष्टिः) द्वारा राष्ट्रप्रमुखाय पदमस्ति। अतः सः भारतीयप्रजायाः प्रतिनिधित्वं करोति एवञ्च संरक्षणदलस्यापि नेता भवति। राष्ट्रपतेः चयनं संसदद्वारा जायते।

भारतस्य राष्ट्रपतिः राष्ट्रस्य प्रमुखः भवति। अतः सः राष्ट्रस्य शीर्षे स्थाने भवति। यदा राष्ट्रे एकात्मकशासनं भवति तदा संघस्य सर्वमधिकारं विहाय राष्ट्रपतेः शासनम् एव प्रचलति। तदा राष्ट्रपतिशासनं अथवा तु आपात्कालीन स्थितिः भवति, तस्मिन् समये राष्ट्रपतिः एव सर्वोपरि भवति।

---

## राष्ट्रपतेः योग्यता

भारतीयसंविधानस्य अनुच्छेद ५२ द्विपञ्चाशद् अनुसारं भारतदेशस्य एकः राष्ट्रपतिः भविष्यति। राष्ट्रपतिः राष्ट्रस्य संविधानस्य प्रमुखः तथा देशस्य प्रथमः नागरिकः अस्ति। ५८ अष्टपञ्चाशद् अनुच्छेदानुसारं राष्ट्रपतेः योग्यता अधोलिखिता वर्तते।

(क) सः भारतस्य नागरिकः भवेत्।

(ख) तस्य आयुः ३५ पञ्चत्रिंशत् वर्षाणि अवश्यमेव भवेत्।

(ग) लोकसभायाः सदस्यतायाः अहर्ता अवश्यमेव भवेत्।

(ख) निर्वाचनसमये कस्मिन्नपि संवैधानिक (लाभ) पदे आसीनः न भवेत्।

अस्माकं देशस्य राष्ट्रप्रमुखस्य निर्वाचनं परोक्षरीत्या भवति। प्रजाजनैः निर्वाचनद्वारा निर्णीतः राष्ट्रपतिः प्रजायाः प्रतिनिधिस्वरूपः मन्यते। इग्लैंण्डदेशे परम्परानुसारं राजा, राज्ञी वा देशस्य सर्वोच्च पदाधिकारं प्राप्नोति। तत्र निर्वाचन प्रथा नास्ति। राष्ट्रपतिपदाय भारतस्य नागरिकत्वमावश्यकम् अस्ति। वयमर्यादा पञ्चत्रिंशदधिका स्यात्। राष्ट्रपतिप्रत्याशी लोकसभायाः सभ्यार्हः स्यात्। एवञ्च सर्वकारस्य संवैधानिककर्मचारी नैव स्याद् - इति। राष्ट्रप्रमुखपदे नियुक्तः सन् सः राज्यसंसदः धारासभायां सभ्यः भवितुं न शक्नोति। अन्यत् किमपि संवैधानिकपदं स्वीकर्तुं न शक्नोति।

## निर्वाचनम्

राष्ट्रपतिनिर्वाचनं संसत्सभाविधानसभयोः नियुक्तसभ्यैः निर्णितेन मतदातृमण्डलेन भवति। सर्वराज्यानां समानप्रतिनधित्वं भवेद् इत्यर्थम् एषा व्यवस्था कृतास्ति। जनैः प्रत्यक्षरीत्या निर्वाचनं न भवति। अतः परोक्षरीत्या कथ्यते। तस्य कारणमस्ति यद् भारतदेशे संसदीयलोकतन्त्रमस्ति। न तु प्रमुखीयसर्वकारः।

## राष्ट्रपतेः समयावधिः

राष्ट्रपतिपदस्य कालावधिः पञ्चवर्षात्मकः भवति। स एव द्वितीयवारं निर्वाचनार्थं निर्वाचनेन स्थातुं शक्नोति। राष्ट्रपतिपदमलङ्कुर्वाणः प्रतिज्ञां गृह्णाति यत् - ''संविधानस्य स्वपदस्य जनानाञ्च सेवां करिष्यामि'' इति। नियमस्य भङ्गे सति सः तत्पदात् दूरीकर्तव्यः (पदच्युतः) भविष्यति इति संविधाने लिखितमस्ति। संसदः सभागृहमेकं राष्ट्रपतिं प्रति आरोपाक्षेपं करोति। अन्यद् गृहं कार्यं करोति। तत्र यदि अधिकासंख्या तर्हि दोषयुक्तेन राष्ट्रपतिना स्वपदं त्याज्यमेव। राष्ट्रपतिपदमलङ्कुर्वाणः स्यात् तदा तस्य बन्दीकरणं कर्तुं न शक्नुवन्ति केचन इति।

अस्माकं देशः पञ्चाशदुत्तरैकविंशतितमे ख्रिष्टाब्दे जनवरीमासस्य षड्विंशे दिनाङ्के गणतन्त्रः सञ्जातः। तावत्कालादारभ्य इदानीं यावद् अस्माकं राष्ट्रप्रमुखाः इमे महानुभावाः सञ्जाताः। तेषां नामानि कार्यकालः च अधोदर्शितः अस्ति –

| | महानुभावानां नामानि | कार्यकालः |
|---|---|---|
| १. | डॉ. राजेन्द्रप्रसादः (अद्यावधिः दीर्घकालसमयावधिः) | १९५० तः १९६२ यावत्। |
| २. | डॉ. सर्वपल्ली राधाकृष्णन् | १९६२ तः १९६७ यावत्। |
| ३. | डॉ. जाकीर हुसैनः | १९६७ तः १९६९ यावत्। (कार्यकाले एव पञ्चत्वं प्राप्तम्) |
| ४. | वराहगिरिः वैंकटगिरिः (प्रथम कार्यकारी राष्ट्रपतिः) | १९६९ वर्षे। |
| ५. | मोहम्मद हिदायतुल्ला | १९६९ वर्षे। |
| ६. | वराहगिरिः वैंकटगिरिः | १९६९ तः १९७४ यावत्। |
| ७. | फकरुद्दीन अलीअहमदः | १९७४ तः १९७७ यावत्। |
| ८. | वी. डी. जत्ती (कार्यकारी) | १९७७ वर्षे। |
| ९. | नीलम संजीव रेड्डी | १९७७ तः १९८२ यावत्। |
| १०. | ज्ञानी जैलसिंह | १९८२ तः १९८७ यावत्। |
| ११. | आर. वैंकटरमन | १९८७ तः १९९२ यावत्। |
| १२. | डॉ. शंकरदयाल शर्मा | १९९२ तः १९९७ यावत्। |
| १३. | के. आर. नारायणन् | १९९७ तः २००२ यावत्। |
| १४. | डॉ. ए. पी. जे. अब्दुलकलामः | २००२ तः २००७ यावत्। |
| १५. | प्रतिभा पाटिलः (प्रथम महिला राष्ट्रपतिः) | २००७ तः २०१२ यावत्। |
| १६. | श्री प्रणवमुखर्जी | २०१२ तः २०१७ यावत्। |
| १७. | श्री रामनाथ कोविन्दः | २०१७ तः वर्तमानकालपर्यन्तम्। |

## राष्ट्रपतेः कार्यमुत्तरदायित्वं च

भारतस्य संविधानद्वारा राष्ट्रपतिना महती सत्ता प्राप्तास्ति। किन्तु व्यावहारिकरूपेण सर्वेषां सत्ताधिकारणामुपभोगः प्रधानमन्त्रिणा प्रधानमण्डलेन च क्रियते।

(१) कार्यकारिणी सत्ता। (२) न्यायतन्त्रीयसत्ता। (३) धाराकीयसत्ता। (४) राजनैतिकाऽपात्कालीनसत्ता। (५) वित्तीयापत्कालीनसत्ता।

एतेषु पञ्चविभागेषु राष्ट्रपतेः उत्तरदायित्वमस्ति। एषु विभागेषु यत् किमपि परिवर्तनं कर्तव्यं चेत्, राष्ट्रपतेः आज्ञानुसारम् एव भवति।

### कार्यकारिणी सत्ता

अत्र राष्ट्रपतिः लोकसभायां बहुमतधारकस्य पक्षस्य नेतारं प्रधानमन्त्रिपदे नियोजयति। प्रधानमन्त्रिणा प्रधानमण्डलस्य रचना क्रियते। प्रधानमन्त्री राष्ट्रपतेः इच्छानुसारं शासनं करोति। तथापि लोकसभायाः आधारत्वात् प्रधानमण्डलं विसर्जयितुं न कोऽपि समर्थः भवति। अन्यराष्ट्रं प्रति युद्धं कर्तुम् अकर्तुमथवा स्थगयितुं राष्ट्रपतिः निर्णयं करोति। एवञ्च राज्यपालानां न्यायाधीशानां निर्वचनाधिकाराणां संघसेवा-योगाध्यक्षाणां सभ्यानां विविधदेशेषु-भारतीय राजदूतानां च नियुक्तिमपि करोति। एषा व्यवस्था कार्यकारिणी सत्ता इति कथ्यते।

### संवैधानिकम्

संसदः गृहद्वयस्य आयोजनं तस्य स्थगनम् इत्यादिकं सर्वं राष्ट्रपतिः करोति। राज्यसभायाः द्वादश सभ्यानां नियुक्तिः निर्वाचननिन्तरं गृहद्वयस्य उद्‌घाटनं प्रतिवर्षं संसदः प्रथमसत्रस्य प्रारम्भः इत्यादिकं राष्ट्रप्रमुखस्य अभिभाषणेनैव भवति। संसदा प्रसारितः नियमः राष्ट्रपतेः आज्ञानुसारेण बन्धारणस्य नियमः भवति। सः वार्षिकसंभवितायव्ययपत्रं लोकसभायां प्रेरयितुं समर्थोऽस्ति।

### आपत्कालीनसत्ता

यदि राष्ट्रपतेः सन्देशः मिलति यत् युद्धं बाह्याक्रमणं, सशस्त्रदलस्याक्रमणं वा देशोपरि भविष्यति, तदा सः समग्रदेशं तत्प्रदेशं वा आपात्कालीनं घोषयति एवञ्च नागरिकनियमान् गौणीकृत्य समयोचितान् नूतननियमान् संसद् - राज्यविषयेषु निर्मापयति तथा च प्रधानमण्डलं राज्यं च आदिशति। बन्धारणीयः आपत्कालः अर्थात् राज्ये संवैधानिकनियमानुसारं सर्वकारः न चलति। तादृश्यां परिस्थितौ राष्ट्रपतिः स्वयं राज्यसत्तां करोति।

### वित्तीयापत्कालीनसत्ता

आर्थिकापत्तौ विनिमयमन्दतायां वित्तीयसंकटसमये च कर्मचारिणां वेतनेषु न्यूनतां कर्तुं समर्थः अस्ति राष्ट्रपतिः। राज्यानाम् आर्थिकसिद्धान्तानां पालनं कर्तुम् आदिशति एवञ्च एतस्मिन् काले औपचारिकत्वेऽधिकारे राष्ट्रप्रमुखः संसदीयलोकतन्त्रस्य परम्परानुसारं प्रधानमण्डलेन सह मिलित्वा कार्यं करोति। इदमेव राष्ट्रपतिना कर्तव्यम् इति संविधानस्य नियमः वर्तते।

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा उत्तरं लिखत ?**

(१) अस्माकं देशस्य राष्ट्रप्रमुखस्य निर्वाचनं कथं भवति ?

(क) परोक्षरीत्या (ख) प्रत्यक्षरीत्या (ग) अन्यरीत्या (घ) साक्षात्काररीत्या

(२) कुत्र परम्परानुसारतः राजा राज्ञी च देशस्य सर्वोच्चपदाधिकारं प्राप्नोति ?

(क) अमेरिकादेशे (ख) जर्मनदेशे (ग) इंग्लैंण्डदेशे (घ) ओस्ट्रेलियादेशे

(३) राष्ट्रपतिपदस्य कालावधिः कति वर्षात्मकः भवति ?

(क) त्रिवर्षात्मकः (ख) सप्तवर्षात्मकः (ग) पञ्चवर्षात्मकः (घ) द्विवर्षात्मकः

(४) भारतस्य सर्वोच्चपदं कः अलङ्करोति ?

(क) प्रधानमन्त्री (ख) राष्ट्रपतिः (ग) उपराष्ट्रपतिः (घ) शिक्षामन्त्री

(५) प्रधानमण्डलस्य रचनां कः करोति ?

(क) राष्ट्रपतिः (ख) प्रधानमन्त्री (ग) लोकसभाध्यक्षः (घ) राज्यसभाध्यक्षः

(६) भारतस्य प्रथमराष्ट्रपतिः कः आसीत् ?

(क) डॉ. जाकिरहुसेनः (ख) ज्ञानी जैलसिंहः (ग) डॉ. राजेन्द्रप्रसादः (घ) आर. वैंकटरमन्

(७) राष्ट्रपतिः लोकसभायां बहुमतधारकस्य नेतारं कस्मिन् पदे नियोजयति ?

(क) प्रधानमन्त्रिपदे (ख) अध्यक्षपदे (ग) शिक्षामन्त्रिपदे (घ) रिक्तस्थानपदे

(८) अन्यराष्ट्रं प्रति युद्धं कर्तुम् अकर्तुं कः निर्णयं करोति ?

(क) प्रधानमन्त्री (ख) राष्ट्रपतिः (ग) लोकसभाध्यक्षः (घ) शिक्षामन्त्री

(९) डॉ. शङ्करदयालशर्मा कतमः राष्ट्रपतिः आसीत् ?

(क) दशमः (ख) नवमः (ग) द्वादशतमः (घ) प्रथमः

(१०) वर्तमानभारतराष्ट्रे राष्ट्रपतिपदे नियुक्तः कः अस्ति ?

(क) डॉ. राजेन्द्रप्रसादः (ख) श्री नीलमसंजीव रेड्डी

(ग) श्री रामनाथ कोविन्दः (घ) डॉ. शङ्करदयालशर्मा

**२. एकेन वाक्येन उत्तरं लिखत।**

(१) राष्ट्रपतिः अस्माकं देशस्य कीदृक् अधिकारी भवति ?

(२) राष्ट्रपतिः स्वयं राज्यसत्तां कदा स्वीकरोति ?

(३) राष्ट्रप्रमुखः आपत्कालीनं कदा घोषयति ?

(४) प्रधानमन्त्री कस्येच्छानुसारं शासनं करोति ?

(५) नीलमसंजीव रेड्डी कस्मिन् वर्षे राष्ट्रपतिः आसीत् ?

(६) डॉ. सर्वपल्ली राधाकृष्णन् कतमः राष्ट्रपतिः आसीत् ?

(७) लोकसभायाः स्थगनं कः करोति ?

(८) राज्यसभायां कति सभ्यानां नियुक्तिः भवति ?

(९) संक्षरणदलस्य नेता कः वर्तते ?

**३. द्वित्रिर्वाक्यैः उत्तरं लिखत।**

(१) राष्ट्रपतिनिर्वाचनं कथं भवति ?

(२) राष्ट्रपतिः पदग्रहणसमये कां प्रतिज्ञां गृह्णाति ?

(३) राष्ट्रपतेः उत्तरदायित्वं किम् अस्ति ?

**४. टिप्पणी लेख्या।**

(१) राष्ट्रपतेः कार्यम्।

(२) अधुनापर्यन्तं के के राष्ट्रप्रमुखाः अभवन् ?

**५. संयोजने कुरुत।**

| अ | ब |
|---|---|
| (१) वराहगिरिः वेंकटगिरिः | १९८२ |
| (२) के. आर. नारायणन् | २००२ |
| (३) आर. वेंकटरमन् | १९८७ |
| (४) डॉ. ए. पी. जे. अब्दुलकलामः | १९९७ |
| (५) ज्ञानी जैलसिंहः | १९६९ |
| | १९५० |

**छात्रप्रवृत्तिः**

- शिक्षकस्य मार्गदर्शनेन छात्रैः प्रार्थनासभायां लोकसभाविषयकं लघुनाटकं अभिनेतव्यम्।

**सुभाषितम्**

**इन्द्रात् प्रभुत्वं ज्वलनात् प्रतापं,**
**क्रोधो यमाद्वैश्रवणाच्च वित्तम्।**
**पराक्रमं रामजनार्दनाभ्याम्,**
**आदाय राज्ञः क्रियते शरीरम्॥**

●

# १३ भारतस्य अन्ताराष्ट्रियसम्बन्धनिरूपणम्

**प्रस्तावना**

एकं राष्ट्रं स्वहितार्थम् अन्ताराष्ट्रैः सह सम्बन्धं स्थापयति। अन्यराष्ट्रैः सह स्वसम्बन्धानां स्वरूपं स्थिरं कर्तुं निर्णयानां क्रियान्वयनमेव विदेशनीतिः। विदेशनीतिः एका स्थायी नीतिः भवति या राष्ट्रियजीवनमूल्यैः निर्मिता भवति।

विदेशनीतिः वैदेशिकसम्बधानां सारभूतं तत्त्वं वर्तते। वर्तमानविश्वस्य राष्ट्राणि भौगोलिकस्थित्यनुसारेण दूरे स्थितानि सन्ति तथाऽपि आधुनिकसञ्चारसाधनैः सामीप्यमनुभवन्ति। विश्वस्य कस्मिन्नपि भागे यत् किमपि विशिष्टं विघटितं भवति, तस्य प्रभावः सर्वेषु राष्ट्रेषु भवति। विश्वस्य सर्वाणि राष्ट्राणि परस्परावलम्बितानि सन्ति, अतः एव वर्तमानविश्वस्य राजनीतौ अन्ताराष्ट्रियसम्बन्धानां निर्माणस्य विकासस्य स्वराष्ट्रहितानुकूलं सञ्चालनं कर्तुं श्रेष्ठविदेशनीतिः परमावश्यकी भवतीति।

---

**भारतस्य विदेशनीतिः**

भारतस्य विदेशनीतेः विश्वोपरि सुप्रभावः वर्तते। भारतस्य भूतकालः अतीव गौरवपूर्णः आसीत्। भारतं सर्वैः राष्ट्रैः सह मैत्रीपूर्णसंबन्धस्थापनार्थं सदैव प्रयत्नशीलं वर्तते। भारतीयविदेशनीतेः मूलं भारतीयसंस्कृतिमूले, प्राचीन-मध्ययुगीनचिन्तनशैल्यां, स्वाधीनतासंघर्षभावे, राष्ट्रनीतिः राष्ट्रसंरक्षणं - राष्ट्रविकासभावे च स्थितं वर्तते।

**भारतस्य विदेशनीतेः प्रमुखलक्ष्यम्**

(१) भारतं विश्वस्य उच्चतमं शक्तियुतं राष्ट्रं भवेत्।

(२) भारतस्य औद्योगिकविकासाय अन्य-राष्ट्रेभ्यः आर्थिकसहायताप्राप्तिः भवेत्।

(३) एशिया-अफ्रीकाराष्ट्राणां स्वतन्त्रता-प्रयास-समर्थनम्।

(४) राष्ट्रमण्डलस्य राष्ट्रेभ्यः स्थायि-घनिष्ठ-सम्बन्ध-निर्माणम्।

(५) राष्ट्रीयहितानां सम्पूर्तिः।

(६) विदेश-व्यापार-विकासाय उपयोगिवातावरण-निर्माणम्।

(७) प्रवासीभारतीयहितानां संरक्षणम्।

(८) परस्पर-आर्थिक-विकासाय जनहितसंरक्षणाय च मैत्रीभावसम्पादनम्।

(९) संयुक्तराष्टसंघस्य समर्थनं सहयोगश्च।

**भारतस्य विदेशनीतेः निर्धारितानि तत्त्वानि**

भारतस्य विदेशनीतेः निर्धारितानि तत्त्वानि एतानि सन्ति - यथा (१) भौगोलिकतत्त्वम्। (२) दलनिरपेक्षता। (३) ऐतिहासिकपरम्परा:। (४) राष्ट्रियहितम्।

(१) भौगोलिकतत्त्वम् - भारतस्य विदेशनीतिनिर्धारणे भारतस्य क्षेत्रफलस्य, एशिया-खण्डे स्वविशिष्टस्थितेः सामुद्रिकपर्वतीयसीमानां च विशिष्टं स्थानं वर्तते।

(२) गुटनिरपेक्षता (दलनिरपेक्षता) - समस्तं जगत् साम्यवादः धनवादश्चेति मार्गद्वये विभक्तमासीत्। परस्परं शीतयुद्धं प्रवर्तितमासीत्। भारतं दलनिरपेक्षं भूत्वा अन्ताराष्ट्रियमैत्रीभाव-उत्पादने सहायकं सिद्धं भवति।

(३) ऐतिहासिक-परम्परा: - भारतस्य विदेशनीतिः सदैव शांतिप्रिया वर्तते। भारतीया प्राचीना संस्कृतिः श्रेष्ठा वर्तते तथा च इतिहासः गौरवपूर्णः वर्तते। भारतेन अद्यपर्यन्तं कस्यापि राष्ट्रोपरि स्वप्रभुत्वस्थापनाय न कदापि प्रयत्नः कृतः। एषा एव परम्परा वर्तमानविदेशनीतौ अपि दृश्यते।

(४) राष्ट्रहितम् - कस्यापि राष्ट्रस्य विदेशनीतेः आधारः स्वराष्ट्रहितस्य सुरक्षा भवति, भारतस्य विदेशनीतेः लक्ष्यमपि एतदेव वर्तते। स्वराष्ट्रहितस्य सुरक्षा भवेत् एतदर्थं अस्माभिः देशहिताय प्रजाहिताय च कार्यं कर्तव्यम्।

**भारतदेशस्य विदेशनीतेः प्रमुखसिद्धान्ताः**

भारतदेशस्य विदेशनीतेः प्रमुखसिद्धन्ताः निम्नलिखितास्सन्ति। यथा -

(१) दलनिरपेक्षता। (२) साम्राज्यवादस्य उपनिवेशवादस्य च विरोधः। (३) जातिगत-भेदभावस्य विरोधः। (४) पञ्चशीलम्। (५) विश्वशान्त्यै समर्थनम्। (६) निःशस्त्रीकरणस्य समर्थनम्। (७) परमाणुनीतिः। (८) सार्कसहयोगः।

(१) दलनिरपेक्षता - विश्वस्मिन्शान्तिः सुरक्षा च सदा भवेत् एतदर्थं दलनिरपेक्षता-नीतिः भारतेन स्वीकृता। एषा नीतिः न तु पलायनवादिनी न वा भिन्नतावादिनी, अपि तु मैत्रीपूर्णसहयोगवादिनी अस्ति।

(२) साम्राज्यवादस्य उपनिवेशवादस्य च विरोधः - भारतं ब्रिटिशसाम्राज्यवादस्य अन्तर्गतं दासतायाः दुष्टपरिणामेन परिचितं वर्तते। अतः भारतस्य साम्राज्यवादस्य विरोधः स्वाभाविकः। भारतं संयुक्तराष्ट्रसंघे उपनिवेशवादस्य विरोधं करोति। इण्डोनेशिया, लीबिया, नामीबिया इत्यादि राष्ट्राणि साम्राज्यवादसमर्थकानि सन्ति।

(३) नस्लवाद-भेदभावस्य विरोधः - भारतदेशः सर्वान् देशान् प्रति आदरभावं स्वीकरोति। अतः एव स्वतन्त्रतापूर्वं दक्षिणअफ्रीका देशस्य प्रजातिरंगभेदनीतेः राष्ट्रसंघे वारं-वारं प्रश्नं कुर्वन्नासीत्। भारतदेशः जर्मनीदेशस्य जातिवादिनीतेः अपि विरोधं कृतवान् अनेन प्रकारेण अन्ताराष्ट्रियसमुदाये नस्लवादस्य पूर्णसमाप्तिः एव भारतीयविदेशनीतेः प्रमुखसिद्धान्तः अस्ति।

(४) पञ्चशीलम् - पञ्चशीलं सर्वप्रथमं तिब्बत-प्रखण्ड-प्रसंगे २९ मई १९५४ दिने भारतचीनमध्ये सञ्जातायां सन्धौ साकारीसफला अभवत्। पञ्चशीलस्यार्थः पञ्चनियमानामाचरणम् इति भवति, अत्र निम्नपञ्चनियमाः सन्ति। (१) प्रादेशिक-अखण्डतायाः संप्रभुतायाश्च आदरभावः। (२) अनाक्रमणम्। (३) आन्तरिकविषयेषु परस्परं हस्तक्षेपस्य अभावः। (४) समानता पारस्परिकलाभाश्च। (५) शान्तिपूर्णः सहयोगः।

(५) विश्वशान्त्यै समर्थनम् - भारतं संयुक्तराष्ट्रसंघस्य प्रभावी सदस्यः वर्तते। भारतं विश्वशान्त्यै सदैव क्रियाशीलम् अस्ति। भारतम् आई.एल.ओ. (ILO), युनीसेफ (UNICEF), एफ.ए.ओ. (FAO), युनेस्को (UNESCO) इत्यादिभिः सह सक्रियरूपेण सम्मिलितं वर्तते। भारतं सदैव लोकानां सामाजिककल्याणाय आर्थिककल्याणाय च संयुक्तराष्ट्रस्य निदेशानां पालनं करोति।

(६) निःशस्त्रीकरणस्य समर्थनम् - भारतदेशः अद्यापि शस्त्रस्पर्धायाः समाप्तेः समर्थकः वर्तते। एतदर्थं शस्त्रनिर्माणनिरोधः निर्मितशस्त्राणां च नाशः आवश्यकः भवति। केवलं निःशस्त्रीकरणमेव अन्ताराष्ट्रियां शान्तिं सुदृढां कर्तुं समर्थमस्ति। निःशस्त्रीकरणाद् रक्षितधनात् राष्ट्राणां विकासः भवितुमर्हति।

(७) परमाणुनीतिः - भारतस्य परमाणुनीतिः युद्धे परमाणु-प्रयोग-विरुद्धाऽस्ति। भारतं अन्तरिक्षस्य परमाणुकरणस्य समर्थनं न करोति, तथाऽपि परमाणु अप्रसारसन्धेः विरोधकः यतो हि एषः सन्धिः पक्षपाताधारभूतोऽस्ति।

(८) सार्कसहयोगः - दक्षिणएशियाराष्ट्रैः सह-मैत्रीसम्बन्धविकासाय भारतेन सार्कस्थापनायां सहयोगः दत्तः। सार्कसंघटने भारत-नेपाल-श्रीलंका-बांग्लादेश-पाकिस्तान-भूटान-मालदीव इत्यादिराष्ट्राणि सम्मिलितानि सन्ति।

एवं पूर्वोक्तसिद्धान्ताः भारतस्य राष्ट्रहित-उद्देश्य-प्राप्तौ सहायकाः भवन्ति तथा च भारतस्य विदेशनीति गतिप्रदायकाः भवन्ति।

**महत्त्वम्**

विशिष्टयोग्यविदेशनीति-आधारेण भारतं विश्वगुरुपदोपरि आरोढुं प्रयतते। भारतस्य औद्योगिकविकासाय अन्यराष्ट्रैः सह आर्थिकसहायतां प्राप्तुं विदेशनीतेः स्थानं महत्त्वपूर्णम् अस्ति। अन्यराष्ट्रैः सह योग्यसम्बन्धार्थं योग्या विदेशनीतिः परमावश्यकी भवति। श्रेष्ठविदेशनीत्याधारेण सह व्यापारस्य विकासार्थं योग्या विदेशनीतिः अत्यावश्यकी भवति। योग्यविदेशनीति-आधारेण प्रवासीभारतीयानां हितानां संरक्षणं कर्तुं शक्यते। पारस्परिक-आर्थिक-हिताय तथा च

जनहितरक्षणाय एशिया-अफ्रीका-राष्ट्राणाम् एकीकरणाय श्रेष्ठविदेशनीतेः स्थानं महत्त्वपूर्णम् अस्ति। योग्यविदेशनीत्याधारेण संयुक्तराष्ट्रसंघस्य समर्थनं तथा सहयोगं सफलतापूर्वकं कर्तुं शक्यते। अन्ताराष्ट्रियशान्तिस्थापनार्थं तथा च परस्परसहयोगपूर्णसम्बन्धस्थापनार्थं योग्य-विदेशनीतेः स्थानं महत्त्वपूर्णं सिद्धं भवतीति।

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा उत्तरं लिखत ?**

(१) भारतस्य विदेशनीतेः कस्योपरि सुप्रभावः वर्तते ?

(क) विदेशोपरि (ख) प्रदेशोपरि (ग) विश्वोपरि (घ) मण्डलोपरि

(२) भारतीया प्राचीनसंस्कृतिः का वर्तते ?

(क) ज्येष्ठा (ख) श्रेष्ठा (ग) अश्रेष्ठा (घ) भ्रष्टा

(३) का नीतिः भारतेन स्वीकृता ?

(क) राजनीतिनिरपेक्षता (ख) पक्षनिरपेक्षता (ग) दलनिरपेक्षता (घ) साम्यवादनिरपेक्षता

(४) पञ्चशीलस्य कति नियमास्सन्ति ?

(क) १ (ख) २ (ग) ५ (घ) ४

(५) संयुक्तराष्ट्रसंघस्य प्रभावी सदस्यः कः ?

(क) नेपालः (ख) पाकिस्तानः (ग) श्रीलंका (घ) भारतम्

(६) केषां हितानां संरक्षणं कर्तुं शक्यते ?

(क) प्रवासीभारतीयानाम् (ख) प्रवासीवैदेशिकानाम् (ग) प्रवासीजनानाम् (घ) प्रवासीहितानाम्

(७) कस्याः स्थानं महत्त्वपूर्णम् अस्ति ?

(क) भारतनीतेः (ख) विदेशनीतेः (ग) जननीतेः (घ) कल्याणनीतेः

**२. एकेन वाक्येन उत्तरं लिखत।**

(१) विश्वस्योपरि सुप्रभावः कस्य वर्तते ?

(२) भारतस्य विदेशनीतेः कति तत्त्वानि सन्ति ?

(३) भारतदेशः कं प्रति आदरभावं स्वीकरोति ?

(४) भारतीयविदेशनीतेः प्रखुसिद्धन्ताः के ?

(५) कैः सह मैत्रीसम्बन्धविकासाया भरतेन सार्कस्थापनायां सहयोगः दत्तः ?

(६) व्यापारस्य विकासार्थं का अत्यावश्यकी ?

**३. टिप्पणी लेख्या।**

(१) भारतस्य विदेशनीतिः।

(२) दलनिरपेक्षता।

(३) राष्ट्रियहितम्।

(४) भौगोलिकतत्त्वम्।

**४. संयोजनं कुरुत।**

| अ | ब |
|---|---|
| (१) खण्डित: भाग: | दलनिरपेक्षता |
| (२) अस्माकं देशे | अनाक्रमणम् |
| (३) गुटनिरपेक्षता | नेपाल-श्रीलंका |
| (४) पञ्चशीलम् | अनेके उत्सवा: |
| (५) सार्कसहयोग: | पाकिस्तान: |

**३. सविस्तरम् उत्तरं लिखत।**

(१) ''भारतस्य अन्ताराष्ट्रियसम्बन्धनिरूपणम्'' इति सविस्तरं चर्चयत।

(२) भारतस्य विदेशनीते: प्रमुखलक्षणानि कति कानि च तानि विलिख्य कयोश्चिद् द्वयो: लक्षणवर्णनं कुरुत।

(३) ''भारतस्य विदेशनीते: महत्त्वम्'' विषयोपरि संक्षिप्त: निबन्ध: लेख्य:।

**छात्रप्रवृत्ति:**

- भारतस्य मित्रराष्ट्रानि ज्ञातव्यानि

**सुभाषितम्**

**विदेशेषु धनं विद्या व्यसनेषु धनं मति:।**
**परलोके धनं धर्म: शीलं सर्वत्र वै धनम्॥**

●

# १४ समाजशास्त्रम्

**प्रस्तावना**

सम्पूर्वक अज्धातोः समाजशब्दस्य निष्पत्तिः भवति। सम्यक्रूपेण आस्यते इति समाजः। मानवैः निर्मितः सुव्यवस्थितः समूहः समाजः भवति। समाजं विना मानवस्य, मानवं विना समाजस्य महत्त्वं नास्ति, अतः एव मानवः सामाजिकः प्राणी इत्यपि सम्बुध्यते।

समाजशास्त्रे अतुलनीया वंशावलिः, कृषिव्यवस्था, आर्थिकविकासः तेषां समस्याश्च, भौगोलिकविशिष्टता, इति। अनेकानेकविषयाणां ज्ञानं भवति। सामाजिकविज्ञाने विविधानां विज्ञानानां समावेशः जायते। तेषु विज्ञानेषु एकं समाजशास्त्रम् अपि अस्ति। यदा विज्ञानशब्दः प्रस्तूयते तदा द्वयोः विज्ञानयोः अवतरणं भवति। प्रथमं - भौतिकं विज्ञानम् अथवा प्राकृतिकविज्ञानम्। द्वितीयं - सामाजिकविज्ञानम्।

भौतिकविज्ञानेषु - पदार्थविज्ञानम्, रसायनविज्ञानम् भूगर्भशास्त्रम्, अवकाशविज्ञानम् इत्यादिविज्ञानानां समावेशः भवति। परन्तु सामाजिकविज्ञाने - अर्थशास्त्रम्, मानवशास्त्रम्, राजनीतिशास्त्रम् इत्यादिशास्त्रणाम् अपि समावेशः भवति।

---

**परिचयः**

समाजशास्त्रम् आङ्ग्लभाषायां Sociology इति कथ्यते। Sociology शब्दस्य व्युत्पत्तिः लैटिनभाषायाः Socious शब्दाद् भवति। तथा ग्रीक भाषायाः Logos शब्दाद् भवति-यस्य ज्ञानाय निम्नकोष्टकम् अवलोकनीयम्।




उक्तव्युत्पत्तेः आधारेण वयं कथने समर्थाः भविष्यामः यत् समाजशास्त्रं समाजशास्त्रेण सह सम्बद्धानां सत्यानां वैज्ञानिकम् अध्ययनम् अस्ति। समाजशास्त्रस्य अध्ययनस्य केन्द्रबिन्दुः मानवीयसजीवाः तेषां जीवनं चास्ति। सामाजिकजनानां, सामाजिकसम्बन्धानां तन्त्रस्य ज्ञानाय समाजशास्त्रं प्रयत्नं करोति।

विविधसमाजशास्त्रिणां विविधाः परिभाषाः सन्ति याः निम्नाः सन्ति।

एच. एम. ज्हान्सनाम्नः समाजशास्त्रिमतानुसारेण - समाजशास्त्रम् सामाजिकसमुदायानां, तेषाम् आन्तिरक स्वरूपाणाम् अथवा विविधसंस्थाप्रकाराणां तथा तासां समृद्ध्यर्थं स्थायित्वं परिवर्तनकारिणी प्रक्रिया च तासां आन्तरिकसम्बधानाम् अध्ययनं करोति।

**विद्युतजोषीमहोदयः** समाजशास्त्रस्य अर्थोद्‌घाटनाय लिखति यदू - ''समाजशास्त्रं - मानवीयसामाजिक व्यवहाराणां, वैज्ञानिकम् अध्ययनम् अस्ति। समाजशास्त्रं तेषां जनानां समष्टि-व्यष्टि, आन्तरक्रियाणां प्रक्रियाः सामाजिकसमुदायानां, सङ्घटनानाम्, स्वरूपाणां, पारस्परिकसम्बंधानां, व्यक्तिगतव्यवहारेषु, सामुदायिकव्यवहारणां प्रभावस्य च अध्ययनं करोति।

- **समाजशास्त्रस्योद्‌भवः -**

ग्रीकसमाजशास्त्री प्लेटो (४२७ तः ३४७ ईशापूर्वतः), एरिस्टोरिलः (३८४ तः ३२२ ईशापूर्वतः) प्रारभ्य सेन्टसीमोनः (१७६० तः १८२५ ख्रीष्टाब्देतमे) पर्यन्तं विविधसमाजशास्त्रिभिः समाजशास्त्रविषये स्वकीयः विचारः लिखितः अस्ति। परन्तु सामाजिकविज्ञानस्वरूपे समाजशास्त्रस्योद्‌भवः १९ ख्रीष्टाब्दितमे (उन्विंशतिख्रीष्टाब्देतमे) यूरोपदेशे अभवत्। अष्टाविंशतिख्रीष्टाब्देतमे तथा उन्विंशतिख्रीष्टाब्देतमे पश्चिमयूरोपदेशे उद्‌भूतः शीघ्रसामाजिक परिवर्तनं नवजागृतिः, इंग्लैंण्डदेशे विहित औद्योगिकक्रान्तिः फ्रान्सदेशस्य राजक्रान्तिः आदिपरिबलानि समाजशास्त्रस्य उद्‌भवस्य बीजारोपणम् अकुर्वन्। औद्योगिकक्रान्तिकारणात् नवीन-उद्योगानां स्थापना श्रमजीवीवर्गाणां शोषणसमस्यायाः जन्माभवत्। फ्रान्सदेशे लुईनृपाणाम् अन्याययुक्तशासनव्यवस्थायाः कारणेन समाजे अव्यवस्थाः जाताः। नवीनविषयाणां परिणामस्वरूपेण विभिन्नराष्ट्राणि सन्निकटे समायातानि। अस्यां स्थितौ वैज्ञानिकदृष्टिकोणतः समाजस्य वस्तुलक्षी अध्ययनस्य आवश्यकतायाः प्रादुर्भावः जातः। सर्वप्रथमं फ्रान्सदेशस्य विद्वान्दार्शनिकश्च ओगस्टकोन्तेमहोदयः वैज्ञानिकदृष्टिबिन्दुना समाजं वस्तुलक्षीरूपेण अवगमनार्थं प्रयत्नम् अकरोत्। प्राकृतिकघटनावत् सामाजिकघटनाक्रमाणाम् अपि वैज्ञानिकरूपेण अध्ययनं कर्तुं शक्यते। परिणामतः कोन्तमहोदयस्य 1830 तः 1842 ख्रीष्टाब्दे तमे वर्षमध्ये - षट्‌भागेषुलिखितस्य 'Positive Philosophy' नामकग्रन्थस्य प्रादुर्भावः जातः। अस्मिन् ग्रन्थे समाजस्य वैज्ञानिक-अध्ययनसम्बन्धिविविधसिद्धान्तानां रचना जाता।

ओगस्टकोन्तः आरभ्य समाजशास्त्रे फ्रान्सदेशे ईमाइलादुर्खिमः, इंग्लैंण्डदेशे, ज्हानस्टुअर्टमिलः, जर्मनीदेशे कार्लमार्क्सः च वेवरमहोदयानां अध्ययनेन समाजशास्त्रस्य क्रमेण विकासः अभवत्। आरम्भकाले एभिः महत्समाजशास्त्रिभिः प्रदत्तयोगदानेन, ते समाजशास्त्रिणः गणमान्यसमाजशास्त्रिरूपेण समाजे प्रसिद्धाः अभवन्। तेषां विषये तथा प्रदत्तयोगदानविषये वयं अध्ययनं कुर्मः -

**ओगस्टकोंतः ( १७९८ तः १८५७ यावत् ). -**

ओगस्टकोंतमहोदयेन लिखितयोः 'Positive Philosophy' नामकद्वयोः ग्रन्थयोः समाजस्यव्यवस्था समाजस्य प्रगतिविषयकवैज्ञानकनियमानां संग्रहः अस्ति। कोंतमहोदयस्य मतानुसारेण समाजेन निर्मितनियमेनैव समाजस्य विविधतत्त्वेषु एकतायाः प्रादुर्भवनं सम्भवमस्ति। तथा सा व्यवस्था एव वास्तविकव्यवस्था अस्ति। समाजे स्थिरनियमानामेव अभावः वर्तते तर्हि समाजे अस्थायिभावस्य प्रादुर्भवनं, सामाजिकव्यवस्थायाः विघटनं सामाजिकमूल्यानां स्थिरतापि पतनयुक्ता भविष्यति। अतः समाजस्य प्रगतिः सामाजिकव्यवस्थायाः अभावे नैव सम्भविष्यति। सामाजिकीव्यवस्था, सामाजिकप्रगतयश्च परस्परं आधारिताः। कोंतमहोदयः क्रमशः समाजे, धार्मिकस्वरूपस्य, आधिभौतिकस्वरूपस्य, प्रत्यक्षस्वरूपस्य एवं समाजस्य प्रगतेः वर्णनम् अकरोत्। कोंतमहोदयेन कथितं यद् समाजस्य अध्ययननिरीक्षणेन, तुलनया, प्रायोगिकैतिहासिकपद्धतेः विनियोगेन करणीयम्। समाजे किं भवति ?



**( ओगस्टकोंत )**

तस्याः – तत्तत् घटनायाः कार्यकारणसम्बन्धयोः निरीक्षणम् अवश्यमेव करणीयम्। अनेन प्रकारेण कोंतमहोदयात् एव समाजस्य वैज्ञानिकाध्ययनस्य प्रारम्भः अभवत्।

**इमाइल दुर्खिमः ( १८५८ तः १९१७ यावत् )**



( इमाइल दुर्खिमः )

फ्रान्सदेशस्य समाजशास्त्रस्य मूर्धन्यः समाजशास्त्री इमाइल दुर्खिमः गहनाध्ययेनन ओगस्तकोंतमहोदयेन आरोपितसमाजशास्त्रबीजानां संवर्धनाय गम्भीरप्रयत्नम् अकरोत्। दुर्खिमः स्वीकरोति, यत् समाजशास्त्रम् समाजस्य मात्रपृथक्करणम् एव नास्ति परन्तु तत् तु सामाजिकजीवनस्य एका कला अस्ति। समाजशास्त्रम् तु अगोचरविश्वस्य नहि परन्तु सजीवजनानां समूहस्य अध्ययनकारिशास्त्रम् अस्ति। तस्य उद्देश्यं आसीत् यत् जनानां तथा समुदायस्य परस्परं संबन्धः कः? समुदायस्य प्रभावः जनानामुपरि कथं कीदृशः भवति ? दुर्खिममहोदस्यानुसारेण सामाजिकतथ्यानि सामुदायिकजीवनात् समुद्भवन्ति। उदाहरणरूपेण भारतीयसमाजस्य संदर्भे अस्माकं प्रचलितपरम्परादिःसामाजिक-तथ्यानि सन्ति। पुनश्च दुर्खिममहोदयः कथयति यद् वयं सामाजिकतथ्यानि वस्तुस्वरूपेण पश्यामः, तदा एव समाजस्य अध्ययनं सम्यक् कर्तुं शक्यते। तस्य ग्रन्थे The Rules Of Sociological Method सामाजिकतथ्यानां व्याख्यां कृत्वा दुर्खिमः समाजशास्त्रस्य पद्धतिशास्त्रे महत्त्वं प्रतिपादयति। अन्यच्च आत्महत्या श्रमविभाजनं सामूहिकत्वं धर्मः सामुदायिप्रतिनिधित्वं चेति सिद्धान्तान् दत्त्वा दुर्खिमः समाजशास्त्रस्य विकासे अप्रतिमं महत्त्वपूर्णयोगदानम् अकरोत्।

**हर्वर्ट स्पेन्सरः ( १८०२ तः १९०६ यावत् )**



( हर्बर्ट स्पेन्सरः )

एकोनविंशतिख्रीष्टाब्दे ब्रिटिशसमाजशास्त्री हर्वटस्पेन्सरमहोदयेन अष्टोत्तरशतषड्सप्ततिः ख्रीष्टाब्देतमे 'The Study of Sociology' 'The Principels of Sociology' द्वयोः ग्रन्थयोः समाजस्य विकासाय सामाजिकोत्क्रान्तेः सिद्धान्तः स्वीकृतः अस्ति। स्पेन्सरमहोदयः एवं कथयति यत् – समाजः एकः सजीवमानवीयदेहोऽस्ति। यथा शरीरे विभिन्नानि अङ्गानि सन्ति तेनैव प्रकारेण समाजेऽपि विविधानि अङ्गानि सन्ति। यदि वयं समाजस्य विकासं वाञ्छामः, तर्हि सर्वाणि अङ्गानि मिलित्वा कार्यकरणमावश्यकं वर्तते। अन्यथा समाजस्य विकासः अवरुद्धः भविष्यति। तस्य अस्मिन् सिद्धान्ते स्पष्टं वर्तते यत् सजीवानामिव समाजस्यापि उत्क्रान्तिः भवति।

**कार्लमार्क्सः ( १८१८ तः १८८३ यावत् )**



( कार्लमार्क्सः )

जर्मनीदेशस्य विद्वान् कार्लमार्क्समहोदयः समाजशास्त्रस्य संघर्षवादी समाजवादी च विचारधारायाः प्रणेता स्वीक्रियते। कार्लमार्क्सः एवम् अकथयत् यद् ऐतिहासिकघटनासु आर्थिकपरिस्थितीनां प्रभावः भवति। तस्य मतानुसारेण इतिहासस्य पृथक्-पृथक् स्तरे उत्पादनस्य साधनानाम् आधारेण सामाजिकवर्गाणां रचना भवति – (१) स्वामिवर्गः। (२) श्रमजीवीवर्गः। अनयोः द्वयोः वर्गयोः सततं संघर्षः चलति एव। अस्याः प्रक्रियायाः दूरीकरणाय सः एवम् अकथयत् यत् सर्वःश्रमजीवीवर्गः मिलित्वा वर्गहीनसमाजस्य व्यवस्थां कुर्यात्।

**मेक्सवेवरः ( 1864 तः 1920 यावत् )**



( मेक्सवेवरः )

मानवीयसामाजिकव्यवहारान् ज्ञातुम् अवसानाय च जर्मनीदेशस्य समाजशास्त्री वेवरमहोदयः ख्यातिं प्राप्तवान्। वेवरमहोदयमतानुसारेण समाजशास्त्रस्य मुख्यः अध्ययनविषयः सामाजिकप्रक्रिया अस्ति। तया तस्य निर्धारणम् अतीव युक्तियुक्तमस्ति। इत्थं सः समाजशास्त्रं सामाजिकक्रियायाः अर्थपूर्णज्ञानदायकं शास्त्ररूपेण सिद्धं करोति। समाजशास्त्री वेवरमहोदयेन प्रदत्त-आदर्शपद्धतिः सामाजिकसंशोधने उपयोगिनी भवति। विश्वस्य विभिन्नधर्माणाम् अध्ययनानन्तरं वेवरमहोदयः कथयति यत् प्रोस्टन्टधर्मस्य आचारसंहिता, तस्य पुञ्जीवाद-(श्रेष्ठिवर्ग) सम्बन्धि अध्ययनं तथा दासप्रथादयः इति समाजशास्त्रे अध्ययने महद् योगदानं दत्तम् अस्ति।

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा उत्तरं लिखत ?**

(१) समाजशास्त्रं कस्य विषयस्य अध्ययनं करोति ?

(क) समाजस्य (ख) अर्थस्य (ग) ग्रामस्य (घ) विद्यायाः

(२) समाजशास्त्रं आङ्ग्लभाषायां किं कथ्यते ?

(क) Sociology (ख) Phisycology (ग) biology (घ) mythology

(३) एच. जे. ज्हानस् महोदयस्य मतानुसारेण सामाजिकसमुदायानाम् अध्ययनं किं शास्त्रं करोति ?

(क) अर्थशास्त्रम् (ख) राज्यशास्त्रम् (ग) समाजशास्त्रम् (घ) नीतिशास्त्रम्

(४) १९१३ ख्रीष्टाब्देतमे समाजशास्त्रस्य उद्‌भवः कस्मिन् देशे अभवत् ?

(क) जापानदेशे (ख) इंग्लैंडदेशे (ग) भारतदेशे (घ) यूरोपदेशे

(५) प्लेटो कस्य देशस्य समाजशास्त्री आसीत् ?

(क) ग्रीकदेशस्य (ख) अमेरिका देशस्य (ग) जापानदेशस्य (घ) भारतदेशस्य

(६) ओगस्ट कोंता कस्य देशस्य समाजशास्त्री आसीत् ?

(क) फ्रान्सदेशस्य (ख) इंग्लैंण्डदेशस्य (ग) जर्मनीदेशस्य (घ) चीनदेशस्य

(७) समाजशास्त्रस्य संस्थापकः कः आसीत् ?

(क) मेक्सवेवरः (ख) ओगस्तकोंत (ग) कार्लमार्क्सः (घ) हर्बर्टस्पेन्सरः

**२. एकेन वाक्येन उत्तरं लिखत।**

(१) ओगस्ट कोंतमहोदयेन लिखितग्रन्थस्य नाम किमस्ति ?

(२) ''समाजशास्त्रम्'' शब्दस्य व्युत्पत्तिं लिखत।

(३) जर्मनीदेशस्य समाजशास्त्री कः ?

(४) सामाजिकविज्ञानस्वरूपे समाजशास्त्रस्योद्‌भवः कुत्र कदा अभवत् ?

(५) फ्रान्सदेशस्य समाजशास्त्री कः आसीत् ?

**३. द्वित्रिवाक्यैः उत्तरं लिखत।**

(१) समाजशास्त्रस्य उद्भवस्य बीजारोपणं कैः परिबलैः कुत्र अभवत् ?

(२) इमाइल दुर्खिममहोदयस्य विषये लिखित्वा तेन प्रदत्तसमाजशास्त्रस्य परिभाषां लिखत।

(३) समाजशास्त्रस्य उद्भवविषये संक्षेपेण लिखत।

**४. टिप्पणी लेख्या।**

(१) ओगस्ट कोन्तमहोदयः।

(२) इमाइल दुर्खिमः।

**५. सविस्तरेण उत्तरं लिखत।**

(1) कार्लमार्क्सविषये विलिख्य तस्य सामाजिकप्रदानं प्रतिपादयत।

(4) मेक्सवेवरस्य परिचयं दत्त्वा तस्य समाजशास्त्रपरिभाषां लिखत।

**६. संयोजनं कुरुत।**

| अ | ब |
|---|---|
| (१) ओगस्ट कोंतः | १८०५ दल १९०३ यावत्। |
| (२) इमाइल दुर्खिमः | १८१८ दल १८८३ यावत्। |
| (३) कार्लमार्क्सः | १८८६ दल १९२० यावत्। |
| (४) हर्बर्ट स्पेन्सरः | १८५८ दल १९१७ यावत्। |
| (५) मेक्सवेवरः | १७९८ दल १८५७ यावत्। |

**छात्र-प्रवृत्तिः**

- समाजशास्त्रस्य अन्यसामाजिकविज्ञानेन सह सम्बन्धःविषये विज्ञापनपत्रं सज्जीकुर्वन्तु।
- पाठप्रदत्तानां समाजशास्त्रिणां चित्रं लेखं च लिखत।

**सुभाषितम्**

**''संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।**
**देवा भागं यथापूर्वे संजानाना उपासते।''**

# १५ भारते समाजशास्त्रस्य विकासः

**प्रस्तावना**

सामाजिकविज्ञानेऽनेकविज्ञानानां समावेशः भवति। तेष्वन्यतमं विज्ञानं समाजशास्त्रं वर्तते। अत्रैकस्मिन् विषये स्पष्टता अत्यन्तमावश्यकता वर्तते यत् यदा वयं विज्ञानम् इति शब्दमुच्चारयामः तस्मिन् विज्ञानद्वयम् समाविष्यते (१) भौतिकम् वा प्राकृत्तिकम् विज्ञानम् (२) सामाजिकविज्ञानम्

भौतिकविज्ञानेषु पदार्थविज्ञानं, रसायणविज्ञानम्, भूस्तरविज्ञानं, अवकाशविज्ञानं इत्येषां समावेशः भवति। सामाजिकविज्ञानेषु समाजशास्त्रम्, अर्थशास्त्रम्, मानवशास्त्रम्, राज्यशास्त्रम् इत्यादीनां समावेशः भवति। अत्रैकस्य सामाजिकविज्ञानस्य स्वरूपेण समाजशास्त्रस्यार्थं च तस्य विषयवस्तु संज्ञाय तस्योद्भविकासेन सह समाजशास्त्रस्य शाखाणां परिचयः प्रस्तूयते।

---

समाजशास्त्रस्य केन्द्रबिन्दवः मानवसमाजजीवनं वर्तते। समाजशास्त्रं मानवसम्बन्धितसम्बन्धानां, आचार-व्यवहार ज्ञानार्थं प्रयतमानं शास्त्रं गण्यते। मेकाईवर तथा च चेज नामकाभ्यां समाजशास्त्रनेतृभ्यां समाजशास्त्रस्यार्थः सामाजिकसम्बन्धः वा सामाजिक सम्बन्धस्य गुंफनं कृतः वर्तते। तेनायं समाज इति शब्देन जानीमः।

## समाजशास्त्रस्य व्याख्या

किम्बोल यंग मतानुसारं समाशास्त्रम् अर्थात् ''सामूहिकमानवजीवनवर्तन-अभ्यासः। यंग तथा च मेक मतानुसारं समाजशास्त्रम् अर्थात् मानवजीवनस्य सामाजिकसंघटनानां वैज्ञानिकरीत्याभ्यासः। एच. एम. ज्होनसन मतानुसारं समाजशास्त्रम् अर्थात् सामाजिकयूथानां तथा च तेषाम् आन्तरिकस्वरूपाणाम् अभ्यासः इति भवति। तथा च संस्थायाः विविधप्रकाराणाम् आधारभूतपरिवर्तनकारिणी प्रक्रिया च यूथानां मध्ये सम्बन्धः इति व्याख्या कृताऽस्ति।

## भारतदेशे समाजशास्त्रस्य विकासः

भारतदेशे मुम्बइविश्वविद्यालये अनुस्नातककक्षायां ख्रिष्ताब्द १९७४ मध्ये सर्वप्रथमं समाजशास्त्रस्याध्यापनकार्यस्य प्रारम्भोऽभवत्। ब्रिटनस्थः प्रख्यातः समाजशास्त्रवेत्ता तथा च नगरनियोजनस्याभ्यासी पेट्रिक ग्रीड्स इत्यस्याध्यक्षपदे अस्मिन् विश्वविद्यालयेऽनुस्नातकविभागस्य प्रारम्भोऽभवत्।

ख्रिस्ताब्द १९२४ मध्ये प्रख्यातसमाजशास्त्री डॉ. गोविन्दसदाशिव-धुर्ये अस्य विभागस्याध्यक्षपदं स्वीकृतवान्। ख्रीस्ताब्द १९५२ मध्ये संस्थापिता इन्डियन-सोसियोलोजिकल-सोसायटी इत्यस्य प्रेरणास्रोतभूतः तथा च सोसियोलोजिकल-समाचार-पत्रस्य संपादकः धुर्ये महोदयाः समाजशास्त्रस्य विकासे नूतनपथप्रदर्शकरूपेण स्मर्यते। धुर्ये महोदयस्य - अभ्यासमाध्यमेन तथा च समाजशास्त्रपाठितविद्यार्थिपरम्परामाध्यमेन मुम्बईविश्वविद्यालयः भारतदेशे समाजशास्त्राभ्यासकेन्द्रस्थानं बभूव। ख्रिस्ताब्द १९१७ मध्ये कोलकत्ता-विश्वविद्यालये वृजेन्द्रनाथशीलस्य प्रयत्नेन - अर्थशास्त्रेण सह समाजशास्त्रस्याध्ययनाध्यापनकार्यस्य प्रारम्भोऽभवत्।

लखनौ विश्ववद्यालये राधाकमलमुखर्जीमहोदयेनः तथा च डी. पी. मुखर्जीमहोदयेनः समाजशास्त्रविकासाय महत्त्वपूर्णयोगदानं प्रदत्तमासीत्, पूणेविश्वविद्यालये इरावर्ती कर्वे इत्यनेन समाजशास्त्रविकासाय महत्त्वपूर्णयोगदानं प्रदत्तमासीत्।

भारतदेशे विविधसमाजशास्त्रज्ञानां समाजशास्त्रस्य विकासे महत्त्वपूर्णं प्रदानं वर्तते। यथा एम. एन. श्रीनिवास, एस. सी. देबेय, आर. देसाई, डी. पी. मुखर्जी, डेविड हार्डमिन, योगेन्द्र सिंधु, ए. एम. शाह इत्यादयः तथा च गान्धिजी, बाबासाहेब-आंबेडकरः वैज्ञानिकपद्धत्या ज्ञातुं प्रयासमकुर्वन्। इन्डियन काउन्सिल ओफ सोसियल सायन्स रिसर्च (I.C.S.S.R.) तथा च यु.जी.सी. इत्यनयोरधिकसहयोगेन समाजशास्त्रीय संशोधनक्षेत्रेषु वृद्धिरभवत्।

भारतदेशस्योन्यविश्वविद्यालयवद् गुर्जरराज्यस्य विविधविश्वविद्यालयेषु तथा च गुजरातविद्यापीठे स्नातक-अनुस्तानककक्षायां समाजशास्त्रस्य अध्ययनकार्यं प्रचलति। तदनु-मेडिकल नर्सिंगादि-अभ्यासक्रमे यः समाजशास्त्रविषयः पाठ्यते। सूर्यपुरनगरे (सुरत) आइ. पी. देसाई महोदयेनः संस्थापिता 'सेन्टर फोर सोशियल स्टडिझ' नाम्नी संस्था गुजरातराज्ये सर्जनात्मकसामाजिकसंशोधनं सर्वत्रव्यापकं करोति। अस्याः संस्थायाः नाम्ना प्रचालिते सामयिके गुजरातस्य संशोधकानां संशोधनानि प्रकाशितानि भवन्ति। तेन संशोधनप्रवृत्तिः प्रोत्साहिता भवति।

गुजरातराज्ये समाजशास्त्रस्य विकासे एन. ए. धुमी, आई. पी. देसाई, अक्षयकुमार देसाई, नीश देसाई. तारा भगिनी पटेल, ए. एम्. शाह इत्यादीनाम् उल्लेखनीयं योगदानं वर्तते।

### समाजशास्त्रस्य विषयक्षेत्रम्

अत्र विषयशब्देन सह सम्बद्धः 'क्षेत्र' शब्दः समाजशास्त्रविषयस्य निश्चितसीमां दर्शयति। अस्यां सीमारेखायां येषां विषयाणां समावेशः भवति तदेव समाजशास्त्रस्य विषयवस्तु वर्तते। एवमेव पश्यामः चेत् अन्यसामाजिकविज्ञानवत् समाजशास्त्रस्यापि स्वकीयं विषयक्षेत्रं विषयवस्तु च वर्तते।

मूलतः सामाजिकसम्बन्धानां सामाजिकसंस्थानाम् अभ्यासकारीसमाजशास्त्रे अस्मान् परितः समवस्थितानेकविध विषयाणां समावेशः वर्तते। तेषु समाजस्य सातत्यं रक्ष्यमाणविषयाणां च तेषु परिवर्तनकारींविषयाणां समावेशः वर्तते। समाजशास्त्रस्य विषयवस्तुषु मूलभूतरूपाः सामाजिकसंस्थाः प्रक्रियाः समस्याः इत्येषां समावेशः क्रियते। ''एलेक्ष इकलिस'' नामक-विचारकेण अस्य सविस्तृतं वर्णनं कृतम्।

- **समाजस्य मूलभूतपरिबलानि -**

(१) समाजमानवानामान्तसम्बन्धाः आन्तरक्रिया सामाजिकवर्ग, सामाजकपदानि, सामाजिकभूमिका, व्यवस्थितिः तथा च संस्कृतिः इत्येषामध्ययनम्।

(२) सामाजिकसमूहाश्च तेषां लक्षणानि समूहान्तसम्बन्धाः।

(३) समुदायाः - ग्रामसमुदायः, नगरसमुदायः, आदिवासीसमुदायः।

(४) सामाजिकमण्डलानि संङ्घटनानि च।

(५) समाजस्य समुदायविषयकलाक्षणिकताः।

### मूलभूतसामाजिकसंस्थाः

(१) कुटुम्बं तथा च पाणिग्रहणसम्बन्धाः।

(२) आर्थिकसंस्थाः (क्रयविक्रयादिव्यवहारः - वाणिज्यम्, औद्योगिकसमुदायः, व्यावसायिकसमुदायाः इत्यादयः)।

(३) राजकीयसंस्थाः (सर्वकारः राजकीयप्रश्नाः - विधानसभा-पंञ्चायतनानि इत्यादयः)।

(४) प्रबन्धकीयसंस्था: (बन्धारणम्, बन्धारणव्यवस्था, सामाजिक परिवर्तनम्)।

(५) धार्मिकसंस्था: (धर्मा:, सम्प्रदाया:, साम्प्रदायिकव्याकुलता) च।

(६) ज्ञातिव्यवस्था (ज्ञातीनामुद्भव:, विकास:, लाक्षणिकता च)।

(७) शिक्षणसंस्था: (शैक्षणिकसंस्थाश्च सामाजिकपरिवर्तनस्य साधनरूपेण शिक्षणस्य महत्त्वम्)।

**मूलभूतरूपा सामाजिकप्रक्रिया:**

(१) सहकार:, स्पर्धा:, संघर्ष:, अनुकूलनं तथा च आत्मसात्करणवत्य: प्रक्रिया:।

(२) समाजसभ्येभ्य: समाजमान्यवर्तनानि तथा च कक्षाशिक्ष्यमाणा सामाजिकीकरणप्रक्रिया।

(३) सामाजिकविचलनं तथा च सामाजिकनियन्त्रणस्य प्रक्रिया।

**समाजशास्त्रस्यान्यसामाजिकविज्ञानै: सहसम्बन्ध:**

(१) समाजशास्त्रं तथा च मानवशास्त्रम्।

मानवशास्त्रं मानवस्य वैज्ञानिकपद्धत्या अभ्यासं करोति तथा च समाजशास्त्रमपि समाजस्य वैज्ञानिकपद्धत्या - अध्ययनं करोति। तथा च मानवशास्त्रं मानवस्य प्रारम्भत: साम्प्रतजीवनपर्यन्तं शारीरिकं सांस्कृतिकं तथा च पुरातत्त्वीय-अङ्गानां सम्यक् अध्ययनं करोति। अत: मानवशास्त्रस्य त्रय: प्रकारा: स्वीक्रियन्तेऽस्माभि:। (१) शारीरिकमानवशास्त्रम् (२) सांस्कृतिकमानवशास्त्रम् च (३) पुरातत्त्वीयमानवशास्त्रम्।

शारीरिकमानवशास्त्रं मानवशरीरस्य रचनाया: तथा च शरीरस्य पृथक् पृथक् लक्षणानाम् अभ्यासं करोति। मानवस्य विवधज्ञातीनां भिन्नताया: परिशीलनं करोति। सांस्कृतिकमानवशास्त्रम् आदिमानवानां रूढीनां जीवनपद्धतीनां तथा तस्य सामाजिकसंस्थादीनामध्ययनं करोति। मानवशास्त्रं समाजशास्त्रस्याध्ययनात् पूर्वं सज्जमिति कथ्यते। मानवशास्त्रं तथा च समाजशास्त्रमुभयोमध्ये लेशमात्रमेव भिन्नत्वं दृश्यते। उभयो पद्धति: दृष्टि: च भिन्ना वर्तते तथापि विज्ञानद्वयं पारस्परिकरीत्यावलम्बनं स्वीकरोति। मानवशास्त्रं लक्षणानां तथा संस्कृतेरध्ययनं सम्यक् करोति। समाजशास्त्रस्य अध्ययनकेन्द्रस्थाने मानवसमाज: तथा च मानवसम्बन्ध: वर्तते। मानवसमाजसम्बन्धयोर्ज्ञाने संस्कृते: ज्ञानमत्यावश्यकं वर्तते। मानवशास्त्रस्याभ्यासं विना समाजशास्त्रस्याभ्यासोऽपूर्ण: कथ्यते।

(२) समाजशास्त्रं तथा च मनोविज्ञानम्

मनोविज्ञानं मानववर्तनस्याध्ययनं करोति। तथा च सामाजिकमनोविज्ञानं समाजे समूहे च प्रवर्तमानजनस्य वर्तनानाम् वा मानवानां सामुदायिकजीवनस्य तेषां मूल्यानां ध्येयानां च सन्दर्भेऽध्ययनं करोति। समाजशास्त्रं समाजस्याध्ययनं करोति। तेषां पृथक्-पृथक् समूहानां रचना तथा च कार्याणि समीक्षते। पृथक्- पृथक् समूहानां मध्ये पारस्परिक सम्बन्धानां तथा च समाजान्तर्गतपरिवर्तनादिकानामध्ययनं करोति। मनोविज्ञानं मानवव्यक्तित्वस्याध्ययनं करोति तथा समाजशास्त्रं समाजस्य वा समुदायस्याध्ययनं करोति। उभर्योमध्ये परस्परावलम्बनं भिन्नत्वं च दृश्यते। मनोविज्ञानं मानवस्य सङ्घटितवर्तनं तस्य शारीरिकमानसिक व्यक्तिगतानुभवानां संयुक्तानुभूतिमाध्यमेन घटितवर्तनानामध्ययनं करोति। व्यक्ति:, समाज:, समुदाय: च पारस्परिकरीत्यावलम्बनं कुर्वन्ति। तानि घटकानि सम्मिलितानि सन्ति। अतस्तेषामध्ययने क्रियमाणे सति मनोविज्ञानं तथा च समाजशास्त्रं परस्परं सम्बन्धं धारयत:।

एते विज्ञाने परस्परं विज्ञप्तीनाम् आदानं प्रदानं च कुरुत:। प्रदानं कुरुत:। समाजशास्त्रं मानवस्य अभ्यासे

मनोविज्ञानस्य सकाशात् ज्ञानमाप्नोति। तथा मनोविज्ञानं मानववर्तनं ज्ञातुं समुदायमाधारीकृत्य कार्यं करोति। अतः मनोविज्ञानं समुदायानुरूपं मार्गदर्शनं समाजशास्त्रसकाशादाप्नोति। समाजशास्त्रं तथा मनोविज्ञानं समाजलक्षिमनोविज्ञानक्षेत्रे – आत्यन्तिकरूपेण परस्परं संमिलिते स्तः।

(३) समाजशास्त्रं तथा च अर्थशास्त्रम्

मानवस्यार्थिकसम्बन्धानामध्ययनम् – अर्थशास्त्रस्य मुख्यविषयः वर्तते। वस्तूनामुत्पत्तिः तस्य वितरणं, वितरणस्य विवधप्रकाराः, तेषां मध्ये समागतानि परिवर्तनानि वस्तूनाम् आवश्यकता च समुपस्थितिः (पुरवठो) मूल्यं राष्ट्रिय-आयः आर्थिकसंङ्घटनानामुद्भवः विकासश्च तेषां लाभालाभः इत्यादीनां विषयाना अर्थशास्त्रे अभ्यासः क्रियते।

समाजशास्त्रस्याभ्यासकेन्द्रस्थाने सामाजिकसम्बन्धाः वर्तन्ते। समाजे जायमानानां संघटनानां समाजशास्त्रीयरीत्या परीक्षणं समाजशास्त्रस्य लक्ष्यं वर्तते। समाजशास्त्रार्थशास्त्रयोः विषयक्षेत्रे – अभिगमश्च पृथक्-पृथक् वर्तते तथाऽपि परस्परं संमिलिते स्तः। मानवः यस्मिन् समाजे वसति तस्मिन्नेव समाजे तस्यार्थिकी क्रिया समुद्भवति विकसति च। अतः कथ्यते यत् समाज-आर्थिक क्रियाभिः तथा – आर्थिकीक्रिया समाजैः प्रभाविता भवति।

कार्याभावः, द्रारिद्र्यं वस्तिवृद्धिः च एतासां समस्यानाम् अभ्यासं विज्ञानद्वयं करोति तथापि द्वयोः दृष्टिबिन्दुः पृथक् पृथक् वर्तते। यथा अर्थशास्त्रं कार्याभावस्य सामाजिकानामङ्गानामभ्यासं प्रति स्वकीयं लक्ष्यं साध्नोति। अपि तु मानवस्यार्थिकजीवनस्याध्ययने तस्य सामाजिकप्रवृत्तेः ज्ञानमावश्यकं वर्तते। सामाजिकप्रवृत्तीनां ज्ञानार्थम् आर्थिकप्रवृत्तीनां ज्ञानमावश्यकं वर्तते। अतः विज्ञाने परस्परं सहायके स्तः।

(४) समाजशास्त्रं तथा च राज्यशास्त्रम्

राज्यशास्त्रं सत्तायाः सर्जनम् उपयोगं विकिरणञ्च तेषामध्ययनं करोति। सत्तायाः सर्जनम् – क्रियान्वयं तेन सह सम्बद्धजनानां वर्तनं तथा च संस्था राज्यशास्त्रस्याभ्यासविषयः वर्तते। साम्प्रतं समाजशास्त्रे राजकीयसमाजशास्त्रस्य उद्भवः जातः। अतः राजकीयसमाजशास्त्रिणः तथा च राज्यशास्त्रिणः मतदानेवर्तनं, राजकीयवर्तनं, राजकीय पक्षरचनातन्त्राणि राजकीयव्यवस्थामाध्यमेन संप्राप्यमाणा गतिशीलता, सामाजिकराजकीय-आन्दोलनानि, एकस्वामत्वम् (अमलदारशाही) इत्येषां विषयाणामुपरि अध्ययनरताः जाताः। राज्यशास्त्रं स्वीयसिद्धान्तार्थं समाजशास्त्रम्-आधारीकृत्य कार्यं करोति। यथा मेक्स बेगर, इत्यस्य भृत्यत्वं (नोकरशाही) विचारस्य उपयोगः आधुनिकराज्यव्यवस्थायां तथा संपत्तिवाद (मूडीवाद) इत्यनयोः सविशेषज्ञानार्थं क्रियते। तथा ज्ञातिः एवञ्च धर्मस्य प्रवर्तमान राजनीतेः महत्त्वं स्पष्टं कर्तुं समाजशास्त्रीयोऽभिगमः अनिवार्यतया भवितव्यः।

## समाजशास्त्रस्य शाखा

समाजशास्त्रस्य कार्यक्षेत्रं व्यापकं वर्तते। अतः समाजशास्त्रस्य नैका शाखाः विकसिताः जाताः। प्रत्येकं शाखा समाजशास्त्रीयाभिगमेन समाजस्य ग्रामीणसमाजशास्त्रम्, नगरसमाजशास्त्रम्, कुटुम्बसमाजशास्त्रम्, शिक्षणसमाजशास्त्रम्, प्रादेशिकसमाजशास्त्रम्, औद्योगिकसमाजशास्त्रम्, ज्ञानसमाजशास्त्रम्, आरोग्यसमाजशास्त्रम्, सामाजिकमानवशास्त्रम्, समाजलक्षीमनोविज्ञानम्, धर्मसमाजशास्त्रम्, स्त्रीसमाजशास्त्रम्, साहित्यसमाजशास्त्रम्, विकाससमाजशास्त्रम्, युवसमाजशास्त्रम्, संवैधानिकसमाजशास्त्रम् इत्यादीनां समाजशास्त्राणां समावेशः भवति।

भारतदेशे समाजशास्त्रस्य विकासे आसां सर्वासां शाखानां योगदानं वर्तते।

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) समाजशास्त्रस्य स्थापकः कः ?

(क) मेक्सवेवरः (ख) कार्लमार्क्सः (ग) ओगस्ट क्रोंत (घ) हर्बर्ट स्पेन्सरः

(२) इण्डियन सोशियोलोजिकल सोसायटी प्रेरकः कः आसीत्।

(क) जी. एस. धूर्ये (ख) ए. एम. शाहः

(ग) आई. पी. देसाई (घ) एम्. एन. श्रीनिवासः

(३) सामूहिकमानवजीवनवर्तन-अभ्यासः एषा व्याख्या केन प्रदत्ता ?

(क) यंग तथा मेकेन (ख) जी. एस. धूर्येण (ग) एच. एम. ज्हेनसनेन (घ) किम्बोलः

(४) भारतदेशे समाजशास्त्रस्याध्यापनकार्यस्य प्रारम्भः कदा अभवत् ?

(क) ख्रिस्ताब्द १९७४ (ख) ख्रिस्ताब्द १९७१ (ग) ख्रिस्ताब्द १९७८ (घ) ख्रिस्ताब्द १९७९

(५) सूर्यपुरनगरे प्रचलित 'सेन्टर फोर सोशियल स्टडिझ' नाम्नी संस्था केन स्थापिता अस्ति ?

(क) डेविड हार्डमिनेन (ख) योगेन्द्र सिंघेन

(ग) ए. एम्. शाहेन (घ) आई. पी. देसाईमहोदया

**२. एकेन वाक्येन उत्तरं लिखत।**

(१) भारतदेशे सर्वप्रथमं कस्मिन् विश्वविद्यालये समाजशास्त्रविषयः प्रारब्धः।

(२) गुजरातराज्ये समाजशास्त्रविकासे कैः योगदानं प्रदत्तं तेषां नामानि लिखत।

(३) येक विश्वविद्यालये केषां प्रयत्नेन समाजशास्त्रस्याध्ययनं प्रारब्धम् ?

**३. द्वित्रैवाक्यैः उत्तरं लिखत।**

(१) "समाजशास्त्र" शब्दस्य व्याखयां कुरुत।

(२) समाजशास्त्रस्य विविधशाखाः प्रदर्शयत।

(३) भारतदेशे समाजशास्त्रविकासे यैः योगदानं प्रदत्तं तेषां समाजशास्त्रिणां नामानि।

**४. टिप्पणी लेख्या।**

(१) भारतदेशे समाजशास्त्रस्य विकासः।

(२) समाजशास्त्रं तथा मनोविज्ञानम्।

(३) समाजशास्त्रं तथा अर्थशास्त्रम्।

**५. सविस्तरेण उत्तरं लिखत।**

(१) समाजशास्त्रस्य विषयवस्तु ज्ञापयत।

(२) समाजशास्त्रस्योद्‌भवं स्पष्टयत।

**छात्रप्रवृत्तिः**

- समाजशास्त्रस्य उद्भवविकासे योगदानं दत्तवन्तः तेषां समाजशास्त्रिणां चित्रसंग्रहं कुरुत।
- समाजशास्त्रस्य अन्यसामाजिकविज्ञानेन सह सम्बन्धदर्शकं चित्रं चित्रयतु।
- समाजशास्त्रिणां परिचयपत्राणि कुरुत।
- समाजशास्त्रपरिचयार्थं समाजसंस्थायाः मेलनम् एवं संवादपरिषदायोजनं कुरुत।

**सुभाषितम्**

**सुखस्य दुःखस्य न कोऽपि दाता**
**परो ददातीति कुबुद्धिरेषा।**
**अहं करोमीति वृथाभमानं**
**स्वकर्मसूत्रे ग्रथितो हि लोकः॥**

●

# १६ भारतीयसञ्चारव्यवस्था

**प्रस्तावना**

मनुष्यस्तादृक्कश्चित् जीवविशेषोऽस्ति यः निजविचारान् अभिव्यनक्ति मनोभावाँश्च अन्यमनुष्यान् प्रति प्रेषयितुम् इच्छति, अर्हति च। एषा एव प्रक्रिया ''सञ्चारः'' वा सम्प्रेषणम् इत्यभिधां लभते। न केवलं मनुष्याः अपि तु पशुपक्षिणोऽपि स्वभावनाः, विचारान् च विविधचेष्टाभिः, स्पर्शेण, विशिष्टध्वनभिर्वा परस्परं प्रकटयन्त्येव, एषा प्रक्रियापि सञ्चारस्यैव प्रकारोऽस्ति।

---

**सञ्चारस्यार्थः**

सञ्चाराय आङ्ग्लभाषायां शब्दोऽस्ति "Communication" इति। सः लेटिन् भाषायाः "Communicare" इत्यस्मात् शब्दात् समायातः। यस्यार्थोऽस्ति प्रेषणम्, आदानम्, प्रदानम्, वितरणम् इत्यादि। अत्र प्रायः सङ्केतानां, वर्णानां चेष्टानां च माध्यमेन एकः जनः अपरान् जनान् समूहान् वा स्वविचारान् संसूचयति। अथ वयं वक्तुं शक्नुमः यत्, सञ्चारः नाम - द्विध्रुवीप्रक्रिया, यया विचाराणाम् आदान-प्रदानं भवति। प्रापकः, प्रेषकश्चेति द्वौ पक्षौ यत्र आवश्यकौ स्तः। चेष्टा, ध्वनिः, वर्णः, सङ्केतः, चिह्नम्, चित्रं वा यत्र माध्यमानि भवन्ति। अभिव्यक्तिः यस्य माध्यमेन सुचारुतया भवति तद्।

**सञ्चाराङ्गानि**

यदि वयं समष्टिदृष्ट्या पश्यामः (चिन्तयामः) चेत् ज्ञानेन्द्रियैः कर्मेन्द्रियैर्वा सञ्चारः सम्भवति। शेनीन्-विवर महोदयाभ्यां सञ्चारप्रक्रियामभिबोद्धुं निर्मितं न्यादर्शं वयं पश्यामः।

| प्रेषकः → | सञ्चारस्रोतः → | प्रापकः |
|---|---|---|
| (Sender) | (Source) | (Recevier) |

सञ्चारप्रक्रियायाः अङ्गत्रयं भवितुमर्हति। (१) प्रेषकः (२) सञ्चारस्रोतः (३) प्रापकः च।

**प्रेषकः**

सः प्रेषकः स्यात् यः निजविचारान्, भावनाः सूचनाः परपक्षं प्रति प्रदातुमभिलषति। सम्प्रेषकः निजमनसि उद्भूतभावान् अभिव्यञ्जनाय किञ्चित् माध्यमं विना प्रेषयितुं नार्हति।

**सञ्चारस्रोतांसिः**

एतस्मिन् सञ्चाराङ्गे वर्णाः, ध्वनिः, चिह्नानि, अङ्काः, सङ्केताः, ज्ञानेन्द्रियाणि, कर्मेन्द्रियाणि च समावेष्टुं शक्यन्ते। एतैर्विना तु सञ्चारस्य कल्पनैव न शक्यते।

**प्रापकः**

सञ्चारस्य तृतीयाङ्गमिदं ''प्रापकः'' इत्याख्यं प्रेषकस्य सन्देशं सूचनाः वा अवगच्छति, पुनश्च तं प्रतिपुष्टिं प्रतिचारं वा दत्ते। सः शब्दैः, चेष्टाभिः कदाचित्तु मौनेनापि प्रकटयितुं शक्यते।

**सञ्चारप्रकाराः**

सञ्चारं सम्प्रेषणं वा वयं द्विधा विभक्तुं शक्नुमस्तद्यथा - (१) शाब्दिकसञ्चारः (Verbal Communication) (२) अशाब्दिकसञ्चारः (Non-Verbal Communication)

शाब्दिकसञ्चारः

अस्मिन् सञ्चारे सूचनानां सन्देशस्य वा स्वरूपं प्रायः वर्णेषु, ध्वनिषु च भवति। पत्रम्, तारः, पाठ्यपुस्तकानि, शिलालेखाः दूरभाषः, दूरदर्शनम्, दैनिकपत्रम्, विशिष्टकूटभाषा (Coding languages) च इत्यादीनि सञ्चारसाधनानि सन्ति। शीघ्रं स्पष्टञ्च सम्प्रेषणम् अनेन शाब्दिकेन प्रकारेण भवति।

**अशाब्दिकसञ्चारः**

अस्मिन् सञ्चारे सन्देशः सूचना वा चेष्टाभिः,चित्रैः, नेत्रसङ्केतैः, मुखदशाभिश्च भवति। अत्र संवेगानाम्, स्वभावानानाम्, मनःस्थितीनां च ज्ञानं भवति। एतदतिरिच्य अशाब्दिकसञ्चारः प्रत्येकं सञ्चारप्रक्रियायाम् अवश्यम्भावी भवति। यथा प्रत्यक्षवार्तालापावसरे कस्यचित् जनस्य आगमनं, तस्य मुखमुद्राः, शारीरिकभावाः, स्पर्शः, समयः, पर्यावरणम् (परिसरः) इत्यादयः अन्यजनेभ्यः (जनाय वा) केचन सूचनाविशेषाः संगच्छन्ति। हास्यं, रोदनं, स्मितम् आदयो भावाः अपि अशाब्दिकसञ्चारस्य उदाहरणानि सन्ति। अस्य सञ्चारस्याभिबोधाय शिक्षणस्य आवश्यकता न भवति। अथ कानिचन प्रमुखानि सञ्चारसाधनानि सन्ति, यानि अस्माकं दैनंदिनजीवनस्य अभिन्नान्यङ्गानि सञ्जातानि तेषामभ्यासं कुर्मः पाठेऽस्मिन्।

**दैनिकपत्रम् (Newspaper)**

भारते प्रथमं दैनिकपत्रं १७८० तमे वर्षे ब्रिटिशशासनकाले - "Hicky's Bengal Gazzete" प्रारब्धम्। अस्य सम्पादकः James Augustus Hicky नाम्ना महाशयः आसीत्।

दैनिकपत्रे जनाः विश्वस्य समाजस्य, राष्ट्रस्य च प्रत्येकं तथ्यानि, सूचनाः, घटनाः च स्वगृहे उपविश्य एव प्राप्तुमर्हन्ति। दैनिकपत्रैः भाषाकीयं ज्ञानं समृद्धं भवति। दैनिकपत्राणां निम्नशुल्कत्वात् सर्वसुलभानि इमानि सञ्चारसाधनानि सन्ति।

**दूरदर्शनम् (Television)**

इदं दूरदर्शनं दृश्यश्रव्यमाध्यमत्वात् शाब्दिकसम्प्रेषणे समावेष्टुं शक्नुमः। अनेन दूरदर्शनेन दूरस्थितव्यक्तीनां परिचयं, मनोरञ्जनं, शैक्षणिकहेतून्, देश-विदेशवृत्तं च गृहे स्थित्वैव प्राप्नुमः। १९२० तमे दशके अमेरिका-ब्रिटेनदेशयोः दूरदर्शनं प्रायोगिकावस्थायामासीत्। १९६० तमे वर्षे विश्वस्य विकसितराष्ट्रेषु इदं दूरदर्शनं जनसञ्चारस्य प्रमुखं माध्यममभूत्। इदं यन्त्रं प्राविधिकज्ञानेन (Technology) निर्मितं भवति। भारते दूरदर्शनयन्त्रेण शिक्षाभिवृत्तीः वर्धयितुं (BiSag) इत्याख्यः कार्यक्रमः प्रसार्यते। यस्मिन् प्रत्येकं शिक्षणस्तरसम्बद्धानां विषयाणामध्यापनं विवरणञ्च समयसारण्यनुसारं प्रदीयते। दूरदर्शनेन क्रीडा-राजनैतिकसभा-वृत्त-घटनादीनां प्रत्यक्षविवरणम् (Live telicast) भवति।

**पत्रम् (Letter)**

सञ्चारमाध्यमस्य यद्यपीदं प्राचीनं परम् अल्पशुल्कम् उपागमम् अस्ति। कार्यालयीयकार्याणि प्रायः अनेन भवन्ति। लिखितस्वरूपत्त्वात् एतत् प्रत्यक्षसाक्ष्यं भवति। पत्र-पत्रिकाणां माध्यमेन विवाह-अवसान (मरण) आदिषु अभीष्टान् जनान् आमन्त्रयितुं शक्नुमः। अद्य दूरभाषकम्प्यूत्तरप्राचुर्ययुगे पत्रव्यवहारः प्रायः लुप्ततां गतः, परं विजाणुकसञ्चारसाधनानामागमनात्पूर्वं पत्राणामावश्यकता अवर्तत।

**दूरभाषः ( जङ्गमदूरवाणी )**

दूरभाषः (जङ्गमदूरवाणी) अनेन शब्देन कदाचिदेव कश्चन अनभिज्ञः जनः स्यात्। शिक्षितानां निरक्षराणाञ्च जनानामपि पार्श्वे अयं दूरभाषः सुलभः एव। दूरसञ्चारस्येदं महत्त्वपूर्णमङ्गमस्ति कारणं, यत्र कुत्रापि स्थितः, यस्यां कस्यामप्यवस्थायां विद्युत्तारादीनां प्रपञ्चं विना स्ववृत्तं, स्वभावान् अन्येभ्यः जनेभ्यः प्रेषयितुं ज्ञापयितुं वा शक्नोति। जङ्गमदूरवाण्यां (दूरभाषे) चलच्चित्राणि, सङ्गीतम्, विविधबहूपयोगिन्यः सञ्चिकाः, सम्पर्कसूत्राणि च संरक्षितुं पारयामः। अनेन दूरभाषेण तु ''समग्रं विश्वं मुष्टौ सन्निधत्स्व'' (कर लो दुनिया मट्ठी में) इत्येतद् सूत्रं सार्थकीक्रियते।

### कम्प्यूत्तरम् ( सङ्गणकम् )

साम्प्रतं स्थानीय-आपणेषु, गृहेषु, कार्यालयेषु, संस्थानेषु यन्त्रागारेषु, वित्तकोषेषु चेत्यादिषु निखिलजनस्थानेषु लब्धस्थानानि कम्प्यूत्तराणि सन्ति। लोके श्रूयते। ''कम्पनेन विद्युत्कम्पनेन उत्तरं ददाति तत् कम्प्यूत्तरम्।'' इति। कम्प्यूत्तरं, दूरदर्शनं, जङ्गमवाणी इत्येतानि विद्युदणुकयन्त्राणि अवकाशप्रक्षेपकयानैः (Satellites) प्रेरितानि भवन्ति। कम्प्यूत्तरं ० - १ इत्यनयोरेव अङ्कयोर्ज्ञानम् आदत्ते। उपग्रहाणां (Satellites) विकासे भारतदेशस्य अपि महत्त्वपूर्णानि योगदानानि सन्ति। 'आर्यभट्टः' १९७५ तमे १९८० तमे वर्षे ''रोहिणी'' इति नामकौ उपग्रहौ प्रक्षिप्तौ। १९८१ तमे वर्षे जूनमासस्य १८ दिनाङ्के ''एरियन् पैसेञ्जर पे लोड् एक्स्पेरीमेण्ट'' (APPLE) इत्ययम् उपग्रहः प्रक्षिप्तः। भास्करः, चैलिञ्जर्, इन्सेट् १-B इत्येतैः उपग्रहेः सञ्चारः, दूरदर्शनं, जङ्गमवाणी, आकाशवाणी (Radio) च अत्यधिकाः प्रभाविताः सञ्जाताः। उपग्रहैः विद्युदणूनां प्रसारणं (प्रक्षेपणं) भवति, ते (विद्युदणवः) तरङ्गग्राहकैः फाइबर्तन्तुभिः वा ताम्रतन्तुभिः तत्तत् तन्त्रेषु प्रकाशस्वरूपे ध्वनिस्वरूपे च परिवर्त्य घटना-सूचना-चित्र-ध्वनीनां दर्शनं श्रवणं च कारयन्ति। कम्प्यूत्तरयुगोऽद्य सर्वत्र प्रसृतः। एतेन कार्यालयेषु संसूचनानां सङ्ग्रहस्य पत्रव्ययः, समयव्ययश्च समवरुद्धः। अर्थात् कर्गदादीनामुत्पादने वृक्षाणामेव कर्तनं भवति स्म, पर्यावरणस्य महती हानिश्च तेन सम्भवति स्म। वाणिज्ये विपणिगतकम्प्यूत्तरैः ग्राहकद्रव्यसम्बद्धाः दत्तांशाः (Data) सङ्गृह्यन्ते। विकसितकम्प्यूत्तरस्य प्रणेता ''चार्ल्स बेबेज्'' महोदयः आसीत्। भारते सुपरकम्प्यूत्तरं (PARAM) C-DAC इत्याख्यं १९९१ तमे वर्षे भारतस्य प्रौद्योगिकसंस्थानेन निर्मितम्। कम्प्यूत्तरं शैक्षिकहेतुसिद्ध्यर्थं महदुपकुरुते, यथा शैक्षिकप्रवृत्तीनाम्, पाठ्यक्रमाणाम्, छात्राणाम् परिणामवलीनाम् छात्रसम्बद्धदत्तांशानाम् (जन्मतथिः, पञ्जीकरणक्रमः, प्रवेशतिथिः) इत्यादीनां च सङ्ग्रहं नैकवर्षाणि यावदस्मिन् कम्प्यूत्तरे कर्तुं पारयामः।

### ई-मेइल् ( विजाणुवाक् )

ई-मेइल् कश्चन विद्युदणु-आधारितः पत्रव्यवहारोपागमः भवति। अनेन पत्र-पत्रिकाणामावश्यकता एव समाप्ता। ई-मेइल् माध्यमेन पत्राणि, घटनावृत्तानि, चित्राणि, सञ्चिकाः, दत्तांशाः, चलच्चित्राणि अपरेभ्यः विजाणुवाक् (ई-मेइल्) उपभोक्तृभ्यः प्रेष्यन्ते। ई-मेइल् उपयोगार्थं विजाणुवाक्सङ्केताङ्कः (Email-id) आवश्यकः भवति। पत्रादीनां टङ्कितसञ्चारमाध्यमानामपेक्षया शीघ्रतमः अल्पव्ययी चायमुपागमः। अद्यत्वे कार्यालयाः संस्थानानि स्वपत्रव्यवहारेषु ''ई-मेइल्'' इदमेव उपयुञ्जते।

### उपसंहारः

भारते मानवसंसाधनविकासमन्त्रालयः सञ्चारव्यवस्थायै उत्तरदायित्वं निर्वहति। सञ्चारमाध्यमैः विशेषतः विजाणुकसञ्चारसाधनैः मनुष्यः विश्वसमाजस्य सदस्यः एव सञ्जातः। एतैः सञ्चारमाध्यमैः अल्पे एव काले सर्वे जनाः वृत्तैः घटनाभिश्च अभिज्ञाः भवन्ति।

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) ''सञ्चारः'' इत्यस्य आङ्ग्लः शब्दः कः ?

(क) Community (ख) Common (ग) Communication (घ) Conversation

(२) सञ्चारन्यादर्शः काभ्यां रचितः ?

(क) कोहलर्-वीवराभ्याम् (ख) वर्धीमर-रोरशा महोदयाभ्याम्

(ग) स्किनर्-पावलव् महोदयाभ्याम् (घ) शेनोन् वीवरमहोदयाभ्याम्

(३) सञ्चारे प्रेषक: क: भवति ?

(क) संसूचनप्रदाता (ख) संसूचनप्राप्ता (ग) संसूचनस्रोत: (घ) एतेषु किमपि न

(४) एतेषु केन कर्गजादीनां व्यय: निवार्यते ?

(क) पत्राचारेण (ख) दैनिकपत्रै: (ग) कम्प्यूत्तरेण (घ) पुस्तिकाभि:

(५) दूरदर्शनं विकसितराष्ट्रेषु जनसञ्चारस्य प्रमुखमाध्यमं कदाभूत् ?

(क) १९२० तमे वर्षे (ख) १९०५ तमे वर्षे (ग) १९६० तमे वर्षे (घ) १९९१ तमे वर्षे

(६) शाब्दिकसञ्चारेषु एतत् समावेष्टुं न शक्यते ?

(क) नेत्रसङ्केता: (ख) पक्षिरव: (ग) तार: (घ) चलचित्रम्

(७) 'ई-मेइल्' इत्यस्य कृते इदं वाक्यमशुद्धमस्ति -

(क) विद्युत-आधारितं पत्रम् (ख) एतस्योपयोगाय कूटसङ्ख्या आवश्यकी

(ग) पत्रादीनामपेक्षया मन्द: उपागम: (घ) प्राय: विद्युदभावे कष्टदं भवति

(८) ''आर्यभट्ट:'' अवकाशे कदा प्रक्षिप्त: ?

(क) १९७७ (ख) १९७५ (ग) १९८० (घ) १९८१

(९) उपग्रहाणां प्रभाव: एतेषु न भवति ?

(क) आकाशवाण्याम् (ख) आन्तर्जाले (ग) पत्राचारे (घ) कम्प्यूत्तरे

**२. एकेन वाक्येन उत्तरं लखत।**

(१) ''APPLE'' इत्यस्य पूर्णं नाम किम् ?

(२) ''दूरभाष:'' (जङ्गमदूरवाणी) इत्यस्यैकं शैक्षिकमुपयोगं लिखत।

(३) भारते दूरदर्शने क: शैक्षिक: कार्यक्रम: प्रसार्यते ?

(४) सञ्चारस्य कानि त्रीणि अङ्गानि भवन्ति ?

(५) दैनिकपत्राणां सञ्चारमाध्यमत्वेन एकाम् उपयोगितां लिखत।

(६) अशाब्दिकसञ्चारस्य त्रिचतुराणि उदाहरणानि लिखत।

(७) 'ई-मेइल्' इत्यस्य लाभद्वयं लिखत।

**३. द्वि-त्रिवाक्यै: उत्तरं लिखत।**

(१) सञ्चारस्यार्थं स्पष्टीकुरुत।

(२) दशशाब्दिकसञ्चारसाधनानां नामानि लिखत।

(३) कम्प्यूत्तरस्योपयोग: कुत्र-कुत्र भवति ?

(४) दैनिकपत्राणां लाभत्रयं लिखत।

**४. टिप्पणी लेख्या।**

(१) दूरदर्शनं, तस्य उपयोगिता च।

(२) कम्प्यूत्तरं, तस्य उपयोगिता च।

**५. सविस्तरम् उत्तरं लिखत।**

(१) सञ्चारसाधनानां शैक्षिकोपयोगाः लेख्या।

- **विशिष्टशब्दावली ।**

प्रविधिः – Technology

प्रत्यक्षविवरणम् – Live telicast

सम्पर्कसूत्राणि – Contacts

विद्युदणुकयन्त्राणि – Electronics

तरङ्ग्राहकः – Antenna

न्यादर्शः – Module

**छात्रप्रवृत्तिः**

- प्रार्थनासभायां वर्तमानपत्रं पठितव्यम्।
- कम्प्यूतरे शैक्षणिकः प्रयोगः कर्तव्यः।

**सुभाषितम्**

पुराणमित्येव न साधु सर्वं व चापि काव्यं नवमित्यवद्यम्।

सन्तः परीक्ष्यान्यतरद् भजन्ते गूढः परप्रत्ययनेय बुद्धिः॥

# १७ भारते कृषिव्यवस्थापनम्

**प्रस्तावना**

''कृषितो नास्ति दुर्भिक्ष्यम्'' अतः कृषिः मानवजीवने एकम् अभिन्नमङ्गं कल्प्यते। कृषिरेव अधिकांश-जनानाम् आजीविकां कल्पयति। भारतं कृषिप्रधानः देशः। राष्ट्रस्य ग्राम्यजनेषु प्रायः ६२ % जनाः कृषि-आश्रिताः सन्ति। समस्तजीवानाम् ऐहलौकिकं हितं कृषौ निहितमस्ति। 'कृषिः' इत्युक्ते न केवलं हलाकर्षणम् बीजवपनं शस्यवपनम् इत्यादिरेव, प्रत्युत पशुपालनम्, दुग्धशाला, मधु,-कौशेय-ऊर्णादीनामुत्पादनमपि कृषितन्त्रे एव समाविष्टमस्ति।

भारते पाषाणयुगे कृषिविकासः कियान् कथञ्च अभवत् ? इति न ज्ञायते, परं सिन्धुनद्याः तटे तत्कालीनाः कृषि-अवशेषाः प्राप्ताः सन्ति। भारते १९६० तमवर्षात् पूर्वं पारम्परिकबीजैः, जैविक-उर्वरकैः च कृषिः क्रियमाणा आसीत्। तेषाञ्च उत्पादनक्षमता अपेक्षातः न्यूना आसीत्। परं तदनन्तरकाले भारतीयकृषौ उच्च-उपज-बीजानाम् (सङ्करबीजानाम्) आगमनमभवत्। तेन जलसेचनस्य रासायणिक-उर्वरकाणां, कीटनाशकानां चोपयोगः कृषौ नितराम् अवर्धत। एतेन उच्च-उपज-बीजानां प्रयोगेण कृषौ जलसेचनस्य अत्यावश्यकता उदभवत्। रासायणिक-उर्वरकाश्च भूमिं पर्यावरणञ्च महतीं हानिं कुर्वन्ति। किन्तु गोधूम-व्रीहिणाम् उत्पादनं महतीम् ऋद्धिम् अगच्छत्। इदानीं वयं भारते जायमानानि प्रमुखानि धान्यानि पठिष्यामः।

---

## भारते प्रमुख-शस्यानि -

यथा भारते विविधाः संस्कृतयः सन्ति तथैव कृषिसस्यानि अपि बहुप्रकारकाणि सन्ति। अत्र प्रामुख्येन सर्वाणि सस्यानि यथर्तु त्रिधा विभक्तानि सन्ति। (१) रविशस्यानि (२) खरीफशस्यानि (३) जायदशस्यानि।

रविशस्यानि

अक्तूबरतः - दिसम्बरमासाभ्यन्तरं रविसस्यानि रोप्यन्ते। अप्रेलतः - जूनमासाभ्यन्तरं रविसस्यानि कृत्यन्ते। गोधूमः, हरेणुः, चणकः, सर्षपः च इमानि मुख्यानि रविसस्यानि। भारते उत्तर-उत्तरपश्चिम (वायव्य)-क्षेत्रेषु इमानि बहुशः उत्पाद्यन्ते। तेषु पञ्जाबः, हरियाणा, हिमाचलप्रदेशः, जम्मू-कश्मीरम्, उत्तराखण्डः, उत्तरप्रदेश-राज्यानि मुख्यानि सन्ति। शीततर्ौ पश्चिमीवर्षा रविशस्यानाम् उत्पादने साहाय्यं करोति।

खरीफ-शस्यानि

वर्षर्तोः आगमने खरीफशस्यानां रोपणं क्रियते। तत्परं सितम्बरतः अक्तूबरमासाभ्यन्तरं कृत्यन्ते। एतेषु व्रीहि-मख-ज्वार-वर्जरी-आढकी-मुद्ग-माष-कार्पास-जूट-कलाय-सोयाबीन-इत्येषां महत्त्वपूर्णानां शस्यानां समावेशो भवति।

जायदशस्यानि

रवि-खरीफ-इत्येतयोः सस्ययोर्मध्ये ग्रीष्मर्तौ जायदसस्यानां रोपणं भवति। मार्चमासे उप्त्वा जूनमासे स्वीक्रियते। एतेषु कलिङ्गं, वृत्तकर्कटी, शाकानि, तृणसस्यं च उत्पाद्यन्ते। एतानि शस्यानि सद्यफलदायकानि (रोकडिया) सन्ति।

एतेषु पाकविशेषेषु केषाञ्चन प्रधानपाकानां परिचयं वयमस्मिन् पाठे प्राप्स्यामः। तेषु-गोधूमः व्रीहि, मकोयः, वर्जरी, आढकी, चणकः, मसूरः मुद्गाश्च सन्ति।

गोधूमः

भारते प्राचीनकालतः एव गोधूमस्य कृषिः क्रियमाणा अस्ति। ''मोहन-जो-दडो'' इत्याख्यनगरखनने एतस्य प्रमाणानि प्राप्तानि सन्ति। भारतः विश्वस्मिन् गोधूमोत्पादने तृतीयस्थानं भजते। प्रायः गोधूमः शीतकाले जायमानं शस्यं वर्तते। गोधूमः समशीतोष्णकटिबन्धस्य सस्यमस्ति। अस्योत्पादनवपनसमये १० C°, वृद्धिकाले १५ C°, परिपक्वताकाले च २५ C° तापक्रमः आवश्यको भवति।

उत्पादकक्षेत्रम्

भारते इदं सार्वत्रिकम् शस्यम् अस्ति। इदं शस्यं प्राचुर्येण पञ्जाबराज्ये भवति। विशेषतः उत्तर-मध्यभारतस्य इदं प्रमुखं धान्यमस्ति। पञ्जाबः, हरियाणा, उत्तरप्रदेशः, मध्यप्रदेशः, बिहारः, राजस्थानम्, गुर्जरः च इमे प्रान्ताः आहत्य भारतस्य ९० % गोधूमान् उत्पादयन्ति।

उपयोगः

भारतीयभोजने गोधूमस्य विशिष्टं स्थानमस्ति। अन्यधान्यापेक्षया गोधूमे पौष्टिकतत्त्वानि अधिकानि भवन्ति। गोधूमोपयोगः प्रायः चूर्णत्त्वेन क्रियते। पारम्परिकखाद्यान्ने रोटिका, भाक्षरिका, मोदकम्, संयावः, कंसारः, दलिया आदीनां निर्माणे गोधूमः उपयुज्यते। गोधूमेनैव ब्रेड, बिस्कीट, केक आद्याः आधुनिकखाद्यविशेषाः निर्मीयन्ते।

व्रीहिः (Rice)

भारते व्रीहेः कृषिः ख्रिस्ताब्दतः ३००० वर्षपूर्वमेव प्रचलन्ती ज्ञायते। विश्वस्मिन् एतद्धान्यार्थं सर्वाधिकक्षेत्रफलं (२९.४ %) भारते वर्तते। तत्कलस्वरूपं विश्वस्मिन् अस्य धान्यस्योत्पादने भारतं द्वितीयस्थानं (प्रथमक्रमे चीनदेशः) भजते।

उत्पादकक्षेत्रम् -

व्रीहेरुत्पादनार्थं तद्धान्यवपनकाले २० C°, परिपक्वता समये च २७ C° तापमानस्यावश्यकता भवति। १०० से.मी. वर्षायाः आवश्यकता च भवति। व्रीहेरुत्पादनं मुख्यतः आन्ध्रप्रदेशः, पश्चिमबङ्गम्, उत्तराखण्डः, उत्तरप्रदेशः, उडीसा, मध्यप्रदेशः, छतीसगढम्, बिहारः, तमिलनाडु, झारखण्डम्, पञ्जाबः, हरियाणा, महाराष्ट्रम्, कर्णाटक-गुर्जरादिराज्येषु अपि अस्य आंशिकम् उत्पादनं तु भवति एव।

उपयोगः

न केवलं भारते अपि तु समग्रे विश्वस्मिन् व्रीहिधान्यानि पाकशालासु लब्धस्थानानि वर्तन्ते। दक्षिणभारते तु व्रीहिभिः विना भोजनकल्पना अपि कर्तुं न शक्यते। व्रीहिभिः क्षिप्रा, पायसम्, ओदनम् दोसा, इड़ली, पर्पटः (पापड), संयावः आदीनि खाद्यान्नानि निर्मीयन्ते। क्वचित् रोटिका-शष्कुली आदीनि अपि व्रीहिपिष्टेन निर्मीयन्ते। केरले ''पुट्टु'' आंध्रप्रदेशे च ''पोङ्गल'' इत्याख्यं खाद्यविशेषं व्रीहिभिः निर्मीयते। आयुर्वेदानुसारं इदं व्रीहिधान्यं पाचनशीलं भवति।

मकोयः (मखः)

प्राधान्येन इदं मध्य-अमेरिका प्रान्तीयं धान्यं वर्तते। भारते चेदं शरत्काले जायमानं धान्यमस्ति। अस्य धान्यस्य वैशिष्ट्यमस्ति यद् - अन्यधान्यापेक्षया अयं मकोयः समतलक्षेत्रेषु उन्नतप्रदेशेषु च साफल्येन उप्यते। सामान्यतः धान्यमिदं सर्वासु भूमिषु वप्तुं शक्यते। अस्य कृष्यर्थं २५ C° तः ३० C° तापक्रमः ५० तः १०० से.मी. वर्षायाः आवश्यकता भवति।

उत्पादकक्षेत्रम्

अस्य धान्यस्योत्पादनं समग्रे राष्ट्रे भवति। तथापि पञ्जाबः, उत्तरप्रदेशः, आन्ध्रप्रदेशः, राजस्थानम्, झारखण्डः, कर्णाटकः, बिहारः, गुर्जरः, मध्यप्रदेशः एतानि राज्यानि मखोत्पादने अग्रेसराणि सन्ति। देशस्य ८० % मखोत्पादनम् उत्तरप्रदेशे भवति।

उपयोगः

भारतदेशे मुख्यं तु मखस्य उपयोगः पश्वाहारत्वेन क्रियते। समग्रस्य उत्पादनस्य ६० % पश्वाहारार्थम्, २० % भोजनार्थम्, २० % औद्योगिक-उपयोगार्थम् (यथा ''स्टार्च'' निर्मीयते) च एतद् धान्यमुपयुज्यते। ''मकोयः'' न्यूनमूल्यं धान्यमस्ति। भोजने रोटिका (रोटला) - सूप - व्यञ्जनेषु-इदमुपयुज्यते। भृष्ट्वा वा क्वथयित्वापि एतत् खाद्यते। मकोयस्य तेलस्यापि उपयोगः भवति।

वर्जरी (बाजरी)

अस्याः वर्जर्याः जन्मभूमिः भारतमेव मन्यते। विशेषतः उत्तरभारते चैत्रशस्यरूपेण दक्षिणभारते च ग्रीष्म-शरद् शस्यरूपेण अस्याः कृषिर्भवति। वर्जर्याः कृष्यर्थं ४० C° तः ५० C° तापक्रमः समुचितः। प्रायः अस्याः कृष्यै सिक्तामयमृत्तिका अनुकूला भवति।

उत्पादकक्षेत्रम्

वर्जरी शुष्कप्रदेशेषु उच्चतापमानक्षेत्रेषु, न्यूनजलप्रदेशेषु च उत्पाद्यते। अस्य धान्यस्य इदमेव वैशिष्ट्यं यद् अन्यगोधूमव्रीह्यादीनां यत्र प्रतिकूलता भवति तत्रापि वर्जरी सारल्येन उप्यते। भारते राजस्थाने अस्याः सर्वाधिकं क्षेत्रं वर्तते। येन राजस्थानम् अस्योत्पादने समग्रे भारते प्रथमस्थानं भजते। तथैव गुर्जरः, महाराष्ट्रम्, कर्नाटकः, पञ्जाबः, हरियाणा, उत्तरप्रदेशश्च वर्जर्याः प्रमुखोत्पादकानि राज्यानि सन्ति।

उपयोगः

वर्जरीधान्यं प्रामुख्येण खाद्यान्ने, पशवाहारे क्वचित् च इन्धने उपयुज्यते। अस्याः कणेषु अन्यधान्यापेक्षया प्रोटीनसत्त्वस्य प्राचुर्यं भवति। वर्जरीपिष्टेन रोटिका (रोटला), राब् खाद्यान्नानि पच्यन्ते।

**द्विदलम् ( कठोळ )**

भारते द्विदलानामुत्पादनं ग्रीष्मे शीते च इत्युभयकाले भवति। चैत्रशस्येषु आढकी, चणकः, हरेणुः. मसूरः तथैव शरत्कालीनशस्येषु माषः, मुद्‌गः, मठादयः समागच्छन्ति। विश्वस्मिन् सर्वाधिकद्विदलोत्पादने भारतं प्रमुखमस्ति। उपभोक्तृत्वेनापि भारतस्य प्रथमः क्रमः। प्रायः भोजने एतेषां द्विदलानाम् उपस्थितिः सूपत्वेन वा व्यञ्जनरूपेण अनिवार्या एव। एतेषु धान्यापेक्षया प्रोटीनमात्राधिक्यं कैलरीमात्रान्यूनत्वञ्च भवति।

आढकी

आढक्याः मूल्यम् एशियाखण्डः प्रमाण्यते। समशीतोष्णकटिबन्धे अस्याः उत्पादनं भवति। अस्याः पादपः दीर्घायुः भवति। आढकीपादपः त्रिवर्षेभ्य पञ्चवर्षाणि यावत् सन्तिष्ठते। विश्वस्य ८२ % आढक्युत्पादनं तु भारते एव भवति। आढकीपादपः शुष्कवातावरणं प्रति प्रतिरोधकः भवति, येन सः ६०० मि.मि. तः अपि न्यूनवर्षाधरेषु क्षेत्रेषु वप्तुं शक्यते।

उपयोगः

हरित-आढक्याः व्यञ्जनत्वेन शुष्क-आढक्याश्च सूपत्वेन व्यञ्जनरूपेण च उपयोगः भवति। व्रीहिणा सह मिश्रणेन एतया क्षिप्रा निर्मीयते या बहुस्वादप्रिया भवति। गुजराते आढकीकणान् क्वथयित्वा ''टोठा'' इति खाद्यविशेषं निर्मीयते। आढकीशस्यदण्डाः इन्धनत्वेन पशवाहारे च उपयुज्यन्ते।

चणकः

चणकः समशीतोष्णेषु ४०० मि.मि. समं वार्षिक वृष्टिधारकेषु क्षेत्रेषु च अनुकूलतां भजते। चणकस्य मुख्यौ द्वौ प्रकारौ देशीयचणकः (कृष्णचणकः) काबुलीयचणकः (श्वेतचणकः) च। अस्योत्पादने भारतराष्ट्रं प्रामुख्यं भजते।

उपयोगः

चणकस्य पिष्टं कणः, दालम् चेमानि सर्वाणि अपि खाद्यान्ने उपयुज्यन्ते। हरितचणकाः क्वाथ-व्यञ्जनयोः उपयुज्यन्ते। शुष्कचणकानां व्यञ्जनं अवलेहश्च भवति। चणकदालस्य प्राधान्येन दालरूपेण (सूपत्वेन) उपयोगः भवति। चणकपिष्टं तु स्वादप्रियेभ्यः जनेभ्यः अतीव रोचते। यतो हि विविध-फरसाण् खाद्यान्नानि अनेनैव निर्मीयन्ते। चणकपिष्टं वैशिष्ट्यं यद्-इदं फेनकरूपेणापि लाभप्रदं भवति। यद्यपि चणकः चणकपिष्टञ्च वातकरं तथापि घृतेन सह ग्रहणेन चणको न तावान् हानिकरः।

मसूरः

मसूरः बिहारराज्ये सर्वाधिकं रविशस्यत्वेन च उप्यते। अस्मिन् राज्ये द्विदलमिदं ७३ लक्षहैक्टरपरिमितम् उप्यते।

अस्य कृषिः प्रायः असिञ्चितक्षेत्रेषु धान्यानां वपनानन्तरं क्रियते। अयं मसूरः छत्तीसगढम्, देहली, बिहारः, मध्यप्रदेशः - आदिषु राज्येषु प्राधान्येन उप्यते।

उपयोगः

अस्य द्विदलस्य प्रायः दालरूपेणैव उपयोगं वयं कुर्मः। अनियमितपाचक्रियायां मसूरः अधिकः लाभकारी भवति। मसूरेषु सर्वद्विदलापेक्षया सर्वाधिकं प्रोटीनसत्त्वम् भवति। (प्रति १०० ग्राममसूरेषु २५ ग्राम प्रोटीनसत्त्वम् भवति।) एतस्य दालनिर्माणादन्यत् मिष्टान्न-फरसाण्-पाचनेऽपि उपयोगः भवति।

मुद्गः

सर्वदा सेवनार्थं योग्यः मुद्गः। यद्यपि दालाः सर्वे वातवर्धकाः, मलप्रतिबन्धकाः भवन्ति तथापि मुद्गः न तावान् वातकरः, मलप्रतिबन्धकः वा। मुद्गानां मूलं भारतीयोपखण्डे वर्तते। सामान्यतः एतस्योपयोगः मिष्टान्नतिक्तान्नत्वेन च भवति। मुद्गानां कृषिः भारते सर्वत्र भवति। अस्य धान्यस्य कृते मध्यमकृष्णभूमिः सम्यक् आर्द्राभूमिश्च सर्वाधिकयोग्या भवति।

उपयोगः

मुद्गस्य क्वथितं मन्दाग्नौ, उपवासानन्तरं रुग्णतायाञ्च पीयते। मुद्गदाल-अक्षतैः क्षिप्रा निर्मीयते। मुख्यरूपेण मुद्गाः दालव्यञ्जनरूपेण उपयुज्यन्ते। मुद्गाः पौष्टिकाः पाचनशीलाश्च भवन्ति। मेदक्षयार्थं मुद्गाः उपयुज्यन्ते मिष्ट्टान्नत्वेन मुद्गपिष्टरचितः संयावः स्वादुतरः भवति।

**उपसंहारः**

भारते कृषिः कदाचिद् वेदकालाद् एव प्रारब्धा स्यात्। एतस्य प्रमाणं स्वयं श्रुतयो वदन्ति - ''**अक्षैः मा दीव्यः कृषिमित्कृषस्व वित्ते बहुमन्यमानः**'' अर्थात् द्यूतं मा क्रीड, कृषिकार्यं कुरु तेन उत्पन्नेन अन्नेन अन्नोपार्जितधनेन च आत्मानं सन्तुष्टं मन्यस्व। अपरमपि - ''**भुनक्त सीरा वियुगा तनुध्वं कृते योनौ वपतेह बीजम्। गिरा च सृष्टिः सभरा असन्नोनेदीयऽ इत्सृण्यः पक्वमेयात्**'' - अर्थात् उक्तमन्त्रे ऋषिः कृषि-उपकरणानि, तत्कार्याणि च वर्णयति - सीरा-हलम् वृषभैः साकं सयोक्तुं युगं (कृषेः उपकरणम्, जुआ) विस्तारयत। क्षेत्रं कर्षित्वा तस्मिन् बीजानि वपत। येन क्षेत्रं शीघ्रं शस्यपूर्णं भवति। परिपक्वस्य अन्नस्य अङ्कुशेन इव वक्रेण दात्रेण वा लवित्रेण कृन्तनं कुर्यात्। तदन्नं च गृहमानयेत्। अनेन सिद्धमस्ति यत् वैदिककालीनं भारतमपि कृषितन्त्रेण सुचारूतया अभिज्ञम् आसीत्।

कृषिः तन्माध्यमेन च अन्नं जीवानां पोषणं सत्त्ववर्धनञ्च करोति। सम्प्रति भारते कृषेः संवर्धनाय केन्द्रराज्यसर्वकाराः सन्ततं यत्नशीलाः दृश्यन्ते। शस्यानाम् अभिरक्षणाय कृषीवलेभ्यः ऋणसूदमुक्तौ अपि विविधयोजनाः पारितवन्तः। सर्वकारपक्षतः यदि कश्चित् यत्नोऽपेक्षितः अस्ति तद्-कृषीवलेभ्यः शस्यानां समुचित-पोषणक्षम मूल्यार्पणस्य व्यवस्थापनं कर्तव्यम् इति। यादृग् महत्त्वं कृषेः तादृगेव आदरः कृषकाणामपि स्यात्। आदरः कृषकाणामपि स्यात्।

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) भारते कृषेः विकासनिर्धारकाः प्रमाणावशेषाः कुत्र प्राप्ताः सन्ति ?

(क) गङ्गायाः उपत्यकासु (ख) सिन्धुनद्याः तटे (ग) कश्मीरप्रदेशे (घ) महाराष्ट्रप्रान्ते

(२) कृषिपक्षे एतत्कार्यम् समाविष्टं नास्ति ?

(क) पशुपालनम् (ख) मधुकौशेयादीनामुत्पादनम्

(ग) बीजवपनम् (घ) भूमिपूजनम्

(३) कस्माद् दशाब्दात् हरितक्रान्तेः आगमनं भारते अभवत् ?

(क) १९७० (ख) १९६० (ग) १९९० (घ) २०००

(४) अक्टूबरमासतः दिसम्बरमासाभ्यन्तरं कानि शस्यानि रोप्यन्ते ?

(क) खरीफशस्यानि (ख) रविशस्यानि (ग) जायदशस्यानि (घ) शाकानि

(५) खरीफशस्यानि कदा कृत्यन्ते ?

(क) मार्चतः जूनमासाभ्यन्तरम् (ख) अक्तूबरतः दिसम्बरमासाभ्यन्तरम्

(ग) सितम्बरतः अक्तूबरमासाभ्यन्तरम् (घ) अप्रैलमासतः जूनमासाभ्यन्तरम्

(६) प्रायः गोधूमः जायमानं शस्यमस्ति ?

(क) ग्रीष्मकाले (ख) वर्षाकाले (ग) शीतकाले (घ) एतेषु किमपि न

(७) गोधूमस्य प्रमुखोत्पादकं राज्यम् किम् ?

(क) गुर्जरः (ख) पञ्जाबः (ग) उत्तरप्रदेशः (घ) कर्णाटकः

(८) कस्य धान्यस्योत्पादने भारतराष्ट्रं द्वितीयस्थानं भजते ?

(क) गोधूमस्य (ख) व्रीहेः (ग) मकोयस्य (घ) मुद्गस्य

(९) व्रीहिधान्यस्य कृषौ कियत्याः वर्षायाः आवश्यकता भवति ?

(क) ५० से.मी. (ख) ९० से.मी. (ग) १०० से.मी. (घ) ७० से.मी.

(१०) देशस्य ८० % मकोयोत्पादनं कस्मिन् राज्ये भवति ?

(क) उत्तरप्रदेशः (ख) झारखण्डः (ग) केरलम् (घ) हिमाचलप्रदेशः

**२. एकेन वाक्येन उत्तरं लिखत।**

(१) भारतीयग्रामीणाः कियत्प्रतिशतं जनाः कृषि-आश्रिताः सन्ति ?

(२) ई.स. १९६० वर्षानन्तरं कीदृशानां बीजानां कृषिः प्रारब्धा ?

(३) भारतीयशस्यानि केषु त्रिषु प्रकारेषु विभज्यन्ते ?

(४) भारते गोधूमस्य प्राचीन-अवशेषाः कुत्र प्राप्यन्ते ?

(५) गोधूमस्य वपन-वृद्धि-परिपक्वताकालेषु कियत् तापमानम् आवश्यकं भवति ?

(६) केरल-आन्ध्रप्रदेशयोः किन्नामखाद्यविशेषौ व्रीहि धान्येन निर्मीयेते ?

(७) मकोयस्य (मखस्य) कियत् प्रतिशतम् उपयोगः भारते पश्वाहाररूपेण क्रियते ?

(८) कस्य धान्यस्य जन्मभूमिः भारतं मन्यते ?

(९) आढकी कियत्वर्षावत्सु क्षेत्रेषु वप्तुं शक्यते ?

(१०) चैत्रकाले जायमानानि प्रमुखानि द्विदलानि कानि सन्ति ?

**३. द्वित्रिवाक्यैः उत्तरं लिखत।**

(१) व्रीहिधान्येन कानि - खाद्यान्नानि व्यञ्जनानि वा निर्मीयन्ते ?

(२) रविशस्यानि (मुख्यानि) तदुत्पादकराज्यानि च कानि सन्ति ?

(३) सङ्करजातिबीजानां कृष्याः परिचयं लिखत।

(४) गोधूमोत्पादकराज्यानि कानि सन्ति ?

(५) मकोयोत्पादने कानि भौगोलिककारकाणि आवश्यकानि भवन्ति ?

**४. टिप्पणी लेख्या।**

(१) खरीफसस्यम्।

(२) गोधूमः।

**५. सविस्तरेण उत्तरं लिखत।**

(१) व्रीहेः वर्जर्याः च अनुकूल - भौगोलिककारकाणि वर्णयत।

(२) मुद्गानां मसूराणां च उपदशवाक्येषु परिचयं कारयत।

**छात्रप्रवृत्तिः**

- मानचित्रे विविधधान्यसम्बद्धक्षेत्राणि प्रदर्शयत।
- ववविधधान्यक्षेत्राणां साक्षात्कारः करणीयः
- कृषिक्षेत्रे बीजवपनम्, सेचनम्, क्रन्तनम् इत्यादीनां कलायानाम् अवलोकनं यथासमयं कर्तव्यम।

**सुभाषितम्**

**सूर्यस्तपतु मेघाः वा वर्षन्तु विपुलं जलम्।**
**कृषिका कृषिको नित्यं शीतकालेऽपि कर्मठौ॥**
**ग्रीष्मे शरीरं सस्वेदं शीते कम्पमयं सदा।**
**हलेन च कुदालेन तौ तु क्षेत्राणि कर्षतः॥**

●

# १८ सामाजिकव्यवस्था सामाजिकरचनातन्त्रं च

**प्रस्तावना**

पूर्वे वयं समाजशास्त्रस्य विषये पठितवन्तः। विशालतमे मानवसमाजे यत्र-यत्र पश्यामः तत्र मानवावश्यकतानां पूर्त्यर्थम् अनेकाः व्यवस्थाः सन्ति। यथा-कुटुम्बसंख्यया बालकस्य जन्म-रक्षण-पोषणादि एवं संस्कारप्रस्थापनाय व्यवस्था कृताऽस्ति। तदुपरान्त शिक्षणसंस्थाः शैक्षणिकावश्यकताः पूरयन्ति। तथैव विवाहजात्यार्थिकधार्मिकाद्याः संस्थाः मानवावश्यकतायाः पूरणायसामाजिकी व्यवस्थाऽस्ति।

काऽपि रचना भिन्न-भिन्नभागानां सम्बन्धेन पूर्णा भवति। यथा चतुष्चक्रिकायाः रचना यन्त्रचक्र आसन्देत्यादिभागानां समन्वयेन भवति। इत्थं रीत्या भौतिकवस्तु अपि विविधभागानां संयोजनेनैव भवति। तदेव रीत्या शाला, आचार्यः, शिक्षकाः, छात्राः इत्यादयः समाजिकसंस्थानां समायोजनेन जायन्ते। कुटुम्बमपि भार्या-पति, माता-पिता, भ्राता-भगिनी इत्यादीनां सामाजिकसमायोजनेन भवति, तथैव शाला, वित्तकोषः, ग्रामेत्याद्याः सामाजिक रचनाः सन्ति। सामाजिकव्यवस्थायाः तथा सामाजिकरचनायाः मध्ये घनिष्ठसम्बन्धः विद्यते। व्यवस्थया विना सामाजिककार्यं न सम्भवति तथा सामाजिककार्येण विना रचना न सम्भवति। अतः सामाजिकरचना एवं सामाजिकव्यवस्था परस्परं पूरकं अस्ति।

---

## सामाजिकव्यवस्था एवं सामाजिकरचनातन्त्रम्

सामाजिकव्यवस्थायाः एवं रचनातन्त्रस्य ज्ञानाय समाजविदुषा हर्बर्टस्पेन्सरमहोदयेन मानवसमाजस्य एवं शरीरस्य तुलना कृताऽस्ति। ब्रेनिस्लोमेनिलोवस्कः मानवश्यकताधारितस्य रचनातन्त्रस्य मार्गदर्शनं दत्तमस्ति। टाल्कोट-पार्सन्समहोदयः मानवक्रियाव्यवस्थां चतुर्षु उपभागेषु विभाजितां कृतवान्। पूर्वे वयं सामाजिकव्यवस्थाविषये ज्ञास्यामः।

**सामाजिकव्यवस्थायाः व्याख्या**

सामाजिकव्यवस्था-कार्यात्मकसम्बन्ध समायोजनेन जायते। ''सामाजिकव्यवस्था नाम परस्परं कार्यात्मकसम्बन्धेषु स्थितभागेषु जातमेकं सङ्कुलमिति'' - **टाल्कोट पार्सन्स** ''सामाजिकव्यवस्था एकःसमूहःमस्ति यः तस्य सभ्यानां कर्तव्यानि, सामाजिकस्थानानि तथा परस्परवर्तनमेव विशाल समाजेन सह सम्बन्धस्थापनात्मकं सामाजिकसङ्कुलम् अस्ति।'' - **सोरोकिन** मानवानामान्तरक्रियात्मिकाव्यवस्था नाम सामाजिकव्यवस्था इति।

**टाल्कोटपार्सन्समहोदयानां मतानुसारं सामाजिकव्यवस्थायाः लक्षणानि**

(१) विभिन्नभागेषु परस्परावलम्बनम्

सामाजिकव्यवस्थायाः निर्माणे स्वल्पाति-स्वल्पं द्वे सामाजिकभागसम्मेलने अनिवार्ये। कुटुम्बे माता-पिता इत्यादयः सम्मिल्यैव कुटुम्बव्यवस्था जायते।

(२) सामाजिकव्यवस्थायां स्थिरता

मानवावश्यकतापूर्तेः कृते व्यवस्थायाः स्थिरता अनिवार्या विद्यते। अतः एव प्रत्येकं व्यवस्था स्वानुकूलनं प्रस्थाप्य अनुकूलनं साधयति।

(३) सामाजिकव्यवस्थायां परिवर्तनम्

सर्वाऽपि सामाजिकव्यवस्था परिवर्तनशीला अस्ति। कालानन्तरं व्यवस्था परिवर्तनं प्राप्नोति, अतः व्यवस्थायाः स्थिरतायाः कृते परिवर्तनेन सह अनुकूलनं साधितव्यमिति। येन परिवर्तनमुद्भवति।

(४) साामाजिकव्यवस्थाया: सोपानानि




(१) उपगणा:

कस्यापि समाजस्य अनेके गणा: भवन्ति। प्रत्येकं गण: सामाजिकक्रियान्तरव्यवस्थाऽस्ति। मानवा: अनेकेऽस्मिन् उपगणे विविधप्रकारस्य सामाजिकस्थानं धारयन्ति। आन्तरक्रियाया: कां व्यवस्थां वयं गणरूपेण ज्ञास्याम:। तस्योऽपरि उपगणस्य विचारधारा अस्ति। यथा-भारतराष्ट्रमेकं गण: अस्ति तदा गुजरात-महाराष्ट्रादय: राज्यानि उपगणास्सन्ति। यदि कामपि शालां गणस्वरूपेण स्वीकुर्म: तदा तस्या: शालाया: विद्यार्थिन: शिक्षका:, सेवका: आदय: उपगणा: विद्यन्ते।

(२) भूमिका:

सामाजिकव्यवस्थायां व्यक्ते: विविधानि स्थानानि सन्ति। प्रत्येकं स्थानसन्दर्भे सामाजिककक्षानुसारं व्यक्ति: यत्किमपि कार्यं करोति तां भूमिका इति कथ्यते। व्यवस्थायामस्यां प्रत्येकं मानव: विवधेषु उपगणेषु भिन्न:-भिन्ना: भूमिका: वहति। यथा-शालायाम् आचार्य: शालासञ्चालनं करोति, शिक्षका: पाठयन्ति, छात्रा: पठन्ति, कर्मचारिण: कार्यालयकार्यं कुर्वन्ति, सेवका: सेवाकार्यं कुर्वन्ति, एतानि कार्याणि तेषां भूमिकानिर्देशं कुर्वन्ति।

(३) सामाजिककक्षा:

कतिपयसामाजिकपरिस्थितौ एवं सामाजिकरचनातन्त्रे केनापि स्थानेन सह संलग्ना समूहवर्तनस्यापेक्षा नाम सामाजिककक्षा। सामाजिककक्षा तु व्यक्तिवर्तनस्य व्यवस्थात्मक: मापदण्ड: अस्ति। मापदण्डमेव व्यक्ते: वर्तनस्य योग्यतायोग्यताया: स्पष्टीकरणं करोति। यथा - शालासञ्चालननियमा: आचार्यादाराभ्य छात्रपर्यन्तानां सर्वेषां वर्तननियन्त्रणं कुर्वन्ति। सामाजिककक्षा: समूहजीवनस्य वातावरणं रचयन्ति।

(४) सांस्कृतिकमूल्यानि

सामाजिकव्यवस्थायां मानव: यद् वर्तनं करोति, तस्य मूल्याङ्कनं सांस्कृतिकमूल्यै: भवति। सामाजिकव्यवस्थायां व्यक्ति: यत् स्थानं धारयति तस्य मूल्याङ्कनमपि सांस्कृतिकमूल्येनैव भवति। यथा - शालाचार्येण प्रामाणिकतया शालासञ्चालनं कर्तव्यम्, शिक्षकै: निष्ठापूर्वकं कार्यं करणीयम्, छात्रै: नम्रतया वर्तितव्यम् इत्यादिसांस्कृतिकमूल्यानामुदाहरणानि विद्यन्ते।

ध्येयानि

उपर्युक्तसोपानै: सामाजिकव्यवस्था स्वध्येयं सन्तोषयति। ध्येयं प्राप्तकरणात्मिका प्रक्रियाऽस्ति। मानवानां मुख्य - गौणावश्यकतानां सन्तोषाय कुटुम्ब-लग्न-राज्य-शिक्षणधर्मादय: व्यवस्था: विद्यन्ते। प्रत्येकं व्यवस्थाया: अनेकानि ध्येयानि सन्ति तथा सामाजिक ध्येयानां पूर्त्यर्थं समाजव्यवस्था गतिशीला वर्तते।

सामाजिकव्यवस्थासोपानानि परस्परं संलग्नानि सन्ति। एकस्य सोपानस्य परिवर्तने सति तस्य प्रभावः व्यवस्थातन्त्रस्योऽपरि भवति।

## सामाजिकरचनातन्त्रस्य व्याख्या

सामाजिकव्यवस्थया सह घनिष्ठः सम्बन्धयुक्तस्य सामाजिकरचनातन्त्रस्य विषये ज्ञास्यामः। तत्पूर्वं का नाम रचना ? इति विषये पठामः। रचना अर्थात् परस्परं संलग्नभागानां व्यवस्थात्मकं समायोजनम्, येन समग्राकृतिः भविष्यति। यथा – गृहनिर्माणमेका भौतिकरचनाऽस्ति। कारणं तत्र पाषाण-वालुका-द्वाराणि-इत्यादीनां व्यवस्थिसंयोजनेन गृहाकृतिः सम्भवति तथैव वर्गखण्डः, अध्यापककक्षः, पुस्तकालयम्, कार्यलयम् इत्यादीनां समायोजनेन शालायाः रचना जायते।

''सामाजिकरचनातन्त्रं नाम भूमिका एवं कक्षा सङ्कुलम् इति'' – रोबर्ट मर्टनमहोदयः।

''समाजे व्यक्तिः स्थानं धारयति तथा स्थानानुकूलां भूमिकां भजते। एषा भूमिका तु निश्चितसम्बन्धे तथा परिस्थितौ चरितार्थां भवति। यया रीत्या भूमिका व्यवस्थितसामाजिकसम्बन्धस्य पथनिर्माणं करोति। सा सामाजिकरचना कथ्यते'' – विद्युतः जोषी

सामाजिकसोपानमेका अमूर्तघटना विद्यते। तस्य भागेषु समूहः संस्था, संघटनम्, मण्डलम् इत्यादीनां समावेशः जायते। प्रत्येकऽस्मिन् समाजे मानवानां परस्परं सम्मेलनाय विशिष्टा संस्थाकीयप्रणालिका विकसिता रचना विद्यते। यस्यां माता-पिता, पुत्र-पुत्री इत्यादीनां व्यवस्थितः सम्बन्धः प्रस्थापितः, यस्मिन् भिन्नज्ञातिधर्माणाञ्च समावेशः भवति।

## सामाजिकरचनातन्त्रस्य लक्षणानि

(१) सामाजिकस्थानानां समूहः

स्थानसमूहः सामाजिकरचनातन्त्रस्य प्रथममनिवार्यं लक्षणं विद्यते। किमपि रचनातन्त्रं विविधस्थानैः अस्तित्वं भजते। समूहस्य संस्थायाश्च आवश्यकतां पूरयितुं विविधस्थानानामनिवार्यता विद्यते। यथा – आचार्यः, शिक्षकः, छात्रः, सेवकः, विविधस्थान-व्यवस्था इत्यादिभिः शालारचना सुस्थिराऽस्ति।

(२) सामाजिक-भूमिकानां समूहः

सामाजिकभूमिका तु सामाजिकस्थानस्य वर्तनलक्षी सोपानमस्ति। कस्यापि तन्त्रप्रथायाः आवश्यकतां पूरयितुं ध्येयप्राप्त्यर्थञ्च स्थानात्मिका भूमिका अनिवार्या। यथा – आचार्येण संचालनं कर्तव्यम्, शिक्षकेन शिक्षणकार्यं करणीयम् एवं छात्रेण अभ्यासकर्तुं भूमिका पालनीया इति।

(३) सामाजिककक्षाः

सामाजिकरचनातन्त्रं कार्यान्वितं कर्तुं सामाजिककक्षा आवश्यकी वर्तते। कक्षा तु मानवाय तथा गणाय स्थानानुरूपं का भूमिका अनिवार्या ? तस्मिन् विषये मार्गदर्शनं ददाति। शिक्षकत्वेन कार्यं कर्तुं योग्यता अनिवार्या विद्यते, तथैव शालाप्रवेशः, परीक्षा, अभ्यासक्रमादयः, कक्षाः न स्युः तदा शिक्षण ध्येयानि पूर्णतां न यान्ति।

(४) सामाजिकरचनातन्त्रस्य AGIL स्वरूपम् (मोडेल)

सामाजशास्त्रिणा टाल्कोट पार्सन्समहोदयेन दत्तं सामाजिकरचनातन्त्रस्वरूपं कार्यात्मकावश्यकतारूपेण ज्ञायते। कस्यामपि सामाजिकव्यवस्थायां स्थिरतां प्राप्तुं भिन्न-भिन्नाः चतस्त्रः कार्यात्मकावश्यकताः पूर्णाः कर्तव्याः। चतस्त्रः आवश्यकताः निम्नानुरूपाः सन्ति।

यथा –

(१) अनुकूलनम्

कस्मिन् अपि समाजे स्थातुं तथा च भौतिकावश्यकतां पूरयितुं भौतिकवातावरणेन सह अनुकूलनं साधनीयमिति। अन्नं निवासः च मानवस्य अनिवार्यावश्यकता विद्यते। तस्य पूर्त्यर्थं समाजे उत्पादनस्य तथा विभाजनस्य व्यवस्था कृताऽस्ति। समाजेऽस्याः आवश्यकतायाः पूर्तिः अर्थव्यवस्थया जायते। यया रीत्या आर्थिकव्यवस्थया समाजेऽनुकूलनं भवति।

(२) ध्येयप्राप्तिः

प्रत्येकं तन्त्रे स्थिरता प्राप्तुं यत् किमपि सुनिश्चतं ध्येयमनिवार्यं भवेत्। सुनिश्चितं ध्येयं प्राप्तुं सामाजिकतन्त्रे निर्णयात्मिका संस्था अर्थाद् राज्यव्यवस्था भवति। ध्येयसुनिश्चितकरणकार्ये राज्यसंस्था सहायतां करोति। राज्यसभा नीतिनिर्माणं कृत्वा तस्य चरितार्थतां करोति। अनुकूलनसमस्यायाः समाधानेन ध्येयप्राप्तिस्तु सरलतां याति।

(३) सुघटनम् (एकीकरणम्)

यदि समाजेन स्वास्तित्वं रक्षणीयं स्यात्तदा आन्तरिकभागस्य सङ्कलनं तथा नियन्त्रणं सुरक्षितं कर्तव्यं भवति। सामाजिकव्यवस्थायां सर्वकारसंस्थया, न्यायालयेन, सामाजिककक्षानियमेन च आवश्यकतायाः पूर्तिर्जायते। निष्ठया सहकारेण सङ्कलनेन एवं कार्यदक्षतया च सामाजिकव्यवस्थायाम् एकीकरणं भवति।

(४) रचनायाः रक्षणं निवारणं च

कस्मिन् अपि समाजे सुनिश्चितव्यवस्थया कक्षाविभागाधारेण स्वास्तित्वं रक्षणीयम्। तदर्थं कतिपयसमस्यानां समाधानं करणीयं भवति। रचनारक्षणार्थं समाजसभ्यैः स्वस्थानपदानुरूपं भूमिकायाः पूर्तिं कर्तव्याऽस्ति। सभ्यानां स्वभूमिकानां सुचारुतया पूर्त्यर्थं प्रोत्साहनं दातव्यं भवति। सामाजिककरणमेकं महत्त्वपूर्णं क्रियातन्त्रं वर्तते। सामाजिकीकरणस्य क्रियातन्त्रेण समाजमूल्यानां सिद्धिर्भवति समाजनियन्त्रणप्रक्रिया सन्तुलिता च भवति।

प्रस्तुतेऽस्मिन् पाठे अस्माभिः सामाजिकव्यवस्थायाः तथा सामाजिकरचनातन्त्रस्य विषये पठितम्। समाजव्यवस्थायाः लक्षणविभागानाञ्च ज्ञानेन वयं सामाजिकरचनातन्त्रविषये योग्यं ज्ञानं प्राप्तवन्तः। समाजव्यवस्था रचनातन्त्रं च कतिपयाभिः प्रक्रियाभिः सह संलग्नमस्ति। तत्र निरन्तरपरिवर्तनमायाति।

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) मानवसमाजस्य शरीररचनायाः च तुलना केन कृताऽस्ति ?

(क) हर्बाट स्पेन्सरेण (ख) टाल्कोट पार्सन्सेन (ग) सोरोकिनेन (घ) त्रिषु एकमपि न

(२) मानवानाम् आवश्यकताधारितरचनातन्त्रस्य मार्गदर्शनं केन दत्तमस्ति ?

(क) हर्बाटस्पेन्सरेण (ख) टाल्कोट पार्सन्समहोदयेन

(ग) ब्रेनिस्लो मेनिलोवस्केन (घ) सोरोकिन

(३) सामाजिकमानवक्रियायाः व्यवस्थायाः उपभागानां रचनां कः कृतवान् ?

(क) सोरोकिनः (ख) ब्रेनिस्लो मोलिनोवस्कः

(ग) टाल्कोट पार्सन्समहोदयः (घ) हर्बाट स्पॅन्सरः

(४) सामाजिकरचनातन्त्रस्य प्रथममनिवार्यलक्षणं किं क्रियते ?

(क) स्थानम् (ख) भूमिका (ग) समूहः (घ) स्थानसमूहः

**२. एकेन वाक्येन उत्तरं लिखत।**

(१) ध्येयप्राप्तेः समस्यायाः कया संस्थया समाधानं भवति ?

(२) पार्सन्समहोदयेन दत्तं मोडेल (न्यादर्शस्य) इत्यस्य नाम किम् ?

(३) उपगणस्य व्याख्यां ददतु।

(४) रचनायाः एकमुदाहरणं लिखन्तु।

(५) महत्त्वपूर्णं क्रियातन्त्रं किं विद्यते ?

(६) सामाजिकव्यवस्थायाः कति सोपानानि सन्ति ?

(७) किं नाम सामाजिकरचनातन्त्रम् ?

(८) प्रत्येकं तन्त्रे स्थिरतां प्राप्तुं किमनिवार्यम् ?

(९) सामाजिकसोपानमिति कीदृशी घटना विद्यते ?

(१०) सामाजिकभूमिका सामाजिकस्थानस्य कीदृशं सोपानमस्ति ?

**३. द्वित्रैवाक्यैः उत्तरं लिखत।**

(१) सामाजिकव्यवस्थायाः व्याख्यां लिखन्तु।

(२) सामाजिकरचनातन्त्रस्य व्याख्यां ददतु।

(३) किं नाम सांस्कृतिकमूल्यम् ?

**४. सविस्तारम् उत्तरं लिखत।**

(१) सामाजिकव्यवस्थायाः लक्षणानि प्रतिपादयतु।

(२) समाजिकव्यवस्थायाः सोपानानि लिखन्तु।

**५. टिप्पणी लेख्या।**

(१) टाल्कोटपार्सन्समहोदयस्य AGIL (मोडेल) स्वरूपम्।

(२) सामाजिकव्यवस्थायाः अर्थः।

**छात्रप्रवृत्तिः**

- स्वशालायाः तन्त्रस्य चित्रस्य निर्माण करोतु।
- छात्राः स्वग्रामस्य वा नगरस्य उपगणानां सूचेः निर्माणं कुर्वन्तु।

**सुभाषितम्**

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुवधैव कुटुम्बकम्॥

•

# १९ अर्थशास्त्रम्

**प्रस्तावना**

आर्थिकचिन्तनपरम्परा सर्वाधिका प्राचीनास्ति। भारतीयप्राचीन प्रमुखग्रन्थेषु - वेदाः, ब्राह्मणग्रन्थाः, आरण्यकानि, उपनिषदः, स्मृतयः महाकाव्यानि च मुख्यरूपेण सन्ति। पुनः एतेषां ग्रन्थरत्नानाम् उपभागाः अपि वर्तन्ते। तदतिरिक्तं बौद्धजैनग्रन्थेषु तथा दक्षिणभारतसाहित्येऽपि प्राचीनार्थिकंविचारणामुल्लेखः प्राप्यते। प्राच्यग्रन्थाः सामाजिकार्थिक-राजनैतिक-दार्शनिक-धार्मिक न्यायिकविचारैः पूरितास्सन्ति। प्राचीनसाहत्यस्वाध्ययनं सूक्ष्मदृष्ट्या क्रियते चेत्-निश्‍चितं हि वैभवसम्पन्नस्य अतीतस्य ज्ञानं प्राप्यते। एतस्मादेव देशोऽयं विश्वगुरुपदं प्राप्तोऽस्ति। इमं विचारं लक्ष्यीकृत्य पाठेऽस्मिन् प्राचीनभारतीयार्थिकचिन्तनस्य मुख्यस्रोतग्रन्थैः सह उपभोग व्यवसायसम्बन्धिज्ञानप्राप्त्यर्थं प्रयत्नः कृतोऽस्ति।

---

**अर्थशास्त्रस्यार्थः**

कौटिल्येन कथितम् अस्ति - 'मनुष्याणां' वृत्तिः अर्थः। अर्थात् मानवानाम् आजीविकाम् अर्थः इति कथ्यते। अर्थशास्त्रस्य व्याख्या कुर्वन् तेन कथितम् अस्ति - यद् - तस्याः पृथिव्याः लाभपालनोपायः शास्त्रमर्थशास्त्रम् इति कथ्यते। अर्थात् जनैः सम्पन्नभूमि प्राप्तये तस्याः रक्षायै च यत् निरूपणं करोति तदर्थशास्त्रम्। इत्थं अर्थशास्त्रे राज्यव्यवस्था, अर्थव्यवस्था उभयोः सिद्धान्तयोः समावेशो भवतः। वस्तुतः कोटिल्यार्थशास्त्रम् - राज्यव्यवस्था, विधिव्यवस्था, अर्थव्यवस्था, समाजव्यवस्था, धर्मव्यवस्था सम्बन्धितशास्त्रं कथ्यते। महाभारतकाले अर्थशास्त्रं राजनीतिशास्त्रं, प्रशासनशास्त्रं च गणयते। तत्र अर्जुनः अर्थशास्त्रस्य विशेषज्ञरूपेण स्वीकृतं वर्तते। यथा-महाभारते -

**समाप्तवचने तस्मिन्नर्थशास्त्र विशारदः।**
**पार्थो धर्मार्थ तत्वज्ञो जगौ वाक्यमन्द्रितः॥**

**अर्थशास्त्रशब्दस्य सरलार्थः** - अर्थशास्त्रस्य शास्त्रम् इति संस्कृतात् प्रादुर्भूतो वर्तते। संस्कृते अर्थशब्दस्य अनेकाः अर्थाः भवन्ति। संस्कृते अर्थशब्दस्य अर्थः उद्देश्यः इति भवति।

**अर्थशास्त्रस्य महत्त्वम्**

भूमिः, पशवः, मानवाः च अर्थस्य त्रीणि मूलतत्वानि इति ऋग्यजुरथर्ववेदुषु वर्णितानि सन्ति। एभिः त्रिभिः तत्वैः अर्थशास्त्रस्योद्गमः भवति। भूमिं विनाम् अर्थशास्त्रस्य सर्वे आधाराः नष्टाः भवन्ति। अर्थस्य आधारः पशवः अपि वर्तन्ते। यथा -

**इह गावः प्रजाध्वमिहाश्वाः इह पूरुषाः।**
**इहो सहस्त्रदाक्षिणोऽपि पूषा निषीदति॥ (अथर्व - २०/१२७/१२)**

अस्यां भूमौ गावः, अश्वाः पुरुषाश्च उत्पत्तिधर्माः भवेयुः। पशूनां समृद्धिः भवेयुः। एभि समृद्धिभिः अर्थतन्त्राणि चक्राणि प्रचलिष्यन्ति। उत्पत्ति धर्माः समृद्धयश्च आर्थिकतन्त्राणि जीवनं ददाति।

**अर्थशास्त्रस्योपगिता**

'धनाद्धर्मः ततः सुखम्'। वेदः अर्थशास्त्रं धनशास्त्रं कथ्यति। वेदः उपदिशति यद् जनाः - परलोके च प्रसन्नः सुखिनः च भवन्तु। लोके निवसन्तः जनाः विपुलं धनम् अर्जयन्तु, ऐश्वर्यवन्तः भवन्तु, परलोकप्राप्तये दानधर्मादिकम् आचरन्तु। अनेन कल्याणं भविष्यति। कल्याणेन सह परमात्मनः प्राप्तिः अपि भविष्यति। अनया रीत्या धनात् धर्मः, धर्मात् सुखं भवति। अतः धन प्राप्तये अर्थशास्त्रस्य अध्ययनं सम्यग् करणीयम्। अर्थशास्त्रे विनिमयं प्राणरूपं वर्तते। व्यापारे स्पर्धां पारयितुं यजुर्वेदे सम्यग् वर्णितम् अस्ति।

**देहि मे ददामि ते नि मे धेहि नि ते दधे।**
**निहारं च हरासि मे निहारं नहराणि ते॥ (यजु. - ३/५०)**

अर्थात् - त्वं मह्यं देहि, अहं तुभ्यं दायामि। त्वम् इदं मम वस्तुं स्वपार्श्वे धारणं कुरु तस्य प्रतिरूपे यद् किञ्चिद्

द्रव्यं मह्यं दास्यसि, तदहं स्वीकरिष्यामि। अयं विनिमयस्य स्वरूपं वर्तते, यः अर्थशास्त्रस्य प्राणःरूपः वर्तते।

**अर्थशास्त्रस्यलाभ**

वैधानिक धनस्य उचितप्रयोगः कथं करणीयः ? एतस्य ज्ञानम् अर्थशास्त्रं ददाति। स्वल्पधनेन पर्याप्तकार्यं सम्यग् कथं स्यात् ? अस्माकम् आवश्यकतायाः पूर्तिः आधुनिक काले सम्यग् कथं भवेत् ? एतत् सर्वं अर्थशास्त्रं बोधयति। धनेन धनस्य अर्जनं भवति, अस्य ज्ञानम् अर्थशास्त्रेण ज्ञायते। वर्तमानकालिक आवश्यकतां पश्यन् विनिमय व्यापारेण धर्नाजने अर्थशास्त्रं पर्याप्तं योगदानं ददाति। कोषनिर्माणः निधिपतेःनियुक्तिः, निधिसंरक्षणस्य प्रणालिका, द्रव्यस्य दोहनं व्यापारेण सम्भवति, एतत् सर्व अर्थशास्त्रेण सम्भाव्यते।

यथा यजुर्वेदे -

**इमामेऽअग्न इष्टका धेनवः सन्त्वेका च दश च दश च शतं**
**च शतं च सहस्रं च सहस्रं चायुतं च नियुतं च नियुतं च**
**प्रयुतं चार्बुदं च न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्द्धवेत्ता**
**मे अग्न ऽ इष्टका धेनवः सन्त्वमुत्रामष्ल्लिोके ( ॥ यजु. - १७/२॥)**

**अर्थशास्त्रस्यहानिः**

समाजे स्वार्थिजनाः अपि सन्ति। ये स्वस्वार्थाय एव समाजस्यजनानां चिन्ताम् अकृत्वा धनस्य एकत्रीकरणे निहिताः भवन्ति ते समाजद्रोहिणः इति कथयन्ते। सर्वे धनिनः सुखिनश्च भवन्तु, इदृशी वेदस्य भावना भवति। परन्तु वेदविपरीताः जनाः अपि समाजे भवन्ति। ये धनानि कोषागारे पिहितं कृत्वा कृष्णधनस्य अनुयायिनः सन्ति ते समाजविरोधिनः सन्ति। तथा ते वस्तूनां, द्रव्याणां एकत्रीकरणं कुर्वन्ति। आपणे यदा वस्तूनां द्रव्याणाम् आभावाः भवन्ति तदा ते मूल्यवृद्धिःकृत्वा धनार्जनाय, लाभाय च द्रव्याणि आपणे द्रव्याणि प्रेषयन्ति। एतादृशान् जनान् शास्त्रं राक्षसवत् पश्यति।

कथयति च -

**पाहि नो अग्ने राक्षसः धूर्ते रावणः ( ऋग्वेद - १/३६/१५ )**

अर्थात् समाजे ये अहितकारिणः सन्ति, विघ्नकर्तारः सन्ति। ते अर्थशास्त्रदृष्ट्या राक्षसाः धूर्ताश्च एव सन्ति।

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) पाठ दृष्ट्या का परम्परा सर्वाधिका प्राचीना अस्ति ?

(क) आर्थिकचिन्तन परम्परा (ख) चार्वाक् परम्परा (ग) वैज्ञानिक परम्परा (घ) एकमपि ना

(२) प्राच्यग्रन्थाः कैः विचारैः पूरिताः सन्ति ?

(क) सामाजिकार्थिक विचारैः (ख) वैज्ञानिक विचारैः

(ग) युद्धसाहित्य विचारैः (घ) अध्यापन विचारैः

(३) अर्थशास्त्रं केषां आजीविकां अर्थः इति कथ्यते ?

(क) मानवानाम् (ख) पशूनाम् (ग) पक्षीनाम् (घ) यन्त्राणाम्

(४) पाठाधारेण महाभारते कः अर्थ शास्त्रस्य विशेषज्ञः स्वीकृतः ?

(क) युधिष्ठिरः (ख) दुर्योधनः (ग) अर्जुनः (घ) भीष्मः

(५) अर्थशास्त्रस्य कानि त्रीणि मूल तत्वानि वर्तन्ते ?

(क) यन्त्रः तन्त्रः मन्त्रः (ख) भूमिः पशवः मानवाः

(ग) मेघाः सागराः गिरयः (घ) एकोऽपि न

(६) केन धर्मः ततः सुखं भवति ?

(क) मन्त्रात् (ख) जनात् (ग) धनात् (घ) नृपात्

(७) धनप्राप्तये कस्य अध्ययनं सम्यक् करणीयम् ?

(क) विज्ञानस्य (ख) अर्थशास्त्रस्य (ग) मन्त्रस्य (घ) तन्त्रस्य

(८) केन धनस्य अर्जनं भवति ?

(क) धनेन (ख) जलेन (ग) पात्रेण (घ) दुग्धेन

**२. एकेन वाक्येन उत्तरं लिखन्तु।**

(१) सार्वधिकप्राचीना का परम्परा अस्ति?

(२) प्राच्यग्रन्थाः कैः विचारैः पूरितास्सन्ति ?

(३) ''मनुष्याणां वृत्तिः अर्थः'' केन कथितमस्ति ?

(४) संस्कृते अर्थशब्दस्य उद्देश्यः किं भवति ?

**३. द्वित्रैवाक्यैः उत्तरं लिखत।**

(१) पाठानुसारं अर्थशास्त्रस्य अर्थः लिखत ?

(२) अर्थशास्त्रस्य उद्गमः कथं भवति ?

(३) व्यापारे स्पर्धां प्राचियेतुं यजुर्वेदे वर्णितं श्लोकस्यार्थः लिखत।

(४) कृष्णधनस्य एकत्रीकरणं कः कथं च करोति ?

**४. सविस्तारम् उत्तरं लिखत।**

(१) अर्थशास्त्रस्य समाजे महत्त्वं लिखत।

(२) अर्थशास्त्रस्य उपयोगिता विषये वर्णनं कुरुत।

(३) अर्थशास्त्रस्य लाभः सम्यक् लिखत।

**छात्रप्रवृत्तिः**

- समाजे अर्थशास्त्र विषये अध्यापकेनसह परिसंवादं योजयित्वा छात्राः अर्थशास्त्रस्य आधुनिक महत्त्वाविषये चर्चा करिष्यन्ति।

**सुभाषितम्**

**शूरः सुरूपः सुभगश्च वाग्मी**
**शस्त्राणि शास्त्राणि विदां करोतु।**
**अर्थं विना नैव यशश्च मानं**
**प्राप्नोति मर्त्योऽत्र मनुष्यलोके॥**

●

# २० पर्यावरणं समाजश्च

**प्रस्तावना**

मानवानां सामाजिकजीवने पर्यावरणमेकमभिन्नमङ्गमस्ति। सामान्यतया तु मनुजान् परितः स्थिता या भौगोलिकस्थितिर्विद्यते, तदेव पर्यावरणमस्ति। पर्यावरणे सजीवनिर्जीवतत्त्वयोः समावेशः भवति। भूमिः, वायुस्तथा जलमेताः प्राणिमात्रस्य प्राथमिक्यावश्यकताः सन्ति। एतेषां समेषां सम्मिश्रणं नाम एव पर्यावरणम्। इदं पर्यावरणमेव अस्माकं जीवनं रक्षति विकासयति च।

मानवसमाजस्य कृते वृक्षपर्वतनद्यादीनां ज्ञानमनिवार्यमस्ति। यथा - प्रकृतिः मानवस्य सहायताङ्करोति तदेव मानवैरपि प्रकृत्याः विषये विचार्य प्रकृतेः हानिर्न स्यादिति विषयेऽपि चिन्तनीयमस्ति। कारणं तु यत् - साम्प्रतं नेकैः प्रदूषणैस्तथा रसायणैश्च पर्यावरणं प्रदूषितं कृत्वा वयमस्माकमेव विनाशङ्कुर्मः। अतः जीवमात्रस्य कृते पर्यावरणं परमावश्यकं वर्तते।

अतोऽत्र प्रस्तुतेऽस्मिन् पाठे पर्यावरणस्यार्थः, सजीव-निर्जीवतत्त्वानि, पर्यावरणप्रकाराः, पर्यावरणस्य मानवजीवने प्रभावः इति अंशानां विषये वयं पठामः।

---

## पर्यावरणस्य अर्थः

पर्यावरणमिति शब्दः 'परि + आवरणम्' इति द्वयोः शब्दयोः समन्वयेन भवति। परितः यद् आवरणमि'ति पर्यावरणम्। 'परि' अर्थात् अस्मान् परितः यत्किमपि विद्यते तत्सर्वमिति तथा च 'आवरणम्' नाम स्तरमिति।

परितः वृणोति, इति पर्यावरणम्। अनया व्युत्पत्त्या पर्यावरणशब्दः निष्पद्यते। मनुष्यः यत्र कुत्रापि निवसति, खादति, खेलति, पिबति, वायोश्च सेवनं करोति, एतत्सर्वमपि तु पर्यावरणे निलीयते। पृथ्वीं परितः यत्स्तरमस्ति, तस्मिन् स्तरे वायुः, भूमिः, अरण्यम्, पर्वताः, नद्यः, समुद्राः, वन्यप्राणयः, पशवः, खगाः तथा च मानवा इत्यादीनां समावेशः जायते। एतेषां समेषां घटकतत्त्वानां सुव्यवस्थितव्यवस्थापनतन्त्रं नाम एव पर्यावरणम्। ''परितः आसमन्तात् वृणोति प्रदूषणाद्रक्षति आच्छादयतीति पर्यावरणम्।''

अस्माकं परितो यत् दृश्यते तत्पर्यावरणमित्येव पर्यावरणस्य व्यापकोऽर्थः। या भूमिः, यश्च वायुः, यज्जलं परितः विद्यते, तत्सर्वं मिलित्वा पर्यावरणं भवति। पर्यावरणं नाम प्रकृतेः शुद्धता इति। यस्मिन् मृदावरणं, जलावरणं, वातावरणं तथा जीवावरणमेतेषां समेषामावरणानां सम्मिश्रणयुक्तं स्वरूपं नाम पर्यावरणम् इति।

पर्यावरणं मुख्यत्वेन द्वाभ्यां विभागाभ्यां ज्ञातुं शक्यते।

तद्यथा -

पर्यावरणम्

- जैविकम् (Biotic) (सजीवतत्त्वानि)
- अजैविकम् (Abiotic) (निर्जीवतत्त्वानि)

**सजीवतत्त्वानि**

पर्यावरणस्य सजीवतत्त्वेषु वृक्षाः, प्राणिनः, पशवः, पक्षिणः, मानवाः, सूक्ष्मजीवाः, कीटकादीनां समावेशः जायते। एतानि सर्वाणि तत्त्वानि पर्यावरणस्याभिन्नान्यङ्गानि सन्ति।

## निर्जीवतत्त्वानि

पर्यावरणनिर्जीवतत्त्वेषु पञ्चमहाभूतानामर्थात् पृथ्वी, जलं, तेजः (अग्निः), वायुः, आकाशश्चेत्येतेषां समावेशः भवति। एतानि पञ्चमहाभूतानि जीवसृष्ट्यै आवश्यकानि सन्ति। पर्यावरणस्य पृथ्व्यप्तेजवाय्वाकाशादयः निर्जीवतत्त्वानि तथा च वृक्षाः, प्राणिनः, कीटकादयः सजीवतत्त्वानि च परस्परावलम्बनं धारयन्ति। अतः एव पञ्चमहाभूतत्वेषु कस्याप्येकस्य तत्त्वस्य समस्या यदि समुद्भवति तदा तस्याः समस्यायाः प्रभावः जीवसृष्ट्या उपरि दृश्यते इति।

## पर्यावरणस्य प्रकारः

वयं भौगोलिकदृष्ट्या पर्यावरणविषये जानीमः। तदा समाजशास्त्रीयदृष्ट्या पर्यावरणप्रकाराः निम्नलिखितास्सन्ति। भौगोलिकपर्यावरणं तु प्रकृतिदत्तमस्ति। यदा सामाजिकपर्यावरणं मनुष्यैः निर्मितं रचितं वाऽस्ति। लेन्डिसमहोदयैः पर्यावरणस्य त्रयः प्रकाराः कथिताः।

(१) प्राकृतिकपर्यावरणम्

प्राकृतिकपर्यावरणे तु सूर्यः, चन्द्रः, पृथ्वी, आपः, वायुः इत्यादीनां प्राकृतिकतत्त्वानां समावेशः जायते। यस्मिन् मानवशक्तेः बुद्धेश्च प्रभावः न भवति।

(२) सामाजिकपर्यावरणम्

सामाजिकपर्यावरणं मानवः एव रचयति। मानवः जन्मतः मृत्युपर्यन्तं सामाजिकपर्यावरणेन सह संलग्नः भूत्वैव तिष्ठति।

(३) सांस्कृतिकपर्यावरणम्

सांस्कृतिकपर्यावरणस्य रचना मानवानां नीतिनियमैः, परम्पराभिश्च भवति। पर्यावरणमिदं सामाजिकीकरणे तु मानवेभ्यः वर्तनव्यवहारस्य ज्ञानं प्रददाति। मेकाईवरनाम्नः समाजशास्त्री तु पर्यावरणं त्रिषु विभागेषु विभजति। तद्यथा –

**पर्यावरणम्**

- **भौतिकपर्यावरणम्** ↓ पृथ्वी, सूर्यः, चन्द्रः, समुद्रः, इत्यादयः
- **आर्थिकपर्यावरणम्** ↓ गृहम्, मार्गाणि, इत्यादिः
- **सामाजिकपर्यावरणम्** ↓ सामाजिक-नीतिनियमाः परम्पराश्च

सामाजिकदृष्ट्या तु पर्यावरणस्य सामाजिकमेवं सांस्कृतिकं मूल्यमस्ति। तस्य क्रियाप्रतिक्रियया सह संलग्ना भवति। यथा मृतिकायाः वा वर्षायाः यादृशी आवश्यकता कृषकाय अस्ति तादृशी आवश्यकता तु उद्योगपतेः नास्ति। तदेव ग्रामीणपर्यावरणस्यैवं नगरपर्यावरणस्य मानवजीवनस्य उपरि भिन्न-भिन्नतया प्रभावः भवति।

## पर्यावरणस्य मानवजीवने प्रभावः

पर्यावरणस्य विविधतत्त्वानि पारस्परिकरीत्या संलग्नानि सन्ति। तानि तत्त्वानि भिन्नतया वा सामूहिकस्वरूपेण तु मानवजीवने स्वप्रभावं प्रस्थापयन्ति। मानवानां सामाजिकार्थिकसांस्कृतिकजीवने च पर्यावरणस्य तत्त्वानां प्रभावः दरीदृश्यते।

मानवजीवनं तथा पर्यावरणं परस्परं संलग्नमेवाऽस्ति।

(१) स्थानिकसम्बन्धः

कस्यापि समाजस्य सामाजिक-आर्थिक-राजकीय-सांस्कृतिकविकासे स्थानिकसम्बन्धः अतीव महत्त्वपूर्णः विद्यते। स्थानिकसम्बन्धेऽस्मिन् मुख्यत्वे स्थितेः मापनम् (Size) एवञ्च आकारः (Shape) दर्शनीयोऽस्ति।

यः कोऽपि देशः वा पृथिव्याः कस्मिन् भागे विद्यते ? तस्याधारेण विकासे पर्यावरणस्य स्थितयः सहायक्यः भवन्तीति। यथा-धरायां रेखांशः (येन समयनिर्धारणः भवति) एवञ्च अक्षांशः (येन यस्य कस्यापि प्रदेशस्य जलवायुः, प्राकृतिकसम्पत्तिः, पशुजीवनम्, मानवजीवनम्, संस्कृतिः इत्यादीनां निर्धारण क्रियते।)

(२) भूमिः तथा मानवजीवनम्

मानवः यस्मिन् प्रदेशे वसति, तस्य प्रदेशस्य भूमेः स्वरूपं मानवस्य सामाजिकजीवनस्योपरि प्रभावं प्रस्थापयति। उच्चपर्वतीयक्षेत्रे स्थितानां मानवानाङ्कृते उद्योगनगरादि-व्यवस्थाः उपलब्धाः न सन्ति अतः ते उद्योगादीनां प्रदूषणेन मुक्ताः भूत्वा तिष्ठन्ति। यस्य कस्य प्रदेशस्य प्राकृतिकवातावरणं मानवाय नित्यभोजनमपर्यति प्रभावं च स्थापयति। यथा - भारते उत्तरविस्तारे, दक्षिणविस्तारे च स्थितानां मानवानां रूपं तेषां भूम्या सह सम्बन्धं च दर्शयति।

(३) जलं तथा मानवजीवनम्

जलमेव जीवनमस्ति। तृषाशान्तये शुद्धं जलमनिवार्यम्। दैनिककार्ये, कृषिक्षेत्रे, उद्योगे, पशुपालने च जलस्यानिवार्यता विद्यते। यस्मिन् प्रदेशे समुद्रः, नदी, कूपः, तडागः वा विद्यते मानवानां सुखप्राप्तौ जलं महत्त्वपूर्णं स्थानं भजते। जलाधारेणैव हि मत्स्य-उद्योगं तथाऽन्तरराष्ट्रीयोद्योगमपि प्रचलति भवति च। यया रीत्या यथा जलं मानवजीवनेन सह संलग्नं भूत्वा समाजजीवने तथा अर्थव्यवस्थायां स्वप्रभावं प्रस्थापयति।

(४) मृत्तिका, खनिजपदार्थाः, मानवजीवनं च

मानवजीवने क्रियायाञ्च मृत्तिकायाः तथा खनिजपदार्थानां जलवदेव महत्त्वपूर्णः प्रभावः दरीदृश्यते। कृषेः भिन्नायाः मृतिकायाः प्रकारं ज्ञात्वैव कृषकाः स्वकृषिक्षेत्रे कार्पासव्रीह्यादीनाञ्च वपनङ्कुर्वन्ति। मानवः खनिजतत्त्वानामुपयोगस्तु स्वस्याद्भवकालतः एव करोति। पाषण-ताम्र-कांस्य-लोहेत्यादयः युगाः खनिजतत्त्वैस्सह संलग्नाश्चासन्। वर्तमानसमयेऽपि प्रौद्योगिकक्षेत्रे खनिजपदार्थानामुपयोगिता विद्यते। एतदति रिक्तं प्राकृतिक-रीत्या उत्पन्नाः वृक्षाः अपि मानवानां श्वसनक्रियायां सहायताङ्कुर्वन्ति। भौगोलिकदृष्ट्या शीतोष्णप्रदेशः शीतप्रदेशः, उष्णप्रदेशश्च प्राकृतिकसम्पत्तेः उपरि स्वप्रभावं प्रस्थापयति।

अतः निष्कर्षः लभ्यते यत् - पर्यावरणमेव अस्माकं जीवनं रक्षति विकासयति च। पर्यावरणमेव समेषां जीवानां पोषकं रक्षकं च वर्तते। पर्यावरणतः मनुष्याः, प्राणिनः वनस्पतयश्च स्वस्यास्तित्वायावश्यकानि पोषकतत्त्वानि लभन्ते। सर्वमिदं विश्वं पर्यावरणाधारितं वर्ततेऽतः अस्माभिः यत्नतः पर्यावरणं रक्षणीयमति।

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) पर्यावरणमि'ति शब्दः कयोः शब्दयोः संयोगेन भवति ?

(क) परी+अवरणम् (ख) परि+अवरणम् (ग) परी+आवरणम् (घ) परि+आवरणम्

(२) पर्यावरणस्य मुख्यतया कति विभागा ?

(क) त्रयः (ख) चत्वारः (ग) पञ्च (घ) द्वौ

(३) किं तत्त्वं पर्यावरणस्य सजीवतत्त्वं नास्ति ?

(क) वायुः (ख) मानवः (ग) कीटकाः (घ) पशवः

(४) किं तत्त्वं पर्यावरणस्य निर्जीवतत्त्वं नास्ति ?

(क) तेजः (ख) आकाशः (ग) जलम् (घ) सूक्ष्मजीवः

(५) पर्यावर्णस्य कति निर्जीवतत्त्वानि सन्ति ?

(क) त्रीणि (ख) चत्वारि (ग) पञ्च (घ) षट्

(६) पर्यावरणस्य कति प्रकारास्सन्ति ?

(क) चत्वारि (ख) षट् (ग) त्रयः (घ) सप्त

(७) परम्परायाः नीतिनियमानां च समावेशः पर्यावरणस्य कस्मिन् प्रकारे भवति ?

(क) प्राकृतिकपर्यावरणे (ख) सांस्कृतिकपर्यावरणे

(ग) आर्थिकपर्यावरणे (घ) सामाजिकपर्यावरणे

(८) कुत्र उद्योगनगरादीनां व्यवस्था न वर्तते ?

(क) उत्तरविस्तारे (ख) अधोभागे (ग) उच्चपर्वतीयक्षेत्रे (घ) दक्षिणविस्तारे

**२. एकेन वाक्येन उत्तरं लिखन्तु।**

(१) किं नाम आवरणम् ?

(२) सूक्ष्मजीवानां समावेशः कस्मिन् तत्त्वे भवति ?

(३) तेजसः समावेशः पर्यावरणस्य कस्मिन् तत्त्वे भवति ?

(४) पर्यावरणस्य सजीवनिर्जीवतत्त्वानि परस्परं संलग्नानि सन्ति न वा ?

(५) कः पर्यावरणस्य त्रीन् प्रकारान् सूचयति ?

(६) सामाजिकपर्यावरणं कः रचयति ?

(७) भौगोलिकपर्यावरणं कीदृशं वर्तते ?

(८) रेखांशः अर्थात् किम् ?

(९) किं नाम अक्षांशः ?

**३. द्वित्रैवाक्यैः उत्तरं लिखत।**

(१) पर्यावरणस्य कति विभागाः सन्ति ? के च ते ?

(२) पर्यावरणस्य निर्जीवतत्त्वानि लिखन्तु।

(३) पर्यावरणस्य कति प्रकाराः ? के च ते ?

(४) प्राकृतिकपर्यावरणम् अर्थात् किम् ?

**४. सविस्तरेण उत्तरं लिखत।**

(१) पर्यावरणस्य अर्थविषये लिखत।

(२) पर्यावरणस्य सजीव-निर्जीवतत्त्वानि लिखन्तु।

५. **टिप्पणी लेख्या।**

(१) पर्यावरणस्य प्रकारा।

(२) खनिजपदार्थाः मानवजीवनं च।

**छात्रप्रवृत्तिः**

- छात्राः पर्यावरणरक्षाविषये कृतनिश्चयाः भवन्तु।
- 'पर्यावरणमहत्त्वम्' विषयेऽस्मिन् प्रार्थनाखण्डे नाटकं भाषणञ्च कुर्वन्तु।
- पर्यावरणसंवर्धनाय वृक्षारोपणं कुर्वन्तु।
- विश्वपर्यावरणदिनकार्यक्रमस्य लेखं लिखन्तु।
- प्रदूषणनाशार्थं लोकजागृतेः कार्यक्रमाणामायोजनङ्कुर्वन्तु।

**सुभाषितम्**

**वृक्षः फलान्वितः भाति, वृक्षं धूनयते कपिः**
**वृक्षेण वार्यते तापो, जलं वृक्षाय दीयते।**
**वृक्षात् पतन्ति पर्णानि, वृक्षस्य प्रसरो महान्।**
**वृक्षे खगाः निकूजन्ति, वृक्ष ! धन्योऽसि भूतले॥**

●●●